य च गां दद्यात् सुशीलां च पयस्विनीं॥ रक्तवर्णां वस्त्रयुतां स्वर्णालंकारभूषितां॥ वस्त्रयु
ग्मपिधानां च यथाविभवसरतः॥ यक्षगंधर्वसिद्धैश्च पूजितो सि शचीपते॥ दानेना
नेन देवेश गंडदोषं विनाशय॥ इति संप्रार्थये देवमिंद्राणीसखमुत्तमं॥ अथ श्रे

त्तरं शतं संख्यां कुर्याद्ब्राह्मणभोजनं॥ तेभ्यो पि दक्षिणां दत्वा प्रणिपत्य क्षमापयेत्॥ र
मां कृत्वा ज्येष्ठशांतिं यथाविध्युक्तमार्गतः॥ गंडदोषं विनिर्जित्य आयुष्मान् जायते नरः॥
रत्युक्ते वृद्धगार्ग्ये पराशरेण कार्य विशेषतः॥ ज्येष्ठानक्षत्रसंभूत गंडदोषप्रशांतये॥ स्ना
नादानथवा ज्ञानादेकस्यादधनस्य च॥ यन्नक्षत्रमतिरिक्तं वा तत्सर्वं हतु महर्षिणाः॥ इयम
पि गंडप्रसवपूर्वकार्या॥ पूषाश्विनोर्गुरो सर्पमघाश्चित्रेंद्रमूलभे॥ एषु ऋक्षेषु जाता
नां कुर्यात्पोजननं शुभमित्युक्तेः॥ इति वृद्धगार्ग्यसंहितायां ज्येष्ठानक्षत्रजननशांतिवि
धानं॥ ॥ अथैकनक्षत्रजननशांति॥ तत्रैव वृद्धगार्ग्यः॥ एकस्मिन्नेव नक्षत्रे भ्रातृ
र्वा पितृपुत्रयोः॥ प्रसूतिश्च तयोर्मृत्युर्भवेदेकस्य निश्चयः॥ तद्दोषनाशाय तदा प्र
शस्तां शांतिं च कुर्यादभिषेचनं॥ संपूज्य रुद्रप्रतिमां तद्गोदानं च कुर्याद्धिमवानु
रूपं॥ तत्र शांतिं प्रवक्ष्यामि सर्वाचार्यमतेन तु॥ शुभर्क्षे शुभवारे च चंद्रताराबलान्वि
ते रिक्ताविष्टिविवर्ज्ये तु प्रारभेद्दिवसे सुधीः॥ आचार्यं वरयेत्पूर्वं चतुरो यद्धितोत्तमान्॥

पुण्याहं वाचयित्वा तु शांतिकर्म समाचरेत्॥ अग्नेरीशानदिग्भागे नक्षत्रप्रतिमां ततः
।तन्नक्षत्रोक्तमंत्रेणाभ्यर्च्य कलशोपरि॥ रक्तवस्त्रेण संछाद्य वस्त्रयुग्मेन वेष्टयेत्॥ स्वशा
२८ खोक्तेन मार्गेण कुर्यादग्निमुखं ततः॥ अनेनैव तु मंत्रेण हुनेदष्टोत्तरं शतं।प्रत्येकं समि
दन्नाज्यैः प्रायश्चित्तांतमेव च॥ अभिषेकं ततः कुर्यादाचार्यः पितृपुत्रयोः॥ वस्त्रालंका
रगोदानैराचार्यं पूजयेत्पुनः॥ ऋत्विग्भ्यो दक्षिणां दद्यान्माषत्रयसुवर्णकं॥ देवताप्र
तिमादानं धान्यवस्त्रादिभिः सह॥ यानशय्यासनादीनि दद्यात्तद्दोषशांतये॥ भोजये
द्ब्राह्मणांश्च वान्हि तच्छक्त्या वित्तवर्जितः॥ इति गर्ग्योक्तैकनक्षत्रजननशांतिवि रामः
धानं॥ अथ प्रकारांतरेणैकनक्षत्रजननशांतिः॥ ॥ज्योतिर्निबंधे॥ ॥समान २८
मेयदा देवि--- ता पुत्रौ च सोदरौ॥ भगिन्यौ वाथ जायेते तदावश्यं नाशनं॥ विधा
नं तत्र कर्तव्यं जन्मनक्षत्रपूजनं॥ नक्षत्रदेवतापूज्या त्वधिप्रत्यधिपूर्वकं॥ तस्वेत्तिर
नक्षत्रदेवते अधिदेवते॥ यस्य कस्य च यद्द्रव्यं दक्षिणापूजनादिकं॥ तस्य तत्र विधात

व्यमक्षं देवतुष्टये॥ गर्गोक्तेन विधानेन हवनं तत्र कारयेत्॥ समिच्चरु तिलैश्चैव
पृथगष्टोत्तरं शतं॥ मंत्रांहरिरुद्रौ देवौ स्वेनाम्नाप्यमयोंद्रौ॥ तदानमंत्रः॥ विविध
स्यास्य विश्वस्य पितरौ विश्रुतौ मुखौ॥ प्रायकामे तिथि दिने नेदेवौ हरिरावुभौ॥ दानं दे
मविधेः पश्चाद्दानादन्यभिषेचनं॥ अभिषेचनपूर्वं त्रिविप्रपूजा स्मृता शिवे॥ ततोभि
गम्य गोविंद शूलिनो प्रागनिकेतने॥ तर्पणां यतिनादेन जपचोवेणापावति॥ पूजा
समाप्येवं सर्वोपस्करसंयुतं॥ प्रार्थ्य देवदेवेशो लक्ष्मी शैलसुतेश्वरौ॥ दंड वस्त्र
लियानेन पूजनीयो पुनःपुनः॥ ततः स्वगृहमागम्य ब्राह्मणान्भोजयेत्सुधीः॥ तोषये
द्दक्षिणादानैर्यथाशक्त्या वरानने॥ एवं कृते विधानेन विघ्ननाशो भवेद्ध्रुवं॥ तुष्टिदं पु
ष्टिदं नृणां विधानमिदमुत्तमं॥ इति शिवरहस्योक्तमेकनक्षत्रजननशांतिविधानं
॥ अत्रेदमवगंतव्यं॥ यत्र सजातीयमनेकविधानमुपलभ्यते तत्रेच्छयान्यतरद्विधा
तव्यं॥ तावतां शास्त्रार्थसिद्धिरिति॥ अथ नक्षत्रगंडांतशांतिविधानं॥ प्रयोगपारि

जातेऽपि वा ॥ गर्गः ॥ अश्विनीमघमूलादौ त्रिघट्यं नवनाडिका ॥ रेवतीसर्पशक्रांते मासाश्चक्रतु
२८ स्यापकाः ॥ स्वपक्षेऽशुभा ॥ शाक्रो ज्येष्ठा ॥ मासा द्वादश घटिकाः ॥ ऋतुः षट् ॥ सायकः पंचदश
इत्यर्थः ॥ भगणांतरेषु ॥ अश्विनीमघमूलादौ नाडिकद्वितयं तथा ॥ रेवतीसर्पशक्रांते ना
डिकाद्वितयं तथा ॥ अपि च ॥ अश्विनीमघमूलानां पूर्वार्द्धे बाध्यते पिता ॥ पूर्वाहिशक्रे
पश्चार्द्धे जननी बाध्यते शिशोः ॥ पितृघ्नः स्याद्दिवा जातो रात्रिजातस्तु मातृहा ॥ आत्मघ्नः सं
ध्ययोर्जातो नास्ति गंडे निरामयः ॥ दिवादिजननं मध्ये चैव नक्षत्रेषु दुष्टमिष्यते गंत रामः
पां व्यं तस्यैव प्रकरणात् ॥ गंडशब्दनिर्देशात् ॥ एवं गंडदंडजातानां परिहारो विधीयते ॥ २८
वर्जयेद्दर्शनं राजंस्तच्च षाण्मासिकं भवेत् ॥ तस्य शांतिं प्रवक्ष्यामि सोममंत्रेण भक्ति
मान् ॥ सोममंत्र आप्यायस्वेत्यादिः ॥ कांस्यपात्रं प्रकुर्वीत पलैः षोडशभिर्वृतं ॥ अष्ट
भिश्च चतुर्भिर्वा द्वाभ्यां वा शोभनं तथा ॥ तन्मध्ये पायसं शंखे नवनीतेन पूरिते ॥ कां
स्यपात्रे पायसं निक्षिप्य तेन तत्र नवनीतपूर्णं शंखं स्थापयित्वा चंद्रप्रतिमामर्चयेदि

त्याह ॥ राजतं चंद्रमभ्यर्च्य सितपुष्पस्रगक्षतैः ॥ द्विजः सोमवास्तु शुक्लमाल्यांबरार्चितः
॥ सोमोऽहमिति संचिंत्य पूजां कुर्यात्समाहितः ॥ दद्याच्च दक्षिणामिष्टां गंडदोषप्रशांतये ॥
शुक्लां वा गोश्वरं चैव ताम्रपात्रसमन्वितं ॥ गंडदोषोपशांत्यर्थं दद्याद्द्विजे शुचिरिति ॥
इदं शांतिकं गोमुखप्रसवपूर्वकं कर्तव्यं ॥ एषाश्विनी गुरौ स्यपमिघा चित्रे ऽक्षमूलभे ॥ ए
पुरुक्षेषु जातस्य कुर्यात्क्रौंजननं तथेति वचनात् ॥ इति गंडोक्तनक्षत्रगंडांतशांतिविधा
नं ॥ अथ तिथ्यादिगंडांतशांति ॥ अभुक्ते नरजातस्य सूतकांत्यदिने यवा ॥ शांतिं शुभे
ऽह्नि वा कुर्यात्तावत्सुतं न लोकयेत् ॥ ज्योतिर्निबंधे नारदः ॥ पूर्णानंदाख्ययोस्तिथ्योः संधिर्ना
डिद्वयं तथा ॥ गंडांतं मृत्युदं जन्मयात्रोद्वाहव्रतादिकं ॥ कुलीरसिंहयोः कीटचापयोर्मी
नमेषयोः ॥ गंडांतमंतराले स्याद्घटिकार्द्धं मृतिप्रदमिति ॥ नंदाप्रतिपत्तिथिगंडे त्व
नड्वाहं नक्षत्रे धेनुमेव च ॥ कांचनं लग्नगंडे तु दद्याद्दोषो विनश्यति ॥ अथाद्यभागे पि
तुर्गंडे त्रयाणामभिषेचनं ॥ रत्नरश्मिशो मातुरभिषेकं च कारयेत् ॥ उत्तरे तिलपात्रं

स्यात्पुष्ये गोदानमुच्यते। आज्यप्रदानं त्वार्द्रे च पूर्वाषाढे च कांचनं॥ त्वाष्ट्रे चित्रा न दृष्टव्यं॥
उत्तरा तिष्य चित्रासु पूर्वाषाढो मृद वस्य च॥ कुर्याच्छांतिं प्रयत्नेन नक्षत्राकारजां बुधः।
३० सुवर्णेन दत्ते धेनि यथा वित्तानुसारतः॥ नक्षत्राधिपते रूपं कृत्वा वस्त्रद्वयान्वितं॥ वरु
णे त्वार्चनं कार्यं स्वस्ति वाचन पूर्वकं॥ शतौषधीनि रत्नानि मृत्तिका पंचगव्यसंयुतं॥ व
रुणं पूजा कलशे कार्या तिंगातु॥ पूजांते समिदन्नाज्यैर्होमं तिलयवैस्तथा॥ ततः पूर्णा
हुतिं कृत्वा वेदाध्यापि कुटुंबिने॥ उत्तरा प्रथमे पादे तिलपात्रं तथैव च॥ तिष्ये तु गां स
वत्सां च सुशीलां च पयस्विनीं॥ अजां चित्रासु वे दद्यात् पूर्वाषाढे तु कांचनं॥ यवांश्च राम:
व्रीहि माषांश्च तिलमुद्गान्न दापयेत्॥ यथा वित्तानुसारेण कुर्याद्ब्राह्मण भोजनं॥ पितु ३०
रायुष्यवृद्ध्यर्थं शांतिरत्र विधीयते॥ एवं यः कुरुते सम्यक् शांतिकर्म समाहितः॥ नदो
षैर्लिप्यते नूनं पद्मपत्रमिवांभसा॥ आयुरारोग्यमैश्वर्यं समाप्नोति दिने दिने॥ धनधा
न्य समृद्धिं च पुत्रपौत्र समृद्धिमान्॥ नक्षत्रगंडांत नक्षत्रमुक्तं नारदेन॥ सार्पेंद्रपौष्ण

मेषांस पो उ शांशांमसंधयः। तदग्रमेष्वघ पादा भानो गंडांत संज्ञकाः। सर्वेषां गंडजाता-
नां परित्यागो विधीयते॥ वर्जयेद्दर्शनं तावत् तर्वं स्वषाण्मासिकं भवेदिति॥ रत्युत्तर गार्ग्यो
क्तेति व्यादि गंडांत शांति। अथ पौ दिन क्षयादि सर्व गंडांत शांति॥ अथातः संवक्ष्या
मि जन्मकाले विशेषतः। गंडांतानां च नामानि महादोषकराणि च। दिनक्षये व्यती-
पाते व्याघाते विष्टि वैधृतौ॥ शूलगंडे उति गंडे च परिघे यमघंटके॥ कालगंडे मृत्यु
योगे दग्धयोगे सुदारुणे। तस्मिन्नां दुदिने प्रासे प्रसूतिर्यदि जायते॥ अति दोषकरी
प्रोक्ता तत्र पाप युते सति॥ विचार्य यत्नेन दैवज्ञः शांतिं कुर्याद्यथाविधिः॥ यजनं देव
तानां च ग्रहाणां चैव पूजनं॥ दीपं शिवालये नत्वा घृतेन प्रतिपादयेत्॥ अभिषेकं शं
करस्य अश्वत्थस्य प्रदक्षिणं॥ आयुर्वृद्धिकरं जाप्यं सर्वारिष्ट विनाशनं॥ गुरुदेव
ताविप्राणां पूजनं गोत्रवर्द्धनं॥ पुष्ट्यायुस्तु वृद्ध्यर्थं अभीष्ट फल सिद्धये॥ सर्वारिष्ट-
हरार्थाय ग्रहयज्ञं समाचरेत्॥ शिवाय विधिवन्मृत्वा दीपदानं करोति या॥ अपरं च उं

गोष्टते नैव मृत्युं जयेन्नरः। पुनर्मृत्युप्रजननं शिवदीपदानादिकल्पनं गुडाकुलसंवधा-
र्थं। ततो नक्रमांतरमिति दृष्टव्यं।। विकृमूर्त्तिमहापुरुषमश्वत्थ श्रीकरे सदा।। ।।
३१ प्रदक्षिणं नरो भक्त्या कृत्वा मृत्युंजयं जपेत्।। सर्वसंपत्समृद्ध्यर्थं नित्यकल्याणवृ-
द्धये।। अभीष्टफलसिद्ध्यर्थं कुर्याद्ब्राह्मणभोजनं।। अनिषेकं शिवे शांतिं कृत्वा भक्त्या
नरोत्तमः।। अकालमृत्युं निर्जित्य दीर्घायुर्जायते नरः।। दिनक्षयलक्षणमुक्तं पाद्मे मा-
घवीये। द्वौ तिथ्यंतौ चैकवारे यस्मिन्स्यात् दिनक्षय इति।। विधानंतरमाह।। गणप
संपूज्य सत्कैः सौरं मृत्युंजयं शुभं।। शांतिजाप्यं रुद्रजाप्यं कृत्वा मृत्युंजयी भवेत्।। मूले रामः
वा साष्टगंडे वा कुर्याद्दत्तानि लतः।। आयुर्वृद्धिकरार्थाय गंडदोषप्रशांतये।। रस्तु ३१
तरगार्ग्योक्त दिनक्षयानि गंडांत शांतिः।। अथ व्यतीपातादि शांतिः।। शौनकीये।। अथा ता
तः संप्रवक्ष्यामि शौनकः शांतिमुत्तमां।। वैधृतौ च व्यतीपाते महादोषोभिजायते।
कुमारजन्मकाले च व्यतीपातश्च वैधृतिः। संक्रमश्च रवेस्तत्र जातो दारिद्र्यकारकः।।

दरिद्राणां महादुःखं व्याधिपीडा महाभयं।। अप्रियं मृत्युमाप्नोति नात्र कार्या विचारणा-
त्।। स्त्रीणां च शोकदुःखं च सर्वनाशकरो भवेत्।। शांतिं वा पुष्कलां कार्या तदा दोषो नक-
श्चन।। गोमुखप्रसवं कुर्याच्छांतिं कुर्यात्प्रयत्नतः।। जपाभिषेकदानैश्च होमादपि विशे-
षतः।। नवग्रहमखं कुर्यात्तस्य दोषोपशांतये।। प्रथमं गोमुखाज्जन्म ततः शांतिं समाच-
रेत्।। गृहस्य पूर्वदिग्भागे गोमयेनानुलिप्य च।। अलंकृते तस्य देशे तु व्रीहिराशिं प्रक-
ल्पयेत्।। पंचद्रोणमितं धान्यं तदर्धं तंडुलेन च।। तदर्धं तु तिलैः कुर्यादन्योन्यं परिकल्प-
येत्।। धान्यं व्रीहिः प्रथमं व्रीहिपरिधिः। तन्मध्ये तंडुलपरिधिः। तदंतस्तिलपरिधिरिति
राशित्रयविवेकः।। अव्यवहितयराशौ तु अष्टपत्रं लिखेद्बुधः।। पुण्याहं वाचयित्वा तु आ-
चार्यं वृणुयात्सुरा।। आचारवंतं धर्मज्ञं कुलीनं च कुटुंबिनं।। मंत्रज्ञं तंत्रतत्त्वज्ञं शां-
तिकर्मणि कोविदं।। पंचांगभूषणं दद्यात्पदवस्त्रांगुलीयकं।। राशौ प्रतिष्ठितं कुंभम-
व्रणं सुमनोहरं।। तीर्थोदकेन संपूर्य सर्वदोषधिपल्लवं।। मंगल्यं गंधरत्नं च वस्त्रयुग्-

ग्मेन वेष्टयेत्॥ तस्योपरि न्यसेत्पात्रं सत्रवस्त्रेण वेष्टयेत्। प्रतिमां स्थापयेद्धीमान्प्रत्या
धिप्रत्यधिदेवतां॥ चंद्रादित्यादिका पार्श्वे मध्ये चेष्टतिमर्चयेत्॥ एवमेव व्यतीपातज्वा
३२ तीसंक्रमणास्य तु॥ भानोरुत्तरतो रुद्रमग्निं दक्षिणतो यजेत्॥ निष्कमात्रेण चार्द्धेन पा
देनापि च शक्तितः। प्रतिमाः कारयेद्धीमांस्तत्तद्देवस्वरूपलक्षिताः॥ प्रतिमापूजनार्थाय व
स्त्रयुग्मं निवेदयेत्॥ अधिदेवं भवेत्सूर्यो रुद्रः प्रत्यधिदेवता॥ तत्तद्ध्यानविधानेन त
त्तन्मंत्रेण पूजयेत्॥ अथ मंत्रविवेकः॥ प्रधानदेवता रुद्रो ऽधिदेवता। अग्निः प्रत्यधि
मा देवतेति। त्रियंबकेन मंत्रेण प्रधानप्रतिमां यजेत्॥ तस्सूर्य इति मंत्रेण सूर्यपूजां समा राम: ३२
चरेत्॥ आप्यायस्वेति मंत्रेण सोमपूजां समाचरेत्॥ संक्रांतिदेवतादिपूजनं तु तत्त
ल्लिंगकैर्मंत्रैः कार्यं। व्याहृतिमंत्रैस्तु सर्वेस्तु मुच्चीयते। उपचारैः षोडशभिर्यद्वा पंचो
पचारकैः॥ अर्चितं गंधपुष्पाद्यैः फलैर्नैवेद्यसमर्पयेत्॥ मृत्युंजयेन मंत्रेण प्रधान
प्रतिमां स्पृशन्॥ अष्टोत्तरसहस्रं वा अष्टोत्तरशतं तु वा॥ अष्टाविंशतिधा वा प्र

जप्याच्च स्वशक्तितः॥ सर्वसौरं प्रजप्याच्च सोमार्थं सोममंत्रतः॥ आनो भद्रा इति सूक्तं च
भद्राग्नेश्रसूक्तकं। जपेच्च पौरुषं सूक्तं त्र्यंबकमतः परं॥ कुंभं स्पृष्ट्वा चतुर्दिक्षु
जपं कुर्युश्च ऋत्विजः॥ कुंभस्य पश्चिमे देशे स्थंडिले अग्निं प्रकल्पयेत्॥ स्वगृह्योक्त
विधानेन कारयेत्संस्कृतानलं॥ त्र्यंबकेन मंत्रेण समिदाज्यचरून्हुनेत्॥ अष्टोत्तर
सहस्रं वा अष्टोत्तरशतं तु वा॥ अष्टविंशति वा कुर्याच्च स्वशक्त्यनुसारतः॥ मृत्युंज
येन मंत्रेण तिलहोमं समाचरेत्॥ ततः स्विष्टं हुत्वा अभिषेकं च कारयेत्॥ समुद्र
ज्येष्ठाः सूक्तेन आपो हिष्ठा त्र्चेन च॥ अक्षीभ्यामिति सूक्तेन पावमानीभिरेव च॥
त्रियंबकेन तत्सूर्यं आप्यायस्वेति मंत्रतः॥ सुरास्त्वामिति मंत्रेण अभिषेकं समाचरे
त्॥ अभिषेकात्तु तं वस्त्रमाचार्याय प्रदापयेत्॥ स्वेतवस्त्रधरो नेत्लाभरणं धैर
लंकृतः॥ जनमानं स्त्रियायुक्तं आज्यावेक्षणमाचरेत्॥ आचार्यं पूजयेत्पश्चाद्वस्त्रहेमां
गुलीयकैः॥ गोदानं वस्त्रदानं च स्वर्णदानं विशेषतः॥ तदोषशमनार्थाय आचार्या

य प्रदापयेत्॥ प्रदद्यादानपटं दद्यात्ततः शांतिर्भविष्यति। जापकेभ्यो ब्राह्मणेभ्यो दक्षिणा
भिश्च तोषयेत्॥ दीनांधकृपणेभ्यश्च प्रदद्याद्भूरिदक्षिणां॥ ब्राह्मणाञ्छतसंख्याका
३२ न्मिष्टान्नैर्भोजयेत्ततः॥ बंधुभिः सह भुंजीत यथाविभवसारतः॥ एवं यः कुरुते मर्त्यो नै
व दुःखमवाप्नुयात्॥ आयुरारोग्यमैश्वर्यं मातापित्रोः शिशोरपि॥ सर्वदुःखनिवृ-
सर्वं पुत्रपौत्रप्रवर्धनं सर्वान्कामानवाप्नोति सुखं। मत्वा चिरं वसेत्॥ इति शौनकोक्तौ वै
धृतिव्यतीपातसंक्रांतिजननशांतिः॥ अथ विषघटिकाजननशांतिः। वृद्धगार्ग्यः॥ वि रामः
षनाडीषु संजातो मातापित्रोरथात्मनः॥ ॥नाशकृद्भिषक्। स्त्रीस्त्रियोः क्रूरे त्वथ समेपि ३२
वा॥ तद्दोषपरिहाराय शांतिकर्म समाचरेत्॥ रुद्रो यमोग्निर्मृत्युश्च देवताः परिकी-
र्तिताः॥ सुवर्णेन यथाशक्त्या तत्तद्रूपेण संयुताः॥ प्रतिमाः कारयित्वा तु आढकव्रीहि
भिः स्थले स्थंडिले परिकल्प्याथ कुंभमोषधिसंयुतं॥ जलैः संपूर्य संस्थाप्य मृदादि
प्रक्षिप्त ततः॥ वस्त्रद्वयेन संवेष्ट्य पंचरत्नानि निक्षिपेत्॥ कुंभस्योपरि संस्थाप्य चत

स्रः प्रतिमास्तथा॥ तत्तन्मंत्रैश्च संपूज्य गंधपुष्पोपहारकैः। कद्रुद्रायेति मंत्रेण या-
माय त्वेमंत्रतः। अग्निर्मूर्धेति मंत्रेण परं मृत्योरिति त्वथ॥ एतैश्च तु त्रिभिर्मंत्रैश्च क्रमाद्
द्धुनेत्तथा। समिच्चरुघृतद्रव्यैः प्रत्येकं च यथाक्रमात्॥ शालिभिश्च सह चाज्यैर्हुने
दष्टसहस्रकं। अष्टोत्तरशतं वाथ अष्टाविंशतिमेव वा॥ ततस्तु हुनेद्देवांस्तत्तन्मं
त्रैश्च कल्पवित्॥ तिलहोमोपि रुद्रादीनामेव वा। ततोभिषेचयेद्दानमंत्रैः पौराणिकैः
क्रमात्॥ दानं प्रतिमानां कुर्यादिति शेषः। प्रीयतां भगवानीशः पिनाकी स्ववतीमुखः
तवमूर्तिप्रदानेन समस्ताभीष्टदो भव॥ रक्तलीनो यमः कालो दंडहस्तः प्रसन्नधीः॥र
रुद्रकपालकः कलो महिषस्थः शिवं कुरु॥ पिंगश्मश्रुकेशांतः पिंगाक्षः चरणोरणः
॥ब्रह्मागस्त्यः साध्यस्तु यश्च स्वे तार्चिः शांतिलोचनः॥ तवमूर्तिप्रदानेन मम पापं विनाशय
॥श्रीदः पुष्कारालेचदनो नीलांजनसमाकृतिः॥ रक्तः स्वे रुद्रगदापाणिर्मृत्युर्मर्यादा तु सर्वदा
॥दानमेवं विधिं मंत्रयथाविधि समाचरेत्॥ गोमहिरण्यामंत्रैश्च आचार्य द्विज-

ये सुधीः॥ एवं कुर्वन्विधानेन सर्वदोषं प्रणाशयेत्॥ इति वृद्धगार्ग्योक्तविषघटिकाजन
नशांतिः॥ अथ यमलजननशांतिः॥ साचरजोदर्शनिशांतिकप्रकारेणाभिहिता॥ महतो
३४ चंद्रसूर्यस्य प्रसूतिर्यद्विजायते॥ व्याधिपीडा तदा स्त्रीणां मादौ तु ऋतुदर्शनादियो
दिरूपाऽत्रापि द्रष्टव्या॥ ॥ अथ यमलजननशांतिः॥ तत्राश्वलायनकारिका॥
अथ यस्य वधूर्गौर्वा जनयेद्यमौ ततः। समरुद्भ्यश्चरुं कुर्यादेताहुतिर्यथा
पिबेति॥ अत्राश्वलायनब्राह्मणं भवति॥ तदाहुर्य आहिताग्निर्यस्य भार्या गौर्वा
यमौ जनयेत्कात्र प्रायश्चित्तिरिति सोऽग्नये मरुत्वते त्रयोदशकपालं पुरोडाशं नि रामः
र्वपेत्तस्य याज्यानुवाक्ये मरुतो यस्य हि क्षये पाता वेदचरमाऽहे वेसाहुतिवाहवनी ३४
ये जुहुयादग्नये मरुत्वते स्वाहेति सा तत्र प्रायश्चित्तिरिति॥ मारुतचर्वितिकर्तव्य
तादर्शपूर्णमासस्थालीपाकवद्द्रष्टव्या॥ ॥ अथ कात्यायनोक्तपरिशिष्टोक्तय
मलजननशांतिः॥ अथ तोयमलजनने प्रायश्चित्तं व्याख्यास्यामो यस्य भार्या गौ

दासीमहिषीवडवा वा विकृतं प्रसवेत्प्रायश्चित्ती भवेत् तदेदिशाहे चतुर्णां क्षीरवृक्षाणां
कषायमुपसंहृत्य प्लक्षवटोदुंबराश्वत्थशमीदेवदारुगौरसर्षपास्तेषामपो
मिश्रलिंहिरण्यदूर्वांकुरानप्रदत्तेनैरष्टौ कलशान्प्रपूर्य सर्वौषधीनां दंपतीस्नापये
यित्वापोहिष्ठेति तिसृभिः कयानश्चित्र इति द्वाभ्यां पंचेंद्रेण पंचवारुणेनेदमापः प्रव
हतेत्यपावमिति स्नापयित्वालंकृत्य तो दर्भेषूपवेश्य मारुतं स्थालीपाकं श्रप
यित्वाज्यभागाविष्ट्वाज्याहुतीर्जुहोति पूर्वोक्तैः स्नानमंत्रैः स्थालीपाकस्य जुहोत्यग्न
ये स्वाहा सोमाय स्वाहा पवमानाय स्वाहा पावकाय स्वाहा मरुताय स्वाहा मरुता
य स्वाहा मरुद्भ्यः स्वाहा यमाय स्वाहांतकाय स्वाहा मृत्यवे स्वाहा ब्रह्मणे स्वाहाग्नये
स्विष्टकृते स्वाहा॥ यत्ते देवा गृहे सालेषूलूकः कपोतो गृध्रः श्येनो वा गृहं प्रविशेत्स्तंभः
प्ररोहेद्वल्मीकं मधुजालं वा भवेदुदकुंभप्रज्वलनं श्वासनशयनयानेभंगेषु गृहगो
धिका कृकलास शरीर सर्पतोद्भवं ध्वजविनाशे सार्पेन्ने कृते गंउ योगे देव प्रसर्पे

कूपोद्धजनेपर्वतिपतनेथन्येष्वप्युत्पातेष्वेतदेव प्रायश्चित्तं गृह्योक्तेनविधिना कृत्वाचा
र्यायवरं दत्वाब्राह्मणान्भोजयित्वा स्वस्तिवाच्याशिषः प्रतिगृह्य शांतिर्भवतिशांतिर्भव
३५ ति॥इतिहेमाद्रौ शांतिकांडे कात्यायनपरिशिष्टोक्तयमलजननादिशांतिः॥ ॥अथ
सदंतोपरिदंतजननशांतिः॥तच्च पद्मपुराणे॥विष्णुधर्मोत्तरखंडे परशुरामं प्रत्याह पु
ष्करः॥दंतजन्मनिबालानां लक्षणं तन्निबोधमे॥उपरि प्रथमं यस्य जायंते तु द्विजोद्भि
जः॥द्विजा दंताइत्यर्थः॥दंतैर्वा सह यस्य स्याज्जन्म भार्गवसत्तम॥मातरं पितरं चाप्य रामः
थवा दहेदात्मानमेव वा॥तत्र शांतिं प्रवक्ष्यामि तन्मे निगदतः शृणु॥गजपृष्ठगते बालं ते ३५
स्तथा स्नापयेद्द्विजः॥तैरिति वक्ष्यमाण सर्वौषधीभिः संबध्यते॥तदभावे तु धर्मज्ञः
कांचने तु वरासने॥सर्वौषधैः सर्वगंधैर्बीजैः पुष्पैः फलैस्तथा॥पंचगव्येन रत्नैश्च
मृत्तिकाभिश्च भार्गव॥स्थालीपाकेन धातारं पूजयेत्तदनंतरं॥समाहृं चात्र कर्तव्यं त
था ब्राह्मणभोजनं॥स्थालीपाके न धातृपूजनं नैवेद्यहोमात्मकं॥अष्टमेहनि विप्रा

णां तथा देया च दक्षिणा॥कांचनं रजतं गाश्च भुवं चासनमेव च॥दंतजन्मनि सामान्यंश्च
णु स्नानमतः परं॥सामान्यस्य दंतोपरि दंतजननव्यतिरिक्तस्वाभाविकदंतजननेस्य
र्थः॥भद्रासने निवेश्येनं मृद्भिर्मूलफलैस्तथा॥सर्वौषधैः सर्वबीजैः सर्वगंधैस्तथैव च
॥स्नापयेत्पूजयेद्देवं वह्निं सोमं समीरणं॥समीरणं वायुं॥पर्वतांश्च तथा रव्यां तान्देवदे
वं च केशवं॥एतेषामेव जुहुयाद्धुतमग्नौ यथाविधि॥एते पांचब्रह्मादिपंचकानां॥होमस्य
रव्या स्थान रत्नानि च॥ब्राह्मणानां दातव्या यथाशक्त्या च दक्षिणा॥ततस्त्वलंकृतं बालमा
सने तु प्रवेशयेत्॥व्यासीनं पंचगव्येन फलैर्बीजैः सुस्नापयेत्ततः॥स्वस्ति वैबालकानां च
तेषां कार्यं च पूजनं॥पूज्याश्चाविधवा नार्यो ब्राह्मणाः सुहृदस्तथैव ति॥इति श्रीविधान
पारिजाते पद्मपुराणोक्तं सदंतोपरिदंतस्वाभाविकदंतजननशांतिविधानं॥श्रीकृ
ष्ण॥अथोर्ध्वदंतजननशांतिर्माघे॥ब्रह्मयामले॥प्रथमं दंतनिर्मोक ऊर्ध्वं बालस्य
चेद्भवेत्॥क्लेशाय मातुलस्येह सचप्रोक्तो मनीषिभिः॥विघ्नसंगं प्रवक्ष्यामि विधानं॥

विधिपूर्वकं ॥ सोवर्णं राजतं वापि ताम्रं कांस्यमयं तु वा ॥ दध्योदनेन संपूर्य पात्रं दद्यात्
द्विजोत्तमः करे ॥ स्वमंत्रं भोजनं दत्वा तं पश्येन्मातुरुत्संगे शिशुं ॥ सालंकारं सवस्त्रं च शिशुमालिं
३६ ग्य सादरं ॥ मंत्रस्तु ॥ रक्ष मां भोगिने यस्त्वं रक्ष मे सकलं कुलं ॥ गृहीत्वा भोजनं सान्नं प्रस
न्नो भव मे सदा ॥ निर्विघ्नं कुरु कल्याण मां निर्विघ्नोस्य मातरं ॥ मयैवास्मान्नमधिष्ठाय
चिरंजीव मयास्त्विहेति ॥ ततोभिनंदयेद्विद्वान् भगिनीं भागिनीपतिं ॥ ज्येष्ठा दुहितान्नुस्
न्विप्रान्परान्न पिपदर्ज्जयेत् ॥ होमं कृत्वा तिलाज्येन ब्राह्मणानपि भोजयेत् ॥ होमसं
ख्याष्टोत्तरशतादिः ॥ एवं कृते विधाने तु विघ्नकोपि न जायते ॥ तस्मात्प्रयत्नतो विद्वान्वि राम:
धानं सम्यगाचरेत् ॥ इति ब्रह्मयामलोक्तमूलदंतजननशांतिः ॥ अथ वैकृतप्रसवशां ३६
तिः ॥ प्रयोगपारिजाते गार्ग्यः ॥ अकालप्रसवा नार्यः ॥ कालातीतप्रजास्तथा ॥ विकृतप्र
सवाश्चैव युग्मप्रसवकास्तथा ॥ अमानुषा अरुंडाश्च अजातव्यंजनास्तथा ॥ अ
रुंडाः पिंडा मस्ताः ॥ हीनांगा अधिकांगाश्च जायंते यदि वा स्त्रियाः ॥ पशवः पक्षिणश्चै

व तथैव च सरीसृपाः ॥ विनाशं तस्य देवस्य कुलस्य च विनिर्दिशेत् ॥ निर्वासयेत्ताच्च पति
श्च राष्ट्रात्स्त्रियश्च पूज्या ॥ अनतो द्विजेंद्राः ॥ चिकित्सेन्नै ब्राह्मणान्तर्पतोश्च ततोस्य शां
तिं समुपैति पार्थ ॥ इति श्रीविधानपारिजाते श्रीमदनंतभट्टविरचिते निबंधे अकाल
प्रसवादिशांतिः ॥ अथ विधानमालोक्तविकृतजननशांतिः ॥ विकृतांगा निजायंते च
पत्यनिरूपोत्तमा ॥ यानि यानि यमप्यस्त्राहो नद्धृतानि विधानतः ॥ हीनांगा अधिकांगा
नि स्पंदं तानि विशेषतः ॥ उत्सन्नाश्चैव पश्यंति प्रवदंति हसंति च ॥ सकूर्चानि च जायंते पि
त्रोर्मृत्युं दिशंति च ॥ सर्पव्याघ्रवृकादीनां रूपेण निधिर्धेर्नृप ॥ जायते प्राणिनां गर्भो
महाभयविधायकाः ॥ उत्पद्यंते विलीयंते काले नैकेन देहिनः ॥ तज्जन्मभयनाशाय
विधानं कथ्यते मया ॥ तस्याउद्वारसंभूता दृश्यते विकृता प्रजा ॥ दशाहाद्धर्ममुद्दि
श्य स्नापनीया शुभैर्जलैः ॥ जनयित्री च राजेंद्र जनकश्च विशेषतः ॥ सकुल्या अपिमा
नुष्या शुक्लमाल्यानुलेपनाः ॥ शुक्लांबरधराश्चापि स्त्रश्वेतावाचः प्रयत्नतः ॥ कृता

क्रिकस्तु कर्त्ता च विदध्यीत विधानकं ॥ सदनस्योत्तरे भागे स्थंडिलं तु प्रकल्पयेत् ॥ वाच
यित्वा द्विजान्स्वस्ति कृत्वा यामी हिरण्मयी ॥ नवे नवस्त्रयुग्मेन वेष्टयित्वा विधानतः ॥
३७ चतुर्भुजा पिंगकेशा पिंगश्मश्रुविलोचना । कर्णिकारमयैः पुष्पैः पूजिता सुमनोहरा ॥
यमस्य पूजनं कर्त्तव्या सुवर्णस्य विशेषतः । वामहस्ते गदां दद्याद्दक्षिणे कालदंडकं ।
ऊर्ध्वं वामे हलं दद्यात्तथा खड्गं च दक्षिणे । यम प्रेतस्य खं आड्यदेवदेव महामने ॥ का
लदंडधरः श्रीमन्त्रिवस्व तनमोस्तु ते ॥ अथ पूजामंत्रः । अथाग्निं प्रतिष्ठाप्य ह रामः
वनं कारयेत्ततः ॥ तिलाज्य तंडुलास्तत्र प्रधान द्रव्यमीरितं ॥ हुतशुष पाज मंत्रेणाजु ३७
हुयाच्च सहस्रकं ॥ रक्षोघ्नांश्च जपेन्मंत्रां द्वादशरयोदिशांतये ॥ ततो स्विष्टकृद्दत्वा
प्रायश्चित्तं तु सर्पिषा । ततो दीपबलिं दत्वा धर्मराजस्य तुष्टये ॥ पूर्णाहुतिं ततो दत्वा ।
ततो दानं समाचरेत् ॥ नीलांबरयुतं चैव महिषं यमवाहनं ॥ आचार्याय ततो दद्यात् ।
सखड्गं च सदक्षिणं । पुष्पमालावृतांगं च स्वर्णशृंगं मनोरमं ॥ तन्मायष्टं रौप्यख

च

खुरं रत्नपुच्छसचामरं ॥ दक्षिणार्थं सुवर्णं दद्याद्धर्मस्य तुष्टये । संदद्याद्विधिवद्विप्रं व
स्त्रालंकारभूषणैः । दानमंत्रः । यमवाहन नमस्तुभ्यं मकालमरणापहा । तुलयलव दानेन
प्रीयतां मे सदा यमः । एवं दत्वा महिषं स्वं च संदद्यात्क्षिजस्ततः ततो भिषेको विहिके तैर्मा
तापित्रोः सगोत्रयोः ॥ अथाचार्याय प्रतिमादानं ॥ यमोसि पुराय रूपोसि पुण्यमूर्ती
निरामय ॥ दानेन तव देवेश विघ्ना नश्यंतु मे सदा ॥ ब्राह्मणान्भोजयित्वा सुखेवं शांतिर्भ
वेद्धि ॥ इति यमपुराणे विषैकृतजनन विधानं ॥ अथ स~~र्वस्वे गर्गसंहितायां~~ सुतत्र
यजातीयावस्त्रयानंतरं विजातीयापत्यजनन शांतिः ॥ शांति सर्वस्वे गर्गसंहितायां सु
तत्रये सुताये स्यात्त्रये वा सुतो यदि । मातापित्रोः कुलस्यापि तदाऽरिष्टं महद्भवेत् ॥
धनहानिर्ज्येष्ठनाशो दुःखं वा सुमहद्भवेत् ॥ तत्र शांतिं प्रकुर्वीत वित्तशाठ्यविवर्जितः
॥ जननेकादशाहे वा द्वादशे हि शुभे दिने ॥ आचार्यमृत्विजो वृत्वा महत्यज्ञपुरःसरं ॥
स्वहवाग्रहयज्ञः स्यात् स्वस्य वित्तानुसारतः ॥ ब्रह्मविष्णुमहेशेंद्र प्रतिमाश्चर्णेताः कृताः ॥

प्रजयेद्दान्यराशिस्थफलशोपरिशांतितः॥ पंचमेकवीरा द्रव्यं पूजयेद्रुद्रसंख्यया॥ पंचम
शाद्रुनिर्दिष्टाद्दन्यपिब्रह्मविष्णुमहेंद्र प्रतिष्ठाकाले शास्त्रतेरो द्रष्टव्याः॥ रुद्रसूक्ता
३८ नि चत्वारि शांतिसूक्तानि सर्वतः॥ रुद्रसूक्तानि मन्त्र शांतिकेस्य शीकृतानि केस्य द्विजः
जपेद्धोमकाले गुरुः समाहितः॥ आचार्यो जुहुयात्तत्र समिदाज्यतिलान्क्रमात्॥ अष्टोत्त
रं सहस्रं वा शतं वा विंशति वैचो देवताभ्यस्तु वर्णादिभ्यो ग्रहपुरःसरम्॥ चतुर्थ्यन्ता
दिभ्यो ब्रह्मादिभ्यः पंचभ्यस्त्वर्थः॥ ब्रह्मादिमंत्रैर्ब्रह्मादिरिंद्रस्यापींद्रमंत्रतः। ततः स्विष्ट राम: ३८
केनं हुत्वा बलिं दद्यात्पूर्णाहुतिं चरेत्॥ अभिषेकं कुटुंबस्य कृत्वाचार्यं पूजयेत्॥ हिरण्यधेनु
रेका च कलिशांद्दिरण्मतः॥ प्रतिमा गुरवे दद्यात् उपस्कारसमन्वितां॥ कोस्याज्यनी
हरां कृत्वा शांतिपाठं तु कारयेत्॥ ब्राह्मणान्भोजयेत् तत्पादीनानां यथाशक्त्यर्पयेत्॥ ए
वं विधिना शांतिं सर्वारिष्टाद्विमुच्यते॥ इति गर्गसंहितोक्तपुत्रत्रयोत्पत्त्यनंतरकन्याया
तान्ये न्याके त्रयोत्पन्नानंतरं पुत्रोत्पत्तौ शांतिः॥ अथ दत्तपुत्रकविधानं॥ प्रयोगपारिजाते॥

एवं द्वेति पुत्रकामेष्ट्यादिनाप्यजातपुत्रस्य पुत्रपरिग्रहविधिरभिधीयते॥ नापुत्रस्य
लोकोस्तीति श्रुत्या अपुत्रस्य मुखं दृष्ट्वा दिनामंडलमीक्षयेदित्यादिस्मृत्या च॥ पुत्रत्वं स्यनिं
दाश्रवणात्॥ तस्मादपुत्रेण पुत्रपरिग्रहः कार्यः॥ अत्र विशेषः कालिकापुत्रत्वस्य निंदा
श्रवणात्॥ तस्मादपुत्रेण पुत्रपरिग्रहः कार्यः। अत्र विशेषः कालिकापुराणे॥ पितुर्गोत्रे
ण यः पुत्रः संस्कृतः पृथिवीपते॥ आचूडांतं न पुत्रः स्यात्पुत्रतां याति चान्यतः॥ अन्यत्र॥
अन्यस्या चूडोपनयसंस्कारा निजगोत्रेण वै कृताः॥ दत्ताद्यास्तनयास्ते स्युरन्यथा दास
उच्यते॥ ऊर्ध्वं तु पंचमाद्वर्षान्न दत्ताद्याः सुता नृपते। तस्माच्चूडानंतरं सुतग्रहणोऽसंविदाम
हतोपि॥ गोत्ररिक्थे जनयितुर्न भजेद्द्विमः सुतः। गोत्ररिक्थानुगः पिंडो व्यपैति ददतः स्व
स्वधेति मनुक्तानेकगोत्रादिनिवृत्तिर्नास्ति विरुद्धत्वमयो॥ सुत इति गौतमेनोभयपुत्रत्वो
क्तेः अपस्यपादाः स उच्यत इति पुराणोक्तेश्च संग्रहग्रंथकारः शौनकेन प्रदर्शितः॥ शौनको
हं प्रवक्ष्यामि पुत्रसंग्रहमुत्तमं। अपुत्रो मृतपुत्रो वा पुत्रार्थं समुपोष्य च॥ वाससी कुं

लेदत्वा उष्णीषं चांगुलीयकं॥ आदाय धर्मसंयुक्तं वैष्णवं वेदपारगं॥ बर्हिः कुशमयं चैव पा
रामः ३८ लाशं चेध्ममेव च॥ राज्ञो नाहूय बंधूंश्च ज्ञातीन्नाहूय सन्नमः। देशस्वामिने माहूय मधुप
र्कादिनार्चयेत्॥ ॥ वंधनत्रेन संमोज्य ब्राह्मणांश्च विशेषतः। अन्वाधानादि यत्तंत्रं हो
मांतं ज्योत्य वनीतकं॥ दातुः समक्षं गत्वा तु पुत्रं देहीति याचयेत्॥ दाने समर्थो दाता स्मै यय
ज्ञेमेति पंचभिः॥ पत्न्यतां सुपविष्टानां समक्षं पुत्रमर्पयेत्॥ देवस्यत्वेति मंत्रेण हस्ताभ्यां प
रिगृह्य च॥ अंगादंगेत्यृचं जप्त्वा आघ्राय शिशुमूर्द्धनि॥ कुक्ष्यां वस्त्तु॥ अंगादंगात्संभव
सि हृदयादधि जायसे लंकृत्याद्युत्र छायावहं सुतं॥ नृत्यगीतैश्च वाद्यैश्च स्वस्तिशब्दैश्च सं रामः ३८
युतं॥ गृहमध्ये तमाधाय चरुं चैव तु हुयात्ततः। यस्त्वा हृदेत्यृचा चैव तुभ्यमग्र इत्येकया॥
सोमोददित्येताभिः प्रत्यृचं पंचभिस्तथा॥ ततः स्विष्टकृतं हुत्वा होमशेषं समापयेत्॥ ब्रा
ह्मणानां सपिंडेषु कर्तव्यः पुत्रसंग्रहः॥ तदभावे सपिंडेषु अन्यत्र तु न कारयेत्॥ क्षत्रिया
णां स्वजातौ वा गुरुगोत्रसमेपि वा॥ वैश्यानां वैश्यजातेषु शूद्राणां शूद्रजातिषु॥ सर्वेषां चै

व वर्णानां ज्ञातिष्वेव च नान्यथा॥ दौहित्रं भागिनेयं वा शूद्राणां च पतिर्दिये॥ नैकपुत्रेण क
र्तव्यं पुत्रदानं कदाचन॥ बहुपुत्रेण कर्तव्यं पुत्रदानं प्रयत्नतः॥ दक्षिणां गुरवे दद्यात् यथा
शक्ति द्विजोत्तमः॥ नृपो राष्ट्रार्थमेवापि वैश्यो वित्तशतं यां॥ शूद्रः सर्वस्वमेवापि अशक्तो श्रद्ध
या बलमिति॥ राज्यादि दानं तु कुमार पित्र्रतिकेचित्॥ परितोषकत्वात्॥ दौहित्रो भागिने
यश्च शूद्रैश्च क्रियते सुतः॥ ब्राह्मणादित्रये नास्ति भागिनेयः सुतः क्वचित्॥ इति माधव वसि
ष्ठस्मृतौ॥ शौनकस्मृतौ शुक्लशोणितसंभवः पुरुषो मातापितृनिमित्तकस्तस्य प्रदानविक्रयपरित्या
गेषु मातापितरौ प्रभवतो न त्वेकं पुत्रं दद्यात्॥ प्रतिगृह्णीयाद्वा स हि संतानाय पूर्वेषाम्॥ न
तु स्त्री पुत्रं दद्यात्प्रतिगृह्णीयाद्वान्यत्रानुज्ञानाद्भर्तुः पुत्रं प्रतिग्रहीष्यन् बंधूनाहूय राजनि
चावेद्य निवेशनमध्ये लौकिकाग्निं प्रतिष्ठाप्याज्यभागांते व्याहृति चतुष्टयं हुत्वादूरेबां
वसं धवं बंधुसन्निकृष्टमेव प्रतिगृह्णीयात्॥ संदेहे चोत्पन्ने दूरे बांधवं शूद्रमिव स्थापयेत्॥ वि
ज्ञायते ह्येकेन च बहूंस्त्रायत इति॥ तस्मिंश्च प्रतिगृहीते यद्यौरसः पुत्र उत्पद्येत चतुर्थभा

गभागीत्यादिति। अदूरे बांधवमित्यादेरयमर्थः। अदूरे चासौ बांधवश्चेत्यदूरबांधवः। अत्र
यमं नावक्ष्यति संभवे संन्निकृष्टो बंधुरेव पुत्रीकार्यः। तदभावे व्यवहितो बंधुः। तदभावे बंधुव्य
४० तिरिक्तोपि। तस्य च कुलशीलादिविषयकसंदेहे उत्पन्ने सति दूरं बांधवं बंधुभ्यो दूरदेशाव
स्थितिमासंदेहनिवृत्तेः स्थापयेन्नु। तस्मात्प्रतिग्रहेणा पुत्रमजं येदिति श्रुतिमुपन्यस्याति
विज्ञायते ह्येकेन बहूनिति। एकेन पुत्रेण बहून्पुरुषांस्त्रायास्तारयतेत्यर्थः।। चतुर्थभागभा
भागीगृहीतपुत्रविषयं उत्पन्ने त्वौरसे पुत्रे चतुर्थांशहराः सुताः। सवर्णा असवर्णास्तु ग्रा राम:
साच्छादनभागिन इति कात्यायनोक्तेः। मध्यांतरे तु दत्तपुत्रे गृहीते तु कदाचिदौरसो भवेत्।। ४०
पितुर्वित्तस्य सर्वस्य भवेतां समभागिनौ।। इदं तु दत्तपुत्रस्य गुणवत्तरत्वे द्रष्टव्यं। दत्तस्य गु
णवत्तरत्वे समो भाग इति हारीतस्मरणात्।। अविधाय विधानं यो परिगृह्णाति नंदनं
। विवाहविधिमात्रं न कुर्याच्च धनभागिनं।। तस्मिंजाते सुते दत्ते। कृते स्वति विधानके। तत्स्व
त्वस्यैव सर्वस्य स स्वामी पितुरंजसा।। जातेष्वन्येषु पुत्रेषु दत्तपुत्रपरिग्रहात्।। पिताचे

द्विभजेद्वित्तं नैवासौ ज्येष्ठभाग्भवेदिति दत्तपुत्रकविधानं।। अथ खट्वारोहणविधानं।। तच्च
नामकरणानंतरं ज्योतिःशास्त्रे विहितं।। तथा च बृहस्पतिः। खट्वारोहस्तु कर्त्तव्यो दशमे द्वा
दशेपि वा।। षोडशे दिवसे वापि द्वात्रिंशे दिवसेपि वा।। दशमेतीते एकादशेहि दो।। भविष्य
पुराणे।। अभीष्टे पुण्यदिवसे च कृतारात्र्युक्तान्विते।। मृदुध्रुवक्षिप्रभेषु माता वा कुलयोषि
तः।। योगशायिहरिं स्मृत्वा प्राक्शीर्षं विन्यसेच्छिशुमिति।। मदापिलद्दणा। मुकुंदश्रीपतिना।।
रोहिण्युत्तरभं स्थिरं गिरिशमूलैंद्रोरगं दारुणं हित्वा प्रांचा अर्कदिने ज्ञ पुष्यमनलं ऋग्मीनु
साधारणं।। उग्रं पूर्वमिथ्यांतकं मृदुमृगं त्वाष्ट्रं यमेत्रं चराविष्ठुचातिसतोडु न स्वदितयः
कुर्युः स्वसंज्ञाफलमिति।। आपादिलाऽशायने पुंसो द्वादशे दिवसः शुभं।। त्रयोदशस्तु क
न्याया न नक्षत्रविचारतोपि प्रयोगसारे। इति कर्त्तव्यताविशेषस्तु शिष्टाचारतोवगंत
व्यः। इति खट्वारोहणविधानं।। अथ दुग्धपानविधानं श्रीधरीये। एकविंशे वासरे च द्विती
ये जन्मर्क्षे वा शुभदिनेऽनुकूले शंखदुग्धं संनिदध्यात्। शिशूनां वक्त्रे धात्री कर्मं विधायेति।।

अथस्यार्थः॥ जातस्य बालस्य जन्मदिवसादेकत्रिंशद्दिवसेन दत्तलाभे द्वितीयजन्मनक्षत्रादौ
पयःपानं कारयितव्यं। तथा च श्रीनृसिंहः॥ एकत्रिंशद्दिने चैव पयः शंखेन पाययेत्॥ अ
४१ न्नप्राशननक्षत्रदिवसोदयराशिषु। नाडीत्रे मासि संपूर्ते जाते तु विशेषतः॥ मासांते
दुग्धपानं स्यात्तस्मात्काले शुभे भने॥ उत्तरात्रयरूयेलोचलाश्चैव हस्तवसवाः। पौष्णाश्वि
नीमघास्वातीवरुणाः। दितिजीवनं रोहिणीयें दंवमेत्रास्य दुग्धपानेऽश्विशोः शुभाः॥ षष्ठी
रिक्ताष्टमीदर्शा वर्ज्या विष्टिः स्थिरा तिथिः च। वर्ज्यास्त्वशुभयोगाश्च हस्तांके चांत्यत्रिभागकः रामः
॥ अथो मुखानि वर्ज्यानि मीनाजालिगृहाणि च॥ जीवशुक्रेंदुसौम्यानां वारवर्गोदये ४१
क्षणाः॥ शुभानां राशयः श्रेष्ठाः विशेषाः शुभकर्मणि॥ चंद्रे सद्गुणसंयुक्ते शुभग्रहदृष्टा
युते॥ स्वोच्चमित्रस्ववर्गस्थे शुक्रे वाति बलान्विते॥ पारावतगते वापि सुरेज्ये रगतेऽपि वा
॥ ऐरावतगते वापि दुग्धपानं शुभावहमिति॥ पारावतादीनां लक्षणं उक्तं ज्योतिःशा
स्त्रे व्युत्क्रमेणोक्तं॥ चतुर्भिः पंचभिः षड्भिः स्थितिवर्गैः शुभान्वितैः॥ ऐरावत पारावत सुरेश

पुष्कराः क्रमात्॥ अत्र चतुर्भिरित्यादि लग्नहोरादिषड्वर्गमध्ये शुभान्वितैः शुभग्रहान्वितैर
रित्यर्थः॥ इति प्रयोगपारिजाते केवलस्य दुग्धपानविधानं॥ अथ तांबूलभक्षणं॥ रतिर
हस्ये॥ सार्द्धमासद्वये दद्यात्तांबूलं प्रथमं शिशोः॥ कर्पूरादिकसंमिश्रं विलासाय हिताय
च॥ मूलार्कचित्राश्वकरतिष्यहरीदुमैत्रपुष्पौस्नेनधाम्नगोशिरोदितिवासवेषु॥ अर्केंदुजीव
भृगुबोधनवासरे पुतांबूलभक्षणविधिर्मुनिभिः प्रदिष्ट इति॥ अथ जन्मदिने च कर्त्तव्य
विधानं॥ शौनकीये॥ अथ स्वजन्मनक्षत्रे स्नातः॥ शुक्लांबरो नृपः॥ कृतकौतुकबंधश्च
सर्वाभरणभूषितः॥ नृपमहणं तस्यावश्यकं स्यात्॥ तेनान्यस्यापि भवति॥ आयु
र्वृद्धिहेतुत्वात्॥ नक्षत्रदेवतापूजां कुर्यात् गुरुसमन्वितः॥ आचार्येणैव होतव्यो हो
मः सर्वत्र कर्मणि॥ स्थंडिलाद्याज्यभागांते कृत्वा स्ववर्गं यथाक्रमं॥ दूर्वां घृतेनाक्तां [illegible]
[illegible] जुहुयादष्टोत्तरशताहुतीः॥ यद्देवताकं नक्षत्रं मंत्रस्तद्देवतः स्मृतः॥ ततः
स्विष्टकृतं सर्वं होमशेषं समापयेत्॥ गोभूहिरण्यवस्त्राद्यै ब्राह्मणांस्तोषयेत्ततः॥

तस्मिन्नहनि सर्वत्र देवतायतनानि चाद्भुः॥ स्थितान्सर्वबद्धांश्च मोचयेन्नृपतिस्ततः॥ द्विजा
न्सर्वान्नियोज्य च्चतस्मिन्नहनि सत्तमान्॥ पूजयित्वा विधानेन पूजितव्याः स्वबांधवाः॥ नहि स्था
४२ न्सर्वमन्नानि तद्दहस्तु विशेषतः॥ एवं संमोचरन्राजा सुखी भवति सर्वदेति शेषः॥ स्वकीये जन्म
नक्षत्रके कर्त्तव्यविधानं॥ अथ जन्ममासादि कर्त्तव्यविधानं॥ विधानमाह कात्यायनः॥ जन्ममासे
जन्मतिथौ जन्मर्क्षे जन्मलग्नके॥ विधानं तु प्रकर्त्तव्यं विदुषायुर्विवृद्धये॥ यस्मिन्मासे तु यो
देवस्तमादौ पूजयेन्नरः॥ मासचौदेस्तु हृषीकेशोऽनंतोऽच्युतस्त्रिविक्रमः॥ वैकुंठोऽथ जनार्दनः॥ उपेन्द्रो राम:
यज्ञपुरुषो वासुदेवस्तथा हरिः॥ योगीशः पुंडरीकाक्षो मासनामान्यनुक्रमात्॥ इति मा ४२
सादिक्रमस्तु चैत्रादि मार्गशीर्षादि वा॥ गतोऽत्र प्रमुखो देवा दुर्गाद्या मातरस्तथा॥ पूज्या
स्तल्लिंगकैर्मंत्रैर्धूपपुष्पादिभिस्तथा॥ सप्तधान्यमये राशौ स्थापयेत्पुष्ठमुत्तमं॥ प्रियं
गवो माषाढक्यश्चणकास्तिलाः॥ व्रीहयश्च समुद्दिष्टं धान्यानां सप्तकं बुधैः॥ पीठंत
त्रोपरिन्यस्य वस्त्रयुग्ममुत्तमं॥ कृत्वाग्निं व्याहृतीभिश्च होमशेषं समाप्य च॥ अभिषेकं

ततः कुर्यादाचार्यं पूजयेदथ॥ ततस्तु भोजयेद्विद्वान्ब्राह्मणान्वेदपारगान्॥ एवं कृ
ते विधानेऽस्मिन्विघ्नः कोऽपि न जायते॥ इति विधानमालोके जन्ममासादि कर्त्तव्यविधा
नं॥ अथ स्त्रीस्तन्याक्षरताहरविधानं॥ महाराणीवोक्षीरं तु छात्तिया नारी पूर्वजन्मनि
सुव्रता॥ जन्मांतरे तु तस्यां वै क्षीरं न क्षरते स्तनौ॥ क्षीरान्नं भोजयेद्विप्रान्सज्यं समन
धुमंडकं॥ विप्रानिति बहुवचनात्त्रयो वर्यं भोजनीयाः॥ अनुलिंपश्च तेनैव तद्विप्रा
न्नेन भक्तितः॥ विप्रपादोदकैश्चापि स्नापयेत्कुचमंडलं॥ सुरामांसद्वेषोऽथ हत्वा पूपान्नं
गंधपुष्पकैः॥ तेभ्यश्च बलिं दद्यात् तान्यत्र च संस्तुति॥ मधुश्च नवनीतश्च बैउमा विं
लोद्यचिंतकाः॥ ॥ एतेमध्यश्च रात्रिश्च एतानां पंच कोविदाः॥ अथ सुरादीनि ब्रा
ह्मणादिभिरनिषिद्धान्येव ग्राह्याणि॥ इति महाराणीवोचं स्त्रीस्तन्याक्षरताहरविधा
नं॥ अथ निष्क्रमणविधानं॥ तत्र बृहस्पतिः॥ अथ निष्क्रमणं नाम गृहान्प्रथमनिर्ग
मः॥ अकृतायां क्रियायां स्यादायुः श्रीनाशनं शिशोः॥ कृते संपद्यिवृद्धिः स्यादायुर्वर्द्धनमेव चेति॥

॥ श्रीधरीये पि ॥ मासे तृतीये दिवसे दिने र्कं शिशुं चतुर्थे शशिनं च येन्तु ॥ विलोकयित्वाग्निवि
धि प्रयुक्ते काले गृहान्निष्क्रमणं विदध्यादिति ॥ तथार्केन्दू त्रिकोणगाः सौम्याः पापाः
४३ षष्ठत्रिलाभगाः । उपनिष्क्रमणे शस्ताः मातुलो वा हरेच्छिशुमिति । तथा च तुर्थे मासि पु
ण्यर्क्षे शुक्ले निष्क्रमणं नयेत् ॥ स्नातं स्वलंकृतं चाभिलितस्य स्यय नं शिशुं ॥ आदाय गेहा
क्रम्य गच्छेयुर्देवतालयं चाभ्यर्च्य देवताः सम्यगाशिषो वाचयेद्द्विजा ॥ कृत्वा प्रदक्षिणं
गेहं आनयेति ततः स्वकं । मातृष्वसृगृहं गत्वा यातुलादेगृहं नयेत् । तदाशीर्वचनाक्ष रामः
मङ्गलाद्यादिदर्पणाः पूर्णकलशाः कन्याः सुमनसोऽक्षतां ॥ दीपमालाध्वजं लाजाः तं प्रोम ४३
क्तं चाष्टमंगलं ॥ सुमनसः पुष्पाणि ॥ विवाहे निष्क्रमे काम्ये च द्वौ प्रवेशे प्रयाणके । उत्सवेषु
च यात्रायां प्रशस्तं चाष्टमंगलमिति ॥ अत्र विशेषमाह श्रीधरीये बृहस्पतिः चतुर
स्रेऽशुचौ देशे गोमयेनोपलिप्ते । धान्यपुंजे समासीनं बालं बालाम थापिवा । अर्चये
येद्गंधपुष्पाद्यैस्तस्मिन्नर्द्धिविलाटके । तस्य रक्षां ततः कृत्वा मृतसंजीविनीं जपेत् ॥ सं

जीविनी त्र्यंबकमंत्रः । तत्रार्चयेत्कृशानं नमस्ते शानन्तर्थे वृचा । मद्वैविचित्रे सफलैः । शि
शुनभ्यर्चयेद्धवरति । विहस्य मोत्तरे नु ॥ चतुर्थे मासि कर्तव्यं शिशोर्निष्क्रमणं गृहात् ॥
गी॥श॥ द्दिमित्क्रानां दिशां नत्र तथार्च प्रार्कयोर्द्विजाः । पूजने वासुदे ॥ वस्य गगनस्य च कारयेत्
॥ तेन स्यंदनकेनो ध्याकी वालमादाय पूजितं । विनिःकाशयेदुहाद्वै स्वपुरायाहृनिस्व
नैः । नतत्र स्वपटेन्मंत्र द्वयं शामनियमोत्थं । चंद्रार्कायो दिगीशानां दिशां च गगने
स्य च । निःक्षेपार्थमिमं दमिते मे रक्षंतु सर्वदा ॥ अप्रमत्तं प्रमत्तं वा दिवारात्राव थापि वा
॥ रक्षंतु सततं सर्वे देवाः शक्रपुरोगमाः । श्रीरामचिंतनं वा नां च द्विजानां सुहृदां तथा
। तदानुरूजाकर्त्तव्या गीतन्त्रतैः सदो । कृष्ण वह्नि ॥ अथ प्रयोगः । जननाच्चतुर्थे मा
सि ममकुमारस्यायुः श्रीवृद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थं निष्क्रमणाख्यं कर्मकि
रिष्य इति संकल्प्य स्वस्ति वाचनाभ्युदयिके कृत्वाऽइन्द्रादि दिक्पालानां प्राच्यादि दिशां
चंद्रार्कयोर्वासुदेवगगनानां च यथाक्रमेण पूजां कृत्वा आहरानीज यित्वा सायं संध्याकृ

त्वा शिशुं स्नापयित्वाग्निचंद्रयोः तेषां दर्शनं कारयित्वा मातुलेन धात्र्या वा शिशुं वाहयित्वा वे
दतूर्यघोषपुरःसरं शकुनादिमंगलसूक्तं पठन् कुलाग्निं गत्वा चं प्राकर्योरिति मंत्रद्वय
४४ मुच्चार्य देवालयं गत्वा देवं संपूज्य तत्र गोमयानुलिप्ते देशे धान्यं निधाय तत्र शिशुं शा
यित्वा रक्षां कुर्यात्॥ त्र्यंबकं वसिष्ठो रुद्रोनुष्टुप्॥ मंत्रं जप्त्वा विप्रः स्वाकुमारस्य ललाटे र
क्षां कृत्वा॥ मातुलो धात्री वा स्वनगरं नीत्वा स्वगृहं गच्छेदिति निष्क्रमणविधानं॥ अथ पंच
मे मासि बालकोपवेशनविधानं॥ प्रयोगपारिजाते परशुरामं प्रसादः॥ पुष्करः॥ पंचमे च
तथा मासि भूमौ तमुपवेशयेत्॥ तत्र सर्वग्रहाः शस्ताः॥ सौम्या रोमविशेषतः॥ तिथिं चि रामः
वर्जयेद्रिक्तां पर्वसंक्रांतिं अष्टमीं॥ उत्तरा चित्तयं सौम्य पुष्यहस्तं शुक्र देवतं॥ प्राजाप ४४
त्यं च रुद्रं च शस्तमाश्विनमित्रमं॥ वीराहे पूजयेद्देवं पृथिवीं च तथा द्विजः॥ पूजनं स्व
वे[illegible]त्वा गुरोर्देवद्विजन्मनां॥ भूभागमुपलिप्याथ॥ ॥ कृत्वा [illegible] मंडलं॥ शंख
पुण्याहशब्देन भूमौ तमुपवेशयेत्॥ अथ शंखशब्दैः सर्ववाद्योपलक्षणार्थः॥ तत

दुत्कं भवति॥ स्वस्तिवाचनं कृत्वा मंगलतूर्यादिध्वनौ क्रियमाणे बालं धरण्यामुपवेशये
त्॥ तत्र मंत्रान्नाहस्पतिः॥ मंत्रश्च भूमवेशमन्त्रो निगद्यते॥ रक्षैनं वसुधे देवि
सदा सर्वगतं शुभे॥ आयुःप्रमाणं सकलं निक्षिप स्व हरिप्रिये॥ अचिरादायुषस्त
स्य ये केचित्परिपंथिनः॥ जीवितारोग्यवित्तेषु निर्दहस्वाचिरेण तान्॥ धरण्याशेषभू
तानां माता त्वमधिका ह्यसि॥ अजरा चाप्रमेया च सर्वभूतनमस्कृते॥ त्वमेवाशेष
जगतां प्रतिष्ठा चाश्रया ह्यसि॥ कुमारं पाहि मातस्त्वं ब्रह्मा तदनुमन्यतामिति॥ ततः
कर्तव्यमाहेरन्नं॥ तस्योपवेशनं कृत्वा भूमौ ब्राह्मणभोजनं॥ ततः कुर्यात्ततः का
र्यमुत्सवं पूर्वविद्द्विजेति॥ उत्सवो नीराजनादि॥ एतद्द्वयं कुमार्या अपि कार्यं ब्रह्म कृत
त्वाद्बालरक्षणाच्च॥ इति बालोपवेशनविधानं॥ अथ कर्णवेधविधानं॥ तत्रैव॥
श्रीधरीये॥ मासे षष्ठे सप्तमे वाष्टमे वा कर्णौ विध्यो द्वादशे षोडशे ह्नि॥ मध्ये चाह्नः पूर्व
भागे न रात्रौ नक्षत्रे द्वे द्वे तिथि वर्जयित्वा॥ बृहस्पतिरपि॥ जन्मतो दशमे वाह्नि द्वादशे वा

यथोक्ते॥ सप्तमे मासि वा कुर्याद्दशमे मासि पूर्वतः॥ गर्गः॥ मासे षष्ठे सप्तमे वाप्यष्ट
मे मासे वा चैत्रे वा फाल्गुनेपि वा॥ केशवार्कः॥ कर्णवेधं प्रशंसन्ति शुक्लपक्षे शुभे दिने॥ अत्र जन्म
४५ मासो निषिद्धः॥ व्यासः॥ यो जन्ममासे क्षुरकर्मयात्रां कर्णस्य वेधं कुरुते तु मोहात्॥ स
उः स्वरोगी धनपुत्रनाशं प्राप्नोति शोकं च समस्तमेतत्॥ नक्षत्राद्याह श्रीधरः॥ हरिहि
रकरचित्रासौम्यपौष्णोत्तरादितिवसुपुष्याश्विसिंहवर्ज्ये सुलग्ने। शशिबुधगुरुको
व्यानां दिने पर्वरिक्तारहिततिथिषु देहे घटे कर्णवेधः॥ सुनक्षत्रे शुभे चंद्रे सुस्थाशी रामः
र्षोदये शुभे। दिनच्छिद्रव्यतीपातविष्टिवैधृतिवर्जिते॥ शिशोरजातदंतस्य मातुः स्तं ४५
नसपरिग्रहः॥ सोपि को वेधयेत्कर्णौ सूच्या द्विगुणसूत्रया॥ शातकुंभमयी सूची वे
धने तु शुभप्रदा। राजती वायसी वापि यथा विभवतः॥ शुभा॥ सुमंतः॥ प्रांगणे रम्ये
शुचौ देशे वरे रवेः। संनिधौ वेधयेत्कर्णौ स्त्रीपुंसोर्वामदक्षिणौ॥ क्रमेण पूर्वं वेध्यौ
द्वौ शिशोरायुष्यवर्द्धनौ॥ अपराणे वपुकं॥ शुक्लपक्षस्य समायुक्तेनाभ्रसूच्या वेधयेत्॥

वेध्यावृत्तीनक्षत्रे स्यात्ततो दुःखहारिणी॥ रोपणार्थं सुध्यवर्तीनालसंपत्तिमाप्नुयात्॥ एवं छि
द्रे च भिन्ने च हित्वा योज्यानि योजयेत्॥ विष्णुधर्मोत्तरे पुष्करः॥ शिशोरेवाथ कर्तव्यं कर्ण
वेधं यथा शृणु॥ पूर्वाह्णे पूजनं कृत्वा केशवस्य हरस्य च॥ ब्राह्मणांश्चंद्रसूर्याग्न्यां दिगी
शानां तथैव च। नासत्ययोः सरस्वत्या ब्राह्मणानां गवां तथा॥ गुरूणां मंडलं कृत्वा त
त्र दत्त्वा वरासनं॥ तत्रोपवेशयेत्तत्र धात्रीं शुक्लांबरां तथा। अलंकृतं तदुत्संगे बा
लं धृत्वा तु सान्त्विता॥ धृतस्य निश्चलं सम्यगलक्तकरसांकिते॥ विध्येद्दैवकृते छिद्रे
सकृद्दैवात्र लाघवात्॥ प्राग्दक्षिणं कुमारस्य भिषग्वामे तु योषितः॥ शिशोर्विवर्धने का
यं यावदामरणक्षमो। कर्णवेधदिने विप्राः सांवत्सरचिकित्सकौ। पूज्याश्च विविधा
नार्यः सुहृदश्च तथा द्विजा इति। अत्र पुरुषकर्णरंध्रवृद्धिविषये विशेषमाह हेमा
द्रौ देवलः॥ कर्णरंध्रे रवेश्छाया न विशेदग्रजन्मनः॥ तं दृष्ट्वा विलयं यांति पुण्यौघा
श्च पुरातनाः॥ तन्नामाणां प्रसंगांतरेण दृष्टांशवः॥ अंगुष्ठमात्रसुषिरे कर्णे न भवतो

यदि॥ तस्मै श्रद्धं न दातव्यं यदि चेदासुरं भवेत्। लंबकर्णाचिं निबध्नाति शालंकायन: अ
विद्धकर्णो यस्मुक्तं लंबकर्णोस्तु यैव च॥ दग्धकर्णो श्रयमुक्तं तद्रक्षांसि गच्छति॥
४६ तत्र मासविशेषमाह गुरु:। इत्यचलिखितौ। हनुमल्लादय: कर्णौ लिंबौ तु परिकीर्तितौ
॥ द्व्यंगुलौ त्र्यंगुलौ शस्तौ इति शातातपो ब्रवीदिति। अन्यो विशेषो ग्रन्थान्तरा
देरगंतव्य॥ इति प्रयोगपारिजातोक्तं कर्णवेध: विधानं॥ अथान्नप्राशनं॥ पारिजा
ते नारद:॥ जन्मतो मासि षष्ठे स्यात्सौरेणोत्माशनं परं। तदभावेऽष्टमे मासि नवमे द
शमे पि वा॥ द्वादशे वापि कुर्वीत प्रथमान्नाशनं परं। संवत्सरे वा संपूर्णे केचिदि
च्छंति पंडिता:॥ मदनरत्ने लोगाक्षि:। षष्ठेन्नप्राशनं जातेषु दंतेषु वेति। शंख:। संव
त्सरेन्नप्राशवमर्धसंवत्सरे वेति॥ नारद:॥ षष्ठे वाप्यष्टमे मासि पुंसां स्त्रीणां तु
पंचमे। सप्तमे मासि वा कार्यं नवान्नप्राशनं शुभं॥ रिक्तां दिनक्षयं नंदां द्वादशीमष्
टमीममां॥ त्यक्त्वा ज्योतिर्यथा: प्रोक्ता सित लीन जवासरा:॥ चंद्रवारं प्रशंसतिहि राम: ४६

छ्रोचायत्रिकं विना॥ श्रीधर:॥ आदित्यतिष्यवासुसौम्यकरानिलाश्विचित्राजविष्णु
वरुणोत्तरपौष्णमित्र:॥ वालान्नभोजनविधौ दृशमैर्विसृष्टे द्विं द्रां विहाय नवमी
तिथय: शुभा: स्यु:॥ वसिष्ठ:॥ वालान्नभुक्तौ व्रतबंधने च राज्याभिषेके खलु जन्मधि
ष्ण्यं॥ शुभं त्वनिष्टं स्यत्तन्नविना हि सीमंतयात्रादिषु मंगलेषु॥ मार्कंडेय:॥ देवतापुर
तस्तस्य धात्र्युत्संगगतस्य च। अलंकृतस्य दातव्यमन्नं पात्रे सकांचने॥ मध्वाज्य
दधिसंयुक्तं प्राशयेत्पायसं तु वेति॥ षष्ठे मासि बालस्यान्नप्राशनं कृत्वा जीविका
परीक्षितव्या॥ तत्र मार्कंडेय:॥ अग्रतोथ प्रविन्यस्य शिल्पभांडानि सर्वश:। शस्त्रा
णि चैव वस्त्राणि तत: पश्येत्तु लक्षणं॥ प्रथमं यत्स्पृशेद्बालस्ततो भांडं स्वयं धानं॥ अ
थ शिशुरक्षाविधानं॥ तत्रैव काश्यपसंहितायां॥ शिशुसंरक्षणार्थाय शिशुगृहे हृनि
वारिणी॥ रक्षां संध्यासु कुर्वीत निंबसर्षप— जनै:। फलीकरणसंमिश्रै: करंजैर
नलोकनं। वंचां द्वारप्रदेशेषु बालग्रहविमुक्तये॥ वासुदेवो जगन्नाथ:। पूतनाभंज

४७ रामः ४७

नोहरिः। रक्षतां त्वरितो बालं मुंच मुंच कुमारकं।। कृष्ण रक्ष शिशुं शश्वन्मधुकैटभमर्द्दन।। प्रातः संगवमध्याह्नसायाह्नेषु च सन्ध्ययोः। महानिशि सदा रक्ष कंसारिष्टनिषूदन।। यक्षोरगपिशाचांश्च ग्रहान्मातृग्रहानपि। बालग्रहान्विशेषेण छिंधि छिंधि महाभयात्।। त्राहि त्राहि हरे नित्यं त्वद्रक्षारक्षितं शिशुं। इति मंत्रमिमं ... तेन मस्तके।। शिरोललाटे दृगंगेषु रक्षां कुर्याद्यथाविधि। मंत्रसंरक्षणादेव शिशुः संवर्द्धतेन्वहमिति।। अथ यदि बालकस्य प्रमादाद्भुवि पतनादिना भीतिरुपजायते तदा पार्थिवं रजः परिगृह्य शिशुशिरः प्रदक्षिणामावर्त्य विष्णुस्त्वां पूर्वतः पात्वित्यादिभिर्मंत्रैः रक्षां कुर्यात्। एवंच रक्षाविधिः शकटभंजनसमये नंदगोपेन भीतोयं शिशुरिति बुद्ध्या कृष्णस्य कृतः।। तच्चोक्तं हरिवंशे। नंदोपि मेने मामारोप्य भरेकं परिगृह्य च।। शिरः प्रदक्षिणां कुर्वन्मंत्रमेनं जजाप ह।। विष्णुस्त्वां पूर्वतः पातु रुद्रो रक्षतु दक्षिणे।। ब्रह्मा च पश्चिमं पायाच्छेषो रक्षत्वथोत्तरे।। उपरिष्टात्तथा सूर्यः पायाच्चाधश्च वासुकिः। पायादूर्ध्वमधो वर्मशिखाः

कोष्ठा समीरणः।। स्वस्तिं करोतु भगवान्विधाता चक्री वृषभध्वजः।। गावो रक्षंतु सर्वत्र भूमिपास्तु सदा शिशुं।। एवं वं मुक्तो नंदस्तु कृष्णस्य सर्वतः।। एवं मंत्रो हि बालानां रक्षायै परिकीर्तित इति।। इति विधानपारिजाते हरिवंशोक्तं बालरक्षणविधानं।। अथ बालस्य दंतसंघर्षदोषे तत्परिहारविधानं।। मार्कंडेयपुराणे दत्तात्रेयः। प्रसुप्तानां बालानां दाशनानुस्थितः।। करोति संघर्षमिति चिकीर्षुर्दुःसहागमं। तस्योपशमने कार्यं सुतस्य सिद्धार्थसर्षपैः।। शयनस्योपरि क्षिप्ते मासं च दशनोपरि।। मासं मासपर्यंतमिस्यर्षपा सितसर्षपैः।। शयनस्योपरि क्षिप्तैः ... सुवर्चलौ च वचयिरना नात्तथा सत्शास्त्रकीर्तनात्।। उद्धर्कटककरवंजौ ... विधानं दिधारणादिति।। इति विधानपारिजाते प्रयोगपारिजातोक्तानि शिशुरक्षणविधानानि।। अथ वायोद्वृत्तिविधानं। श्रीधरीये।। वर्षांते जन्मदिवसे रवि मासस्कदे संस्नाप्य शांतिकरकर्मचिराय कृत्वा।। आबध्यं हेमकटिसूत्रमथानुकूले लग्ने शिशोर्नतरांबरयोगमाहुः।। अपस्यायमर्थः।। सोरेणाब्दांतं जन्मदिवसे शिशुं संस्नाप्य शांत्यनंतरं।। अथवा

धारुमस्तकं तु स्यात्पावनुकूलके। नवस्त्रोमांबरादीनि यथार्हं धारयेत्तदा॥ हस्तादिभत
नक्षत्राण्युक्तानि स्युत्तराणि च॥ वसुपौष्णादितीपुष्यवाजिभानि शुभानि तु॥ रिक्तापर्वा
४८ ष्टमीश्चैव षष्ठीं द्वादशीं चान्यत्रिकं विना॥ शकुन्यादीनि विष्टिं च वर्ज्या योगाः शुभेतराः॥ शुभा नो
वारवर्गाश्च राशयश्च धनुर्विना॥ अष्टानेष्टास्तथा शेषा मकरो मध्यमो भवेत्॥ लग्ने सर्वे
शुभाः श्रेष्ठास्तथा केंद्रत्रिकोणयोः॥ चंद्रः शुभप्रदो ज्ञेयो योद्याद्वशाष्टमभाद्विना॥ पापा
स्त्रिलाभषष्ठस्थाः शुभा वस्त्रादिधारणे॥ उच्चमित्रस्ववर्गेषु शुभे केंद्रत्रिकोणगे॥ व नाम: ४८
स्त्रवाहनशस्त्रादि भूषणानि सुखंप्रदः॥ सकृणास्यानि शाना यो कुर्यात्तद्योमनेदिनो
॥नद्यादिगमने चैव तथा देवादिदर्शने॥ शिशोर्लीलादि चान्यच्च वस्त्रधारणवद्वेदि
ति मुहूर्त्तशुद्धिर्ज्ञेया॥ इदं तु प्रत्यब्दं कार्यमित्याह गर्गः॥ यस्मिन्दिने सवितरि तन्नक्ष
त्रदिने भवेत्॥ प्रत्यब्दांते च नक्षत्रे विधिं वक्ष्ये न्द्रणोपरं॥ येनायुर्वर्धते नित्यं बलं तेज
सुखं सदा॥ पूर्वं जन्मदिना प्रात्रौ कृत्वा कौतुकबंधनं॥ कृत्वा शांत्युदकं चैव बालं ते

नाभिषेचयेत्॥ गृहशांतिं समाप्यैवं नक्षत्राधिपदर्शनं॥ आयुष्यहोमं च कृत्वा च दिगी
शान्नर्चयेद्बुधः। देवीश्च वेदिकान्विप्रान्गुरूंश्च बंधुसुहृज्जनान्॥ प्रणम्य पूजयेद्दिद्वा
नां धमाल्यानुलेपनैः॥ नवांबरधरो मर्त्यो युक्तः स्रग्वस्त्रभूषणाः॥ गुरुं प्रणमेत्कृत्वा च
राजा तु महिषीसखः॥ राजेत्युपलक्षणं। तेनान्येनापि कर्त्तव्यं॥ आयुष्यत्वान्निगउ
म्यो विसृज्योथ मनुजाश्विग उत्थितान्॥ अन्यानि पुराणकर्माणि प्रकुर्वीत यथाविधि।
पापकर्म न कुर्वीत यस्मात्सुतगुणं भवेत्। दिति। ब्राह्मेपि। प्रतिसंवत्सरांतर्द्धे वर्द्धयन्
णां विधिं परां। पूर्वाह्णे चैव जन्मर्क्षे स्नात्वा नेत्रान रोत्तमां मधाज्यदधिसंयुक्तां दूर्वां मृ
त्युंजयेन चाजुहुयाच्च सहस्रं वा अष्टविंशतिमेव वा। ततोपराह्णे संप्राप्ते कुर्यात्कौतु
कबंधनमित्यादि। विष्णुधर्मोत्तरेपि युधिष्ठिरं प्रत्याह परशुरामः॥ स्नानमन्यत्समाचक्ष्व
भागवन्पुष्टिवर्द्धनं॥ न तृप्तिमधिगच्छामि तव वाक्यामृतं पिबन्॥ पुष्कर उवाच॥ जन्म
नक्षत्रगे सोम्ये सर्वौषधिसमन्विते॥ कुंभं तु पूजितं कृत्वा स्नपनं चैव कारयेत्॥ ०॥

स्नातः श्रेवार्चयेद्देवं वासुदेवं जगत्पतिं॥ नक्षत्रदेवतं चंद्रं नक्षत्रं वरुणं तथा॥ वाह-
नायुधपीठाचं छत्रं संपूजयेत्तथा॥ यथोक्तदेवतालिंगैर्मंत्रैश्चाज्यं जुहुयाद्धुतं॥ शक्त्या
४१० च दक्षिणां दद्याद्ब्राह्मणेभ्योन्नमुत्तमं॥ ततोनुलिप्तः सुरभिः स्रग्वी विविधमंगलाः॥
तिष्ठेन्मनुजशार्दूल हे [illegible] शीलितेंद्रियः॥ उपवासं विनाप्येतत्स्नानं पुष्टिप्रदं तथा॥
४ विष्या अलक्ष्मीशमनं न्यक्कलिदुःस्वप्ननाशनं॥ सर्वव्याधिहरं पुण्यं पवित्रं पापनाशनं॥
मातृस्थाने च जगतां जन्मतारा विधीयते॥ चंद्रस्तपी च भगवान्पिता विष्णुः प्रकीर्तितः॥ रामः
तस्मात्सर्वप्रयत्नेन जन्मनक्षत्रसंस्थितं॥ मनसा संपूजयेच्चंद्रं जन्मर्क्षं च विशेषतः॥ ४१०
पूजां सदा चंद्रमसस्तु कृत्वा जन्मर्क्षसंस्थस्य समनुप्रधानं॥ कृतान्नवासोतिनरस्तु सर्वा-
न्सुखी तदा स्यान्मुनि नष्टपापः इति सायणीयेपि जन्मर्क्षपूर्तिविधिं प्रकल्प्योक्तं॥ अथ-
र्व्ये कटिसूत्रं च वासः संग्रहबंधनं॥ हवं किरेरथ्याज्येन चरुणा चापि नाकिनं॥ आ-
युष्यहोमं कृत्वा च तर्पयेत्पितृदेवताः इति॥ अथ कटिसूत्रबंधने गृह्यव्यतिरिक्तं वि-

षयं॥ यत्किंचित्कुरुते कर्म वैदिकं वाथ तांत्रिकं॥ कटिबंधेन संयुक्तं तत्सर्वं निष्फलं
भवेत्॥ रौप्यं कार्पासकं हैमं पट्टसूत्रकृतं तु वा॥ वर्जयेत्कर्मकालेषु कांचीं विप्रो वि-
शेषतः इति॥ गृहस्थधर्मप्रकरणे आश्वलायनेन तन्निषेधात्॥ कौपीनाच्छादना-
र्थाय मौंजीकार्पासकी द्विजः॥ अंतरे त्रिवृतां तावद्यावत्सीचाद्गते पुनरित्याश्वलायने
नोर्थाय मौंजीकर्पासकी द्विजः॥ अंतरे त्रिवृतां तावद्यावत्सीचो हते पुनरित्याश्वला-
यनेन ब्रह्मचारिणः कटिसूत्रविधानाच्च॥ न चेयं मेखलेति मंतव्यं॥ तस्याः पृथगु-
पादानात्॥ आयुष्यहोमस्तु शौनकीये॥ आयुष्यहोमं वक्ष्यामि शौनकोहं द्विजैः
जन्मनो॥ कुर्यात्त्रिजन्मनक्षत्रे विषुवे संक्रमेपि वा॥ पौर्णमास्याममावास्यां ग्रह-
णे चंद्रसूर्ययोः॥ स्नातः शुक्लांबरधरः शुक्लमाल्यानुलेपनं॥ अलंकृतः स्वस्ति-
वाच्य च दत्वा द्विजानये॥ आघाराज्यभागपर्यंतं कृत्वोपालेपनादिकं॥ कृतान्नं
जुहुयात्सम्यगवदानस्य संपदा॥ आनोभद्राः क्रतवे रत्सूचां च पदशकेन तु॥ रमं

स्तोममर्हईतरस्यचां षोडशकेन तु॥ एकया जातवेदस्या कुर्यात्स्विष्टकृतं ततः॥ होमशे
षं समाप्याथ ब्राह्मणान्भोजयेत्ततः॥ स्वस्ति वाच्य द्विजाग्र्येभ्यो धेनुं दद्याच्च दक्षिणा
५० मिति शौनकीय त्र्यायुष्य होमविधिः॥ अथैतेषां वचनानामेवाक्पतया प्रयोगः॥ अथ
यकर्ता पूर्वाह्णे नद्यां जलस्नात्वा शांतिप्रकरणोक्त सर्वौषधिमृत्तिकामृदकुंभं संपूज्य त
दुदकेन स्नात्वा शुक्लांबरधरः सुवर्णादिकटिसूत्रमाबध्य विधिवत्स्वस्ति वाच्य कौ
तुकमाबध्य ग्रहयज्ञपूर्वकं दूर्वा होममृपुष्य होमे तंत्रेण करिष्य इति संकल्प्याग्नि रा.म.
प्रतिष्ठाप्य ग्रहान्सभ्यर्च्यान्वाधानं कुर्यात्॥ तद्यथा॥ देशादि संकीर्त्यास्मिन्दूर्वापुष्य ५०
होमे देवता परिग्रहार्थमन्वाधानं करिष्य इत्युक्त्वास्मिन्नन्वाहितेग्नावित्यादि चक्षु
षी आज्येनेत्यंतमुक्त्वात्र प्रधानं मृत्युंजयमष्टोत्तरशतं दूर्वाद्रव्येण तथा विश्वा
न्देवान्दश दूर्वाहुतिः अग्निं षोडश दूर्वाहुतिः जातवेदोग्निमेकवारं चरुद्रव्येण शेषेण
स्विष्टकृतमित्याज्यभागांतं कृत्वा ग्रहानुत्वा दधिमधुघृताक्तदूर्वांकुरं गृहीत्वा त्र्यं

बकं वसिष्ठो मृत्युंजयस्त्र्यंबकानुष्टुप्॥ ॐ जं तेनेन मंत्रेणाष्टोत्तरशतमष्टाविंशति दु
र्वा चरु होमं कुर्यात्॥ आनोभद्रा इति दशर्चस्य सूक्तस्य गोतमो विश्वेदेवा आदितः
पंच सप्तमी च जगत्यः षष्ठी विराट्स्थाना नु अष्टम्याद्यास्तिस्रस्त्रिष्टुभः प्रधानहोमे
विनियोगः॥ इति प्रत्यृच होमः॥ इमंस्तोममिति षोडशर्चस्य सूक्तस्य आंगिरसः कु
त्सोग्निरादितस्त्रयोदश जगत्यः॥ अंते द्वे त्रिष्टुभौ देवत्याः प्रधानहोमे०॥ इति प्रत्यृचं
होमः॥ जातवेदसे इत्यस्य मारीचः कश्यपो जातवेदोग्निस्त्रिष्टुप् होमे०॥ एवं सप्तवि
शति मंत्रैस्तावदाहुती हुत्वा स्विष्टकृदादि होमशेषं समाप्य वासुदेवं नक्षत्र देवता
चंद्रं च नक्षत्रं वरुणं च षोडशोपचारैरभ्यर्च्य तत्प्रकाशकैर्मंत्रै राज्याहुतीर्जु
हुयात्॥ ततो नवग्रह केतु शोदकेनाभिषिक्तो यथाशक्ति गोमहिरण्यादिकं दत्वा
देवगुरुब्राह्मणान्सुहृद्बंधुयुतोऽभ्यर्च्य हनादुपपीठछत्रपद्मं कृत्वा ब्राह्मणान्भोजयि-
त्वा गंधादिभिरलंकृत्वोद्धृतभक्षणोद्धृतपुष्पमालोन्नतनवस्त्रं धृत्वा पतिपुत्रबा-

नीभिः॥ स्त्रीभिर्नीराजितो ब्राह्मणोभ्यर्चितो बान्धवैः कुलस्त्रियं हविष्याशीति तेभ्यो वर्त्ते
त॥ अथ च वासुवर्णादिनिर्मितकटिसूत्रधारणं कार्यं॥ इति विधानपारिजाते॥ अब्द
५२ पूर्तिविधानं॥ लल्लजातके तु प्रकारांतरेणोक्तं॥ स्वग्रामे द्वादशे मासि विधानांतरमा
दिशेत्॥ सुहृदः कारयेत्स्थूलाः सुभ्रुमा वंशपेटिकाः॥ निधाय मोदकादीनि तास
त्वाकानि सर्वशः॥ आच्छाद्य तेनैव वस्त्रैः पूर्णा द्वादशपेटिकाः॥ जीवत्पुत्रासु नारीषु
भक्त्या तास्संप्रतिपादयेत्॥ प्रत्यब्दमेवं कुर्याच्च वर्षवर्धनमुत्तमं॥ संततेः क्षेमवृद्ध्यर्थं रामः
जननी स्वयमेव वा॥ अब्दानां षष्टियावच्च संप्राप्ते जन्महायने॥ स्नात्वा शुद्धेन तैले ५२
न पूजयेद्वत्सराधिपं॥ ब्राह्मणान्भोजयेत्पश्चात्तेनारोग्यमवाप्नुयादिति। अथ क्रमा
र्कंडेयपूजनमपीष्यतेति। इत्युक्तं प्रयोगरत्ने। प्रतिसंवत्सरं चैव कुर्यान्मार्कंडपूजनं॥
गंधपुष्पादिनैवेद्यैरथ पुष्पांजलिं ददेत्॥ तत्र मंत्रः॥ आयुष्प्रद महाभाग सोम
वंशसमुद्भव। महातपो मुनिश्रेष्ठ मार्कंडेय नमोस्तु ते॥ इति पुष्पांजलिं दद्या

प्रार्थयेद्वरमुत्तमं॥ मार्कंडेय मुने यन नमस्ते चिरजीविने। मार्कंडेय महाभाग सप्तकल्पा
न्तजीवन॥ आयुरारोग्यसिद्ध्यर्थमस्माकं वरदो भव॥ नराणामायुरारोग्यैश्वर्यसौ
ख्यसुखप्रद॥ सौम्यमूर्ते नमस्तुभ्यं भृगुवंशकराय च॥ महातपो मुनिश्रेष्ठ सप्तक
ल्पांतजीवन। मार्कंडेय नमस्तुभ्यं दीर्घायुष्यं प्रयच्छ मे॥ मार्कंडेय महाभाग प्रार्थ
ये त्वां कृतांजलिः॥ चिरजीवी यथा त्वं भो भविष्येऽहं तथा मुने॥ मार्कंडेयो ध्रुवं लब्ध्वा
द्रौण्यादीन्संस्मरेत्ततः॥ अश्वत्थामा बलिर्व्यासो हनुमांश्च विभीषणः॥ कृपः परशु
रामश्च सप्तैते चिरजीविनः॥ अन्याश्च देवताश्चैव संपूज्य ततो नरः॥ ब्राह्मणे
भ्यस्ततो दद्यात्तिलान्धान्यं ततो घृतं पानकं च ततः क्षीरमायुर्वृद्धिकरं परं॥
तन्मन्त्रः॥ एवं जल्पन्नर्द्धमितं क्षीरं सतिलं गुडमिश्रितं॥ मार्कंडेय वरं लब्ध्वा पिबा
म्यायुष्यहेतवे नामकर्मयोस्तथा॥ चरेत्रांतपनं भुक्त्वा जातकर्मणि चैव हि॥ अनंता
न्येषु तु संस्कारेषूपवासेन शुध्यति॥ सहोपनीय कुर्यात्तदा दोषो न विद्यते॥ य

द्विदिगर्भविपत्तिः स्याद्विश्रो वा मरणं यदि ॥ अथाध्ययनकारिका पि। तृतीयवत्सरे चौ
लं कुर्वीत स्योत्तरायणे ॥ शुक्लपक्षे शुभनक्षत्रे तु कल्याभ्युदयिकं तथा ॥ यथान्वयं वा कौ
५२ षीचिदुपवीस्वामिद्वि सार्द्धं द्वासहेव्यत्तरस्यादिकादिकालशुद्धिं ज्ञात्वा स्वस्वसूत्रोक्त
प्रकारेण चूडाकर्म कार्यं ॥ इति चूडाकर्मविधानं ॥ अथ बालस्याक्षरारंभविधानं ॥
तत्कालमाहानृसिंहः ॥ अक्षरस्वीकृतिः प्रोक्ता प्राप्ते पंचमहायने ॥ उत्तरायणगे
सूर्ये कुंभमासं विवर्जयेत् ॥ अथ नक्षत्राणि ॥ हस्तादित्यमरुन्मित्ररौद्रयोहन्ना राम: ५२
श्विचमं ॥ श्रवणं च प्रशस्ता चैस्यादक्षरसंग्रहे कौतोशिशोः ॥ तद्दितिकर्तव्यतामाह
विष्णुधर्मोत्तरे पुष्करं रामं प्रति पुष्करः ॥ प्राप्ते पंचमे च मे वर्षे त्वप्रसुप्ते जनार्दने ॥ षष्ठी
प्रतिपदं चैव वर्जयित्वा तथाष्टमीं ॥ रिक्तां पंचदशीं चैव सौरभौमदिने तथा ॥ एवं
सुनिश्चिते काले विद्यारंभं तु कारयेत् ॥ पूजयित्वा हरिं लक्ष्मीं देवीं चैव सरस्व
ती ॥ स्वविद्यासूत्रकारांश्च स्वविद्यां च विशेषतः ॥ सूत्रकाराः पाणिन्यादयः ॥

॥ विद्याश्च पाणिनिव्याकरणादयः ॥ एतेषामेव देवानां नाम्ना तु जुहुयाद्धृतं ॥ दक्षिणाभिर्द्विजें
द्राणां कर्तव्यं चात्र पूजनं ॥ प्राङ्मुखो गुरुरासीनो वारुणाभिमुखं शिशुं ॥ अध्यापयेत्तु प्र
थमं द्विजाशीर्भिः सुपूजितं ॥ ब्राह्मणानां गुरूणां च देवतानामनंतरं ॥ ततः संपूज्य वित्तेन
धात्रीं रामगुरुस्तथा ॥ दक्षिणाभिर्द्विजेंद्राणां कर्तव्यं तर्पणं तथा ॥ ततः प्रभृत्यनध्याया
न्वर्जनीयान्विवर्जयेत् ॥ अष्टमीं द्विनयं रामपक्षांते च दिनद्वयं ॥ आशौचे चं द्वयाग्रायां
मकं पेराहुदर्शने ॥ व्यतीपाते त्वाहोरात्रं मुल्कापाते तथैव च ॥ अकालस्तनिते चैवनि
ज्योतिर्वितथांबरे ॥ तथाउकालप्रचंडश्च यदा स्यात् युस्तदा भवेत् ॥ प्रदोषे चाप्यसंशुद्धे चै
त्यवृक्षे च तु व्यथे ॥ गोस्थाने कुंजरे चाश्चेन चैत्यपितथा पठेत् ॥ स्वसृगालखरवैघोरै
स्तथा च खरनिस्वनैः ॥ तथा वादित्रशब्दे च प्रवृत्ते न गरोत्सवे ॥ कालेषु देशेषु भयादि
तेषु पठंति ये राम न तेषु विद्या ॥ इति ॥ इति विधानपारिजाते बालस्याक्षरारंभविधानं ॥
अथेदानीं प्रसंगादनुपनीतधर्माः कथ्यंते ॥ तथा च स्मृतिचंद्रिकायां गौतमः ॥ प्रागु

प्रनयनात्कामचारः कामवादः कामभक्ष इति। [illegible] रः स्वेच्छागतिः कामवादो ऽश्लीलादि
भाषणं। कामभक्षः पर्युषितान्नादिभक्षणं॥ रातपुक्रियमाणोपनयना तैलाद्यं दे
पतितमेव॥ तत्कालपातकव्यतिरिक्तविषयं। तथा च स्मृत्यंतरं॥ स्यात्कामचार
भक्षोक्तिर्महतः पातकादृतु इति। महापातकेष्वपि त्वादिभिः प्रायश्चित्तं कामकार्यं। तत्पो
चेत्कं परादारेण॥ अनुपनीतस्तु योति। अन्यच्चैवेत्यादि। तस्य कृच्छ्रचर्यं कार्यपि
त्रात्वाचा। पित्रोति ~~भिमचंमोक्षित्रि~~ वेचादि ति। अन्यच्चैवेत्यादेवं पुरोजे उशना नाभिम
ध्येचयहुतं॥ प्रमादादिद्विशुराकर्त्र्यात्रारक्ष्या। मयत्नेन इति॥ इदं बालविषयं॥
तदाचारे [illegible] येवस्विष्टः। न ह्यस्याविद्यते कर्म किंचिदामौंजिबंधनात्। बालः शूद्रसमस्ता
वद्यावद्वेदे न जायते इति। पुनरिति शेषः। गौतमोपि यथोपपादमूत्रपुरुषो भवति। न
तस्याचमनकल्पो विद्यते। न तस्योद्धृत्यवोविचारांत्रोदलिंगानुस्वरस्यादयो निय
मा इति॥ आपस्तंबोपि। आप्राशनात्तु यत्तोभवत्यासंवत्स

रादित्येके इति। गौतमोपि। न तदुपस्पर्शनादाशौचमिति॥ तस्यानुपनीतस्योदक्यादिस्पृष्टस्या
पि स्पर्शे स्नानमिति हरदत्तः। स्मृतिदीपिकायां तु शिशोरभ्युक्षणं प्रोक्तं बालस्याचमनं
स्मृतं। रजस्वलादिसंस्पर्शे स्नानमेव कुमारके॥ इति बालस्यापि नैत्रेयोक्तं॥ प्राक्चूडाकरणा
द्बालः प्रागन्नप्राशनाच्छिशुः। कुमारकस्तु विज्ञेयो यावन्मौंजीनिबंधनमिति॥ कौतशौचमपि
नाग्निहोत्रादौ नियुंज्यात्॥ तदाह गौतमः। न त्वेनमग्निहवनबलिहरणयोर्नियुंज्यादि
ति॥ तस्य मंत्रकीर्तनाद्यर्थमित्यभिप्रायः। मनुरपि। नैव कन्या न युवतिर्नाल्पविद्यो न बालिशः।
होता स्यादग्निहोत्रस्य नार्तो नासंस्कृतस्तथेति॥ न मंत्रानर्हत्वाच्च नियोज्य इत्याह
गौतमः। न ब्रह्माभिव्याहारयेदन्यत्र स्वधानिनयनादिति॥ मनुरपि॥ नह्यस्मिन्युज्यते
कर्म किंचिदामौंजिबंधनात्॥ नाभिव्याहारयेद्ब्रह्म स्वधानिनयनादृते इति। स्वधानि
नयनं श्राद्धं। तच्चानुपनीतेनापि कार्यं कर्त्रंतराभावे॥ इत्यनुपनीतधर्माः॥ अथ बाल
पितृधर्माः। विसृष्टमर्तिरे पुष्करः। अपत्यानां च बालानां तथा मार्गविपत्त्यने॥ प्रायश्चित्तं

बालकानां च दातव्यं स्यादिति न तत्॥ बालानां प्रार्थितं दत्वा नाकलोके महीयते॥ बालको
भ्रानुनेयाः स्युर्धर्मकामैः स्वदानैः॥ तेषां भोज्यप्रदानेन गोदानफलमाप्नुयात्॥ तेषां क्री
५४ उनकं दत्वा मोदलेनं दनेव ने॥ आच्छादयति स्ततनयस्य पृष्ठे न बालको॥ दौर्भाग्यम
हृद्गामोति यच्च यत्राभिजायेते तस्मात्सर्वप्रयत्नेन बालानन्नं तु भोजयेत्॥ अभुक्तेवत्सु
बाले पुनर्वाऽश्रीयात्कदाचन। अन्नं दत्वा न चाश्रीयात्कदाचिदपि च स्वयमिति॥ रथ्यनु
पनीतधर्मप्रकरणे नैमित्तिकादिधर्मविधानं॥ अथोपनयनं॥ तत्र स्वस्वसूत्रोक्तप्रकारेण राम:
कार्यं॥ तत्कालश्चोक्तो योगीश्वरेण॥ गर्भाष्टमेऽष्टमे वाब्दे ब्राह्मणस्योपनयनं। राज्ञा ५४
मेकादशे सैके विशामेके यथाकुलं॥ काम्योपनयनकालमाहोशना॥ जन्मतः पंचमव
र्षे ब्राह्मणस्योपनायनं राज्ञस्तु षष्ठे वैश्यस्य सप्तमे तु बलार्थिनो मनुरपि॥ ब्रह्मव
र्चसकामस्य कार्यं विप्रस्य पंचमे॥ राज्ञो बलार्थिनः षष्ठे वैश्यस्यार्थार्थिनोऽष्टमे॥ वि
द्यु॥ षष्ठे तु धनकामस्य विद्याकामस्य सप्तमे॥ अष्टमे सर्वकामस्य नवमे कांतिमिच्छ

तः॥ आयर्वणास्त्रे तु। अथ ब्रह्मचारिकल्पो गर्भपंचमे वै ब्राह्मणमुपनयीत गर्भाष्टमे
वा गर्भाष्टमे राजन्यमिति॥ ज्योतिर्नृसिंहस्तु उत्तरायणगे सूर्ये कर्तव्यं ह्योपनायनं॥
आपस्तंबश्रुतिरपि॥ वसंते ब्राह्मणमुपनयीत ग्रीष्मे राजन्यं शरदि वैश्यमिति॥ अ
त्र ज्येष्ठमासे ज्येष्ठपुत्रोपनयनं निषेधति गर्गः॥ ज्येष्ठमासे विशेषेण सर्वज्येष्ठस्य चैव
हि॥ उपनीतस्य पुत्रस्य जडत्वं मृत्युरेव चेति॥ बृहस्पतिः॥ शुक्लपक्षः शुभः प्रोक्तः कृष्णश्चा
श्चायत्रिके विनेति॥ भृगोरंगिरसो महैकचक्रिं नोपनीयने तथा विनचुना वसंते
नेकेदनपक्षे गलग्रहे। उपनीतस्य चानध्याये पुनः संस्कारमर्हति॥ त्रयोदशी चतुष्कं च
सप्तम्यादि त्रयं तथा। चतुर्थी चैव संप्रोक्ता अष्टावेते गलग्रहाः॥ अपरपक्षे चोपनी
तः पुनः संस्कारमर्हति॥ नारदः॥ गुरुशुक्रबुधानां तु वाराः श्रेष्ठतमाः स्मृताः॥ मध्य
मः सोमवारस्तु सूर्यवारोऽपि मध्यमः॥ वारौ मंदारयोर्वर्ज्यौ कृष्णे वर्ज्यो निशापतेः॥ अ
स्तंगतस्य सोमस्य वारो वर्ज्यो द्विजन्मनामुपनयने॥ बृहस्पतिः॥ त्रिरस्त

रेषु रोहिण्यां हस्ते मैत्रे च वासवे। याष्ठे सौम्य पुनर्वस्वोः प्रशस्तं ह्युपनायनं॥ व्याघातं प
रिघं वज्रं व्यतीपातं च वैधृतिं॥ गंडातिगंडौ शूलं च विष्कंभं चैव वर्जयेत्॥ शिष्टाष्टादशा
५५ योगेषु प्रशस्तं ह्युपनायनं॥ अत्र विशेषमाह श्रीपतिः॥ स वैधृति व्यतिपात नामा स
वोऽप्यनिष्टः परिघस्य चार्द्धं॥ तिस्रस्तु योगे प्रथमे स वज्रे व्याघातसंज्ञे नव पंच शूले॥
गंडातिगंडे च षडेव नाड्यः शुभेषु कार्येषु विवर्जनीयाः॥ बवादीनां तु षट्कं स्यात्प्रपन्ना-
येसु पूजितं॥ शकुन्यादीनि विष्टिं च वर्जयेत्तु विशेषतः इति॥ एवं सम्यग्विचार्येव लौके को राम
निर्दिष्टतां गते। कृतोपनीतिः शिष्यः स्याद्दीर्घायुः सर्वयज्ञकेन्॥ देवज्ञं सम्यगभ्य ५५
र्च्य वस्त्रैः कनककर्मभिरिति॥ तत्राचार्यलक्षणमाह शौनकः॥ कुमारस्योपनयनं
श्रुताभिजनवृत्तवान्॥ तपसा धूतनिःशेषपाप्मा कुर्यात् द्विजोत्तम इति॥ व्यासोपि॥
क्रादयंति सततं यस्य पोष्टेन बालका॥ दौर्भाग्यं महदाप्नोति यत्र यत्राभिजायते
॥ तस्मात्सर्वप्रयत्नेन बालान्नेत्तु भोजयेत्॥ अनुक्तपक्षेषु बालेषु न चाश्नीयात्कदाचन॥

अनंदत्वा न चाश्नीयात्कदाचिदपि चस्य यमिति॥॥ इत्यनुपनीत तत्सित्रादिधर्मविधानं॥
अथोपनयन विधानं॥ याज्ञवल्क्यः॥ गर्भाष्टमेब्दे ब्राह्मणस्योपनायनं॥ राज्ञामेका
दशे सैके विशामेके यथाकुलं॥ काम्योपनयनकालमाह मनुः॥ ब्रह्मवर्चसकामस्य
कार्यं विप्रस्य पंचमे। राज्ञो बलार्थिनः षष्ठे वैश्यस्यार्थिनोष्टमे। विष्णुः षष्ठे तु धनका
मस्य विद्याकामस्य सप्तमे॥ अत्र गर्भाष्टमेष्विति बहुवचनं गर्भषष्ठमसप्तमाष्टमव
र्षप्राप्त्यर्थमिति सुदर्शनभाष्यकारः॥ आपस्तंबसूत्रे तु अथ ब्रह्मचारिकल्पो गर्भ
पंचमेब्दे ब्राह्मणमुपनयीत गर्भाष्टमेवति॥ आपस्तंबः॥ अथ काम्यानि सप्तमे ब्र-
ह्मवर्चसकामं अष्टमे आयुःकामं नवमे तेजस्कामं दशमे अन्नाद्यकामं एकादशे इंद्रिय
कामं द्वादशे पशुकाममुपनयेदिति॥ गौणकालमाह मनुः॥ आषोडशाद्ब्राह्मणस्य सा
वित्री नातिवर्त्तते॥ आद्वाविंशात्क्षत्रबंधोराचतुर्विंशतेर्विशः॥ गर्गः॥ पि विप्रं वसंते नृ-
क्षितिपं निदाघे वैश्यं घनांते व्रतिनं विदध्यात्॥ माघादिषु कार्त्तिक पंचमासाः सा

यरणं बालकलद्धितानां ॥ हिमाद्रावपि ॥ माघादिषु च मासेषु मौंजी पंचसु शस्यते ॥ वसंते
ब्राह्मणस्याद्य ग्रीष्मे राजस्तथैव चेति । श्रुतिरपि वसंते ब्राह्मणमुपनयीत ग्रीष्मे राजन्यं श
५६ रदि वैश्यमिति । वृत्तशातकेतु ॥ न जन्मधिष्ण्ये न च जन्ममासे न जन्मकाले न दिने विदध्या
त् ॥ ज्येष्ठे न मासि प्रथमस्य सूनोः स्त्रियाः सुताया अपि मंगलानि ॥ गर्गोऽपि । ज्येष्ठमासे वि
शेषेण सर्वज्येष्ठस्य चैव हि । उपनीतस्य पुत्रस्य जडत्वं मृत्युरेव चेति । अत्र विशेषमाह
राजमार्तंडः । जातं दिनं दूषयते वसिष्ठो ह्यष्टौ च गर्गो नियतं दशात्रिः । जातस्य पक्षं कि राम:
ल भागुरिश्च शेषाः प्रशस्ताः खलु जन्ममासि ॥ अन्यत्रापि । जन्ममासेति कौमे च वि ५६
परीतं दलेस्सति ॥ कार्यं मंगलमित्याह गर्गभार्गवशौनकाः । जन्ममासनिषेधेऽप्यद्विता
नि दशावर्जयेत् ॥ आरभ्य जन्मदिवसाच्छुभाः स्युरिति चोपरे । ग्रंथांतरेऽन्यदपि । ब्रू
ते जन्मचिकादिस्थो जीवो पीडोर्च नाम सेकृत् ॥ शुभेति काले तु यदि स्याद्वस्योच्चिष्णुणा
चंनात् ॥ शुद्धिदिनै च गुरोर्यस्य वर्षे प्राप्ते ष्टमे यदि । चैत्रे मीनगते भानो तस्योपनयनं

शुभं जन्मदष्टमे सिंहे नीचे वा शत्रुभे गुरौ ॥ मौंजीबंधः शुभः प्रोक्तश्चैत्रे मीनगते रवौ ॥ ना
रदः ॥ बालस्य बलहीनोऽपि शांत्या जीवो बलप्रदः ॥ यथोक्तवत्सरे कार्यमनुक्तेनोपनायन र
मिति । गुरुशांतिश्च तृतीये स्तबके वक्ष्यते ॥ ज्योतिर्निबंधे नृसिंहः ॥ तृतीया पंचमी षष्ठी
द्वितीया चापि सप्तमी ॥ पक्षयोरुभयोश्चैव विशेषेण सुपूजिताः ॥ धर्मकामो सिते पक्षे
केह्ने च प्रथमा तथा ॥ शुक्ल त्रयोदशीं केचिदिच्छंति मुनयस्तथा ॥ वसिष्ठः ॥ नैमित्तिके
मनध्यायं ह्यस्ने च प्रतिपद्दिने । मेखलाबंधने शस्तं चौले वेदव्रतेष्वपि ॥ प्रशस्ता प्रति
पक्षे ह्यमान पूर्वापरसंयुता ॥ एतदतीतकालं शुभं गते विधौ । चंद्रे बलयुते लग्ने वर्णानां
मतिलंघनं रतिव्यासोक्तः ॥ एवं समस्यापि तस्यौः गलग्रहश्चोक्तः ॥ बृहस्पतिः ॥ शुक्लप
क्षः शुभः प्रोक्तः कृष्णश्चांत्यत्रिकं विना । मिथुनेऽस्थिते भानौ ज्येष्ठमासो न दोषहेतु ॥
रत्नसंग्रहे नारदः ॥ विनष्टे नावसंते तेन कृष्णपक्षे गलग्रहे । अस्राद्धे चोपनीतः पुनः संस्का
रमर्हति ॥ विनेत्य स्ववसंते न गलग्रहेऽनध्याये स्तथा ॥ गलग्रहमाह नारदः ॥ त्रयोदशी चतु
ष्टेनात्तस्य वरोऽपनयनविषयं । प्रशस्ता प्रतिपद्धेमो कदाचिप

कं चस्य मन्यादितिथित्रयं। चतुर्थीं चैव स्यं प्रोक्ता अष्टावेते गलग्रहाः॥ वसिष्ठः॥ पापोग्र
कगते चंद्रे अरिनीं चस्थिते पिवा॥ अनध्याये चोपनीतः पुनः संस्कारमर्हति॥ तथा॥
५८ अनध्यायस्य पूर्वेद्युस्तचैव परेहनि। व्रतबंधं विसर्गं च विद्यारंभं न कारयेत्॥ राज
मार्त्तंडे॥ आरभ्यानेतरे यत्र प्रत्यारंभो न सिद्ध्यति॥ गर्गादिमुनयः सर्वे तमेवाहुर्गलग्र
हमिति॥ ज्योतिर्निबंधे॥ अष्टकासु च सर्वासु युगमन्वंतरादिषु॥ अनध्यायं प्रकुर्वीत
तथा सोपपदासु च॥ तच्च रूपं स्मृतिसारे॥ सिताज्येष्ठे द्वितीया च आश्विने दशमी राम: ५८
सिता॥ चतुर्थी द्वादशी माघे एताः सोपपदाः स्मृताः॥ एवं प्रदोषदिनमपि वर्ज्यमित
दाह गोभिलः॥ षष्ठी च द्वादशी चैव अर्द्धरात्रोननाडिका॥ प्रदोषमिह कुर्वीत तृतीया
नवयामिका॥ कुत्रचित् युगादावदोषमाह ज्योतिर्निबंधे व्यासः॥ याचैत्रवैशाखशि
ता तृतीया माघस्य सप्तम्यपि फाल्गुनस्य॥ कृष्णे तृतीयोपनये प्रशस्ताः प्रोक्ता भर
द्वाजमुनिप्रमुख्यैः॥ गर्गः॥ प्रहूर्वीद्योरवनिप्रकंपे केतूदयोल्कापतनादिदोषे॥ व्र

ते दशाहानि वदंति तज्ज्ञास्त्र्योदशाहानि वदंति केचित्॥ संकटे तु चंडेश्वरः॥ हाहे दिग्दाहे चैव धरा
प्रकंपे वज्रप्रपाते च विदारणे च। केतौ तथोल्कां शुक्रप्रपाते त्र्यहं न कुर्याद्व्रतमंगलानि॥
॥ सर एव॥ वेदव्रतोपनयने स्वाध्यायाध्ययने तथा॥ नदोषो यजुषां सोपपदास्वध्ययनेपि च
तथा॥ भृगोरंगिरसो मौंज्ये कर्त्तव्यं नोपनायनं॥ नारदः॥ गुरुशुक्रौ बुधानां तु वाराः श्रेष्ठतमा
व्रते॥ मध्यमः सोमवारस्तु सूर्यवारोपि मध्यमः॥ वारौ मंदारयोर्वर्ज्यौ केचिद्वर्ज्यो निशापतेः॥
स्वस्तंगतस्य सौम्यस्य वारो वर्ज्यो द्विजन्मनि॥ वारो मंगलः॥ द्विजन्मन्युपनयने॥ ज्योतिर्नि
बंधे॥ सर्वेषां जीवशुक्रवाराः प्रोक्ता व्रते शुभाः॥ चंद्रार्कौ मध्यमौ ज्ञेयौ सामबह्वृचयोः कुजः॥
शाखाधिपतिवारश्च शाखाधिपबलं तथा॥ शाखाधिपतिलग्नं च दुर्लभं त्रितयं व्रते॥
शाखाधिपतिवारश्च शाखाधिपबलं तथा॥ शाखाधिपतिलग्नं च दुर्लभं त्रितयं व्रते
शाखाधिपाश्च रत्नसंग्रहे॥ ऋगथर्वसामयजुषामधिपा गुरुसौम्यभौमसिताः॥ जीव
सितौ विप्राणां क्षत्रस्यारो हिमगुर्विशां चंद्र इति॥ पारिजाते बृहस्पतिः॥ बह्वृचानां गुरो

वांरेयं यजुर्वेदं तु पांबुधे। सामगानां धरास्तनोरथर्वविदुषां रवे॥ नक्षत्राणि सएवाहस्तत्र
येपुष्यधनिष्ठयोश्च पौष्णाश्विसौम्यादितिचित्तु मैत्रब्राह्मस्तेति पौषं च रवले ने युक्तकार्योऽपि
५८ द्विजानां व्रतबंधमोक्षौ॥ ज्योतिर्निबंधेपि नारदः॥ अहस्तत्र्यक्षत्रयं येज्यचंद्रादित्युत्तरा
णीच॥ विष्णुत्रयाश्विमित्राब्रह्मयोनिभान्युपनायने॥ बृहस्पतिः॥ त्रिपूर्वेरपुरोहिताया ह
स्तेमैत्रे च वासवे॥ त्वाष्ट्रे सौम्य पुनर्वस्वोरुत्तमं त्वुपनायने॥ ज्योतिर्निबंधेपि पूर्वाहस्ते
त्रयोसापद्धति मलेतु बह्वृचां॥ यजुषां पोष्णमैत्रार्केष्विंदुपोष्णे च यर्वणां॥ राजेमा राम: ५८
र्नंस्तु ब्राह्मणो पुनर्वसुं निषेधति॥ तारा चंद्रानुकूले पुष्ये महाब्दे पुष्यमे चापि॥ पुनर्वसोऽ
प्र॥ पुनस्संस्कारमर्हति॥ तत्रैव नारदः॥ व्याघाते परिघे वज्रे व्यतीपाते च वैधृतिं
॥ति गंडांतमूले च विष्कंभे चैव वर्जयेत्॥ शिशाष्टादश योगेषु प्रशस्तमुपनायनं॥ अ
शविशेष महाश्रीपतिः॥ सवैधृतिस्तु व्यतिपातनामा सर्वोऽप्यनिष्टः परिघस्य चार्द्ध॥
तिस्रस्तु योगे प्रथमे सवज्रे व्याघातसंज्ञे नव पंच मूले। गंडे तिरां डे च षडेव नो उत्त:श्रु

मेषु कार्येषु विवर्जनीयाः॥ गर्गः॥ बवादीनां तु षट्कं स्यादुपनाये सुपूजितं॥ शकुन्यादी
विष्टा च वर्जयेत्तु विशेषत इति॥ अथ चान्यदप्यंग गुरुशुक्रादि देवज्ञैर्भ्योवगंतव्यं॥ तदाह
नारदः॥ एवं संस्थाप्य विचार्यैव कालेन विदोषिताग्ने॥ देवज्ञं सम्यगभ्यर्च्य वस्त्रैः कनकै
भूषणैः॥ कृतोपनीतः शिष्यः स्याद्दीर्घायुः सर्वयित्तत्कृत्स्नदिति॥ लल्लः॥ ब्रह्मणोऽपि पूर्वा
संध्यायां चारिदोषदिगजंति॥ न दिने स्यादनध्यायोन्नततत्त्वविवर्जयेतु॥ संध्योक्तकालउ
क्तं नैव॥ उदयात्प्राक्तनी संध्याघटिकाद्वयमुच्यते॥ सायंसंध्या त्रिघटिकअस्ताद्रुप
रि भास्वत इति॥ ज्योतिर्निबंधे॥ नांदीश्राद्धं कृते चेत्स्यादनध्यायस्त्वकालिकः॥ तदोप
नयनं कार्यं वेदारंभं न कारयेत्॥ एतच्च प्रत्यायनेकालायनाद्यन्यविषयं॥ तेषां तद्दि
ने दारंभाभावात्॥ अन्तएवामुपनयनं तद्दिने न भवत्येव॥ एतच्च प्रातस्त्वनित्ये॥ सायं
स्तनिते तु पुरेव चेरुः अपघित्वा सायंसंध्योत्तरहोमं कुर्यात्॥ न संध्यागर्जिते कालो
नवध्युसातरषिते॥ ब्रह्मौदनं पचेदग्नौ पक्के चेन्न निवर्त्तति॥ एवं च रुश्रपराभावेशं

तिरुक्तान्नसिंहप्रास्वादे॥ ब्रह्मौदनविधेः पूर्वं प्रदोषे गर्जितादि। तदा विघ्नकरं ज्ञेयं वेदोर
ध्ययनस्य तु॥ तस्य शांतिप्रकारं तु वक्ष्ये शास्त्रानुसारतः॥ प्रधानं पायसं साज्यमष्ट्यं
५८ शांतियज्ञो भवेत्॥ सूक्तं वा हस्य ते विद्यान्येटे स्वाज्ञाविरुद्धये॥ गायत्री चैव मंत्रः स्यात्सा
यश्चित्तं तु सर्पिषा॥ धेनुं स्पर्ने सकांदद्यादाचार्याय पयस्विनीं॥ ब्राह्मणान्भोजयेत्सम्या
न्ततो ब्रह्मौदनं चरेदिति॥ नेदं कात्यायनादेः। तेषां ब्रह्मौदनाभावात्॥ गर्गः। ज्वरस्योत्पा
दनं यस्येत्लग्नं तस्य तत्कारयेत्॥ दोषनिगमेनास्यस्त्रात्स्वस्थो धर्मं समाचरेत्॥ बृहस्प राम:
स्मृतिः। प्रासमभ्युदयश्राद्धं पुत्रसंस्कारकर्मणि॥ पत्नी रजस्वला चेत्स्यान्न कुर्यात्त ५८
त्पिता तदा॥ पितेति कर्तृमात्रोपलक्षणं॥ संकटे तु वाक्यसारे॥ अलाभे सुमुहूर्तस्य
रजोदोषे परे कथ्युपस्थिते॥ श्रियं संपूज्य विधिवत्ततो मंगलमाचरेत्॥ अत्र शांतिविशे
षस्तृतीयस्तबके वक्ष्यते। पूर्वसंस्कारातिपत्तौ तु मंडनः॥ कालोतीतेषु कार्येषु
पात्रकृच्छ्रं परे ह्यपि॥ कालातीतानि कृत्यानि विदध्यादुत्तराणि तु। तत्र सर्वकर्मणां तं

त्रेणान्दीश्राद्धं कुर्यात्॥ देशकालकैक्यात्॥ गताशः क्रियमाणानां मात्स्यणां पूजनं
संकृत्॥ सकृदेव भवेच्छ्राद्धमादौ न पृथगादिषु॥ तिकात्यायनोक्तेश्च। उपनीतिदिनेम
ध्याह्नसंध्यामाहृयारिजीते जैमिनिः॥ यावत्तु ब्रह्मोपदेशस्तु तावत्संध्यादिकं नेच॥ ततो
मध्याह्नसंध्यादिसर्वं कर्म समाचरेदिति॥ यत्तु वचनं॥ उपानये तु कर्त्तव्यं सायंसंध्याउ
पासनं॥ आरम्भे द्रुस्तय ज्ञं तु मध्याह्ने तु परिहरन्नीति। तच्छौरचांतरविषयमिति पारिजा
तहृत्॥ विकल्प इत्यन्ये॥ जैमिनिः॥ अनुपाकृतवेदस्य कर्त्तव्यो ब्रह्मयज्ञकः॥ वेद
स्थाने तु सावित्री गृह्यते तत्समायनरति॥ शौनकः॥ कुमारस्योपनयने श्रुताभि
जनवृत्तवान्॥ तपसा धूतनिःशेषपाप्मा कुर्याद्द्विजोत्तमः॥ व्यासोप्याह। तु मिद्ध
तितस्योपनयने विशेषो वक्ष्यते॥ एवं ब्रुवन्नेतज्ज्ञापयति॥ तेन प्रकारेण प्रतिवेद
मुपयनं कर्त्तव्यमिति॥ अन्ये तु मसंकृतमुपनयनं सर्ववेदार्थमिति मन्यंते॥ यथा
हापसांब॥ सर्वेभ्यो चैव वेदिभ्यः सावित्र्यनूच्यत इति हि ब्राह्मणतामिति॥ शौनकोपि॥०

दि॰

यो वेदांतरमध्येति तत्स्त्रविधिना ततः॥ कृतोपनयनो धीयत्तं वेदं सकलं द्विजः॥ द्वितीय
मिममृग्वेदमध्येतुमभिवांछया॥ एतदुक्तोक्तविधिना पुनरप्युपनीयते॥ केशानां
वपनं तस्य न क्रियेत क्रियेत वा॥ मेधाजननकर्मापि विज्ञेयं च कृताकृतं॥ कर्त्तव्यप
श्वाश्रयणे मेधाजननकर्मणः॥ ब्रह्मौदनस्य होमः स्यात्त्रिरात्रादिव्रतं तथा॥ कस्य
ब्रह्मादिमंत्रेण परिदानं न चेष्यते॥ तत्रोदगयनादिश्च कालो नापेक्ष्यते॥ अत्र तु॥
तत्सवितुर्वृणीमहे वयमित्येवमादिका॥ आकलाविचीपरिमाह्याय सादन्यत्समीरितं॥ राम:
अन्योपनयने तत्तु दलंकारविवर्जितं॥ ररूपिस्यवैकुर्वीतेत्युपनीतः पुनर्भवेदि दि॰
ति॥ स्यथपुनरुपनयनस्य निमित्तांतराण्युच्यते॥ मनुः॥ अज्ञानात्प्राश्य विण्मूत्रं
सुरासंस्पृष्टमेव च॥ पुनःसंस्कारमर्हति त्रयो वर्णा द्विजातयः॥ विष्णुरपि॥ विड्व
राहग्रामकुक्कुरगोमांसभक्षणे पुचसेवैच्छे तेषु द्विजातीनां प्रायश्चित्तांते पुनःसंस्का
रं कुर्यादिति॥ ज्ञानातस्तु॥ लशुनं गृंजनं चैव पलांडुं च तथाशुनां॥ उष्ट्रमानुषको

माश्वरासभीक्षीरभोजनात्॥ उपायनं पुनः कुर्यात्तप्तकृच्छ्रं चरेन्मुहुरिति॥ यमोपि॥
मन्सुरापाने च कृते गोमक्षणेपि वा॥ तप्तकृच्छ्रपरिक्लिष्टो मौंजीहोमेन शुध्यतीति
स्वन्यश्चाचंडालान्नं द्विजो भुक्त्वा सम्यक्चांद्रायणं चरेत्॥ बुद्धिपूर्वं तु कृच्छ्राब्दं पुनः
संस्कारमर्हति॥ यस्तु देशांतरगतश्चिरकालोप्ययमाणोस्य हेतवः पुत्रादिनाकृत
प्रेतकार्यो यदि जीवन्समागच्छेत्तस्य पुनरुपनविधिरेक्तः॥ संग्रहे॥ जीवन्यदि समाग
च्छेद्धृतकुंभे निमज्ज्य च॥ उद्धृत्य स्नापयित्वास्य जातकर्मादि कारयेत्॥ स्मृतिचंद्रिका
यां बोधायनस्तु॥ सिंधुसौवीरसौराष्ट्रांस्तथा प्रत्यंतवासिनः॥ अंगवंगकलिंगांध्रा
गत्वा संस्कारमर्हति॥ प्रत्यंतो म्लेच्छदेशः हिमवत्कौशिकां विंध्यां परं पक्षस्य पश्चिमं॥
तीर्थयात्रां विना गत्वा पुनः संस्कारमर्हति॥ आदित्यपुराणे॥ सौराष्ट्रं सिंधुसौवीरा
नावंशं दक्षिणापथं॥ एतान्देशान्द्विजो गत्वा पुनःसंस्कारमर्हति॥ त्रिस्थलीसे
तो॥ कर्मनाशाजलस्पर्शात्करतोयाविलंघनात्॥ गंडकीबाहुतरणात्पुनःसंस्कारमर्हति॥

६१ इति पराशरस्तु॥ चिरत्रमत्वा शुद्ध्यर्थं प्राजापत्यं समाचरेत्॥ पंचगव्यं च कुर्वीत स्ना-
त्वा पीत्वा शुचिर्भवेत्॥ प्राजापत्याचरणं पंचगव्यस्नानं पंचगव्यप्राशनं च पुनः सं-
स्कारात्पूर्वमेव कार्यं॥ प्रायश्चित्तांते पुनः संस्कारं कुर्यादिति विष्णुस्मृतेः॥ तत्र विशे-
षमाह कश्यपः। चीर्णप्रायश्चित्तः प्राच्यामुदीच्यां वा दिशि गत्वा यत्र ग्रामपशूनां श-
ब्दो न श्रूयते तस्मिन्देशेऽग्निं प्रज्वाल्य ब्रह्मासनमास्तीर्य प्राक्तरणीतेन विधिना पु-
नः संस्कारमर्हति॥ पराशरः॥ अजिनं मेखलां दंडं भैक्षचर्याव्रतानि च॥ निवर्तंते द्वि-
जातीनां पुनः संस्कारकर्मणीति वपनमपि निवर्तत इत्याह विष्णुः॥ सर्वेष्वेतेषु द्वि-
जानां प्रायश्चित्तांते भूयः संस्कारं कुर्यात् वपनं दंडं मेखलां भैक्षचर्याव्रतानि पुनः
संस्कारकर्मणि वर्जनीयानीति॥ व्रतानि सौम्यप्राजापत्यादीनि महानाम्न्यादी-
नि वा॥ इति विधानपारिजाते प्रयोगपारिजातोक्तं पुनः उपनयनविधानं॥ ० ॥
अथ ब्रह्मचारिधर्माः॥ मनुः। उपनीय गुरुः शिष्यं शिक्षयेच्छौचमादितः॥ आ-

राम: ६१

चारमग्निकार्यं च संध्योपासनमेव च॥ यमः। मेखलामजिनं दंडमुपनीतं च नित्यशः। कौपी-
नं कटिसूत्रं च ब्रह्मचारी तु धारयेत्॥ अग्नीन्धनं भैक्षचर्यामधःशय्यां गुरोर्हितं॥ आस-
वर्तनात्कुर्यात्कृतोपनयनो द्विजः॥ आश्वलायनः। त्रिवृता मेखला कार्या त्रिवारं स्या-
त्समावृतौ॥ तिस्रस्तंतुद्वयः कार्याः पंचवासस्तु वा पुनः॥ प्रवरसंख्यानियम इति शि-
ष्टाः॥ अत्रोपनीतेनोपाकरणपर्यंतं गायत्र्या ब्रह्मयज्ञः कार्य इत्याहाश्वलायनका-
रिकारः उपाकरणपर्यंतं गायत्र्या ब्रह्मयज्ञकमिति॥ आश्वलायनः॥ अंजनाभ्यंजने
दूर्वारं गंधपुष्पाद्यलतान्वृतौ॥ वर्जयेत्पादुकं छत्रं यानोष्णीषवर्ध्यादिकान्॥ नाशयीतां
परिशिष्टं तु नाश्नुचैनः परे स्मृतः॥ नचासीत ननग्नश्वानीलौ कविस्मयद्युती॥ नालीकेना-
लिकेरं कर्महुलुं॥ मनसापि नचोद्दत्तं ध्यायुरोरशांकलंचन॥ गुरुवद्गुरुपत्नीषु तत्पुत्रा-
दिषु सर्वदा॥ प्रत्यक्षे वापरोक्ष प्रयमाश्रमि वेदादिनवाते स्नानव्रतास्वार्जाचयेदिनु॥ न-
स्नायं यौ भूमिस्पर्वती चेषु नमंडीयदितस्तन॥ भैक्षमात्रेऽशीयात्सायं प्रातर्गुरोः

भे सु

वसेत्॥ तदाज्ञया त्रिषवणस्नायात्तच्च स्यात्शुचिः॥ व्रती नोपवसेत्तत्तु पित्रोः संस्था-
नयोः कृते॥ देवर्षिपितृतृप्तिं च कुर्याद्गुर्वनुज्ञया॥ अच्छिन्नान्धारयेन्नित्यं दंडाजिनकं-
६२ मंडलून्॥ यज्ञसूत्रं पवित्रं च मेखलां च गुरौ वसन्॥ छिन्ने चैतेषु संगृह्य नवानन्यांस्तु
न द्विजः॥ विधिना सुप्रशस्तेनो छिन्नानप्सु विनिक्षिपेत्॥ छिन्ने चैतेषु दुष्टेषु प्राङ्नो
न्यधारणात्यजेत्॥ त्यागात्प्रायश्चित्तं स्यादन्यस्याकृ पूर्वं न त्यजेदित्यर्थः॥ सकृतां श्चरेतांये
षादिनमात्रं द्विजोत्तमः॥ कृच्छ्रेणा तेषां शुद्धिः स्यान्नान्यथा ब्रह्मचारिणः॥ प्रमादाद्ब्र रामः
थवा स्वप्ने निसर्गे रेतसो द्विजः॥ व्रती शुध्यति कृच्छ्रेण त्रिरात्रोपोषणेन वा॥ स्वेच्छया त्व- ६२
ज्ञानो रेतो मैथुनं वा प्रकुर्वतः॥ प्राजापत्येन चीर्णेन जपेन च शुचिर्भवेत्॥ मुक्त्वा तु स्वे-
लकाच्च नमस्त्वि प्रस्थ्य हजपेत्॥ अमत्यैकदिनं ज्ञानाद्व्या त्यागे स्यात्पुरोदितात्॥ नश्ना
वसतकस्यान्नं मातापित्रोर्मृते कृते॥ व्रतिनेष्ट्रोस्त्वबालोके॥ आद्यन्तं च न श्यते-
नमल्पयेच्चानां कूलमध्ये मैथुनमेव च॥ वर्जयेद्व्यञ्जनं लज्जादूपकांदीस्तथा व्रती॥

चरित्वा चतुरो वेदांस्त्रीन्द्वौ वैकमथापि वा॥ तोषयेद्दक्षिणाभिस्तु गुरुं भक्त्या विचक्षणः॥ ध
ना॥ न्यैर्गोदिसंभृतास्समाहृत्याप्यवापरान्॥ राजन्याद्वा गुरुस्संस्थ्यक्तो वये साधको व्रती
॥ व्रतांतरे संस्थितयोः पित्रोः कुर्यात्समीरितं॥ स समाप्य क्रियाः सर्वाः शिरःसंवस
रावधि॥ तयोः पितृत्वसंप्राप्तः प्रश्राद्देव समापयेत्॥ तद्व्रतं व्रतवान्विप्रो विधिवद्गुरु
चोदितः॥ गुर्वाज्ञातिभिः॥ कार्याद्ग्रामकिंपुरस्कृतेति॥ यमः॥ खट्वासनं च शयनं वर्जये
दंतधावनं॥ स्वपेदेकः कुरोक्षेव न रेतः स्कंदयेत्क्वचित्॥ कामपुरातोपि॥ नादद्याच्चैव-
वीक्षितनाचरेद्दंतधावनं॥ गुरूच्छिष्टं भेषजार्थं प्रयुंजीत नेकामतः॥ एतच्च व्याधिसादि
येवेदितव्यं॥ विद्योपदिष्टं मधुमांसादिकं गुरुणोद्दिष्टं हत्वा प्राश्नीयायादित्यर्थः॥ तथा
चैवसिष्ठः॥ चेच्छया धीयीत कामं गुरोरुच्छिष्टं हत्वा भेषजार्थं स्ववप्राश्नीयदिति॥ त-
याचरेत्स्य॥ तिः॥ अष्टौ तान्यव्रतघ्नानि आपो मूलं पयः॥ हविर्ब्राह्मणकाम्या च गुरोर्व-
चन मोषधं॥ रदमुद्दिष्टमपि रुव्यातिरिक्तं वर्ज्यं॥ तथा च वसिष्ठः॥ उच्छिष्टमगुरोरभ्यो-

र्त्तव्यमिति॥ आपस्तंबस्तु॥ पितुर्ज्येष्ठस्य च भ्रातुरुच्छिष्टं भोक्तव्यमिति॥ अन्यच्च मनुः॥ उत्स
दनं तु गात्राणां स्नापनोच्छिष्टभोजने॥ न कुर्याद्गुरुपुत्रस्य पादयोश्चावनेजनं॥ अभ्यंजनं
६३ स्नापनं च गात्रोत्सादनमेव च॥ गुरुपत्न्या न कार्याणि केशानां च प्रसाधनं॥ मातापि
त्रोर्विपत्तावपि ब्रह्मचारिणा शावाशौचं न कर्त्तव्यमित्याह स्मृतिचंद्रिकायां संवर्त्तः॥ मा
तापित्रोर्विपन्ने तु ब्रह्मचर्यस्थितः सुतः॥ स तत्र तस्यापि कुर्वीत अग्निपिंडोदकक्रियां॥ ते
नाशौचं न कर्त्तव्यं संध्याचैव न लुप्यति॥ अग्निकार्यं च कर्त्तव्यं सायं प्रातस्तथानेत्यशारति रामः
।कात्यायनोपि। न त्यजेत्सूतके कर्म ब्रह्मचारी स्वयं चरेदिति॥ अथ भिक्षाचरणं॥ तत्र व्या ६३
सः॥ ब्राह्मणक्षत्रियविशां चरेद्भैक्ष्यमन्वहं॥ सजातीयगृहेष्वेव सार्ववर्णिकमेव वा
॥ सार्ववर्णिकं भैक्ष्यचरणमापद्विषयं तथा च भविष्यत्पुराणे॥ चातुर्वर्ण्यं चरेद्भै
क्ष्यमलाभे कुरुनंदनेति॥ व्यापद्यपि शूद्रपक्वान्नं न गृह्णीयात्सदाहांगिराः॥ आमसे
वाददीतास्मादापत्तावेकरात्रकं॥ आमं दूर्यति संस्कारो धर्म्यं तेभ्यः प्रतीच्छतां॥ तस्मा

दामं गृहीतव्यं शूद्राद्व्यंगिरोब्रवीत्॥ एतदप्यापद्विषयं पराशरः॥ यस्तु वेदमधीयानः
शूद्रान्नमुपजीवति॥ शूद्रो वेदफलं याति शूद्रत्वं चाधिगच्छति॥ अन्यच्च॥ शूद्रान्नेनाद्
रस्थेन ब्राह्मणो म्रियते यदि॥ त्रिकलज्ञो वेदवेदी धर्मज्ञोप्याघडान्वितः॥ चतुर्वेद्यपि यो
विप्रः स प्रेतो जायते नरतिअनापद्यपि स्वजातीयेभ्योपि प्रशस्तेभ्य एव भैक्ष्यमाहरे
दित्याह मनुः॥ वेदयज्ञैरहीनानां प्रशस्तानां स्वकर्मणि॥ ब्रह्मचार्याहरेद्भैक्ष्यं गृहेभ्यः
प्रयतोन्वहं॥ कश्चिदपवादमाह स एव॥ गुरोः कुलेन भिक्षेत न ज्ञातिकुलबंधुषु॥ अला
भेत्वान्यगेहानां पूर्वं पूर्वं परिज्ञाप्य तु॥ सर्वं वापि चरेद्ग्रामं पूर्वोक्तानामसंभवे॥ निय
म्य प्रयतो वाचमभिशंस्तांस्तु वर्जयेत्॥ तच्च भैक्ष्यं भोजनपर्याप्तमेवाहर्त्तव्यमित्या
ह यमः॥ आहारमात्रादधिकं न क्वचिद्भैक्ष्यमाहरेत्॥ युज्यते स्तेनदोषेण काम
तोधिकमाहरन्॥ उदकुंभं सुमनसो गोशकृन्मृत्तिकाकुशान्॥ आहरेद्यावद
र्थानि भैक्ष्यं चाहरहश्चरेत्॥ निषिद्धमन्नमाहात्रिः॥ हस्तदत्तास्तु या भिक्षा लवणं व्यंजनानि च॥

शुक्लान्यशुचितां यांति दातास्वर्गं न गच्छति ॥ माधूकरीयमादाय ब्राह्मणोभ्यः प्रयच्छति-
स याति नरकं घोरं भुंजानो निरयस्तथा ॥ गौतमः ॥ निवेद्य गुरवे भिक्षां भुंजीत नाख्यं नियो-
६४ गुरोस्तद्भार्यापुत्रसब्रह्मचारिष्विति चान्वहमिति ॥ याज्ञवल्क्यः ॥ कृताग्निकार्यो भुं-
जीत वाग्यतो गुर्वनुज्ञया ॥ आपोशानक्रियापूर्वं सत्कृत्यान्नमकुत्सयन् ॥ सत्कारश्च
हारीतेन दर्शितः ॥ भैक्षमेवाहृतं पर्यग्निकृतमादित्यदर्शितं गुरवे वेदितमनुज्ञातं समा-
तसंमितं प्राकुर्यद्भैक्षं ॥ विब्रह्मचारसब्रह्मसिद्धिमवाप्नोतीति ॥ ब्रह्मचारिणामेका- राम:
न्ननिषेधमाह मनुः ॥ भैक्षेण वर्त्तयेन्नित्यं नैकान्नादी भवेद्व्रती ॥ भैक्षेण व्रतिनो वृ- ६४
त्तिरुपवाससमा स्मृता ॥ व्रतेवावेदादेवत्ये पित्र्यकर्मण्यथर्षिवत् ॥ काममभ्यर्थि-
तोऽश्नीयाद्व्रतमस्य न लुप्यते ॥ अकरणे प्रत्यवायमाह स एव ॥ अकृत्वा भैक्षचरण-
मसमिध्य च पावकं ॥ अनातुरः सप्तरात्रमवकीर्णिव्रतं चरेदिति भिक्षाचरणवि-
धानं ॥ अथाग्निकार्यविधिः ॥ तत्राश्वलायनकारिका ॥ अग्निकार्यं च भिक्षायाः ॥

प्राग्यद्वा तदिष्यते ॥ पदद्ग्नोद्धरणे स्यातामादावंते च कर्मणः ॥ मनुः ॥ दूरादाहृत्य समि-
धः सन्निदध्याद्विहायसि ॥ सायं प्रातश्च जुहुयात्ताभिरग्निमतंद्रितः ॥ विहायसि अं-
तरिक्षे ॥ समिदाहरणविधिमाह ॥ वैशंपायनः ॥ पुरस्तमयात्प्रागुदीचीं दिशं गत्वा
हिंसन्नरण्यात्समिधमाहरेदग्निकाद्यकामः शुष्कां ब्रह्मवर्चसकाम उभयीमु-
भयकाम इति ॥ समित्स्वरूपमाह कात्यायनः ॥ नांगुष्ठादधिका कार्या समित्स्थूलत-
या क्वचित् ॥ न वियुक्ता त्वचा चैव न सकीटा न पाटिता ॥ प्रादेशान्नाधिका न्यूना न त-
था न स्याद्विशाखिका ॥ न सपर्णा न निर्वीर्या होमेषु तु विजानता ॥ विशीर्णा विदला
ह्रस्वा वक्राः ससुषिराः कृशाः ॥ दीर्घाः स्थूला घुणैर्दुष्टाः कर्मसिद्धिविनाशकाः ॥ स-
मिन्नियमो वायुपुराणे ॥ पलाशस्य समिधः कार्याः खादिर्यस्तदलाभतः ॥ शमीरोहितका-
श्वत्थी तदभावेऽर्कवेतसौ ॥ अग्निकारणे प्रत्यवायमाह हारीतः ॥ पुरा जग्राह वै
मृत्युर्हिंसयन्ब्रह्मचारिणं ॥ अग्निस्तं मोचयामास तस्मात्परिचरेद्धितं ॥ ब्रह्मचा-

६५ रीयदात्वग्नावादध्यात्समिधो न द्विगस्त्री यात्तं तदा मृत्युरादध्यात्समिधस्ततइति तद
करणे प्रायश्चित्तमुक्तं विधाने। मानस्तोके जपेन्मंत्रं ज्ञात्वा संख्यं शिवालये। अग्निका
र्यं विना भुंक्ते पापं न ब्रह्मचारिणा रति। इदं तु स्वच्छंदतोपे। अस्वच्छंदोपे तु मनुः। अकृत्वा
भैक्षचरणमसमिध्य च पावकं॥ अनातुरः सप्तरात्रमवकीर्णिव्रतं चरेत्। इत्यग्नि
कार्यविधिः॥ अथाभिवादनविधिः॥ तत्कालमाह यमः। ततोभिवादयेद्वृद्धो नग्निका
र्यादनंतरमिति। तत्प्रकारमाहाचार्यः। वामं वामेन संस्पृश्य दक्षिणेन तु दक्षिणं॥ राम: ६५
हस्तेन कर्णौ हस्ताभ्यां गुरूणामभिवादनं॥ वामोपरि करं कृत्वा दक्षिणं नामचो
चरेत्तु॥ अनुप्रभृति पार्श्वात् मारभ्यापदयोर्नमेत्तु॥ एतच्च प्रत्युत्थाय कर्तव्यं। तदा
हापस्तंबः। ऊर्ध्वं प्राणा ह्युत्क्रामंति यूनः स्थविर आगते॥ प्रत्युत्थानाभिवादाभ्यां
पुनस्तान्प्रतिपद्यते॥ विष्णुः। शिष्याणामाशिषं दद्यात्पादोपसंग्रहणं गुरोः स्पृष्ट्वा
कर्णौ तु विदुषां सर्वेषां चैकपाणिना॥ अत्रिरपि। दक्षिणं पाणिमुद्धृत्य प्रकाम

मभिवादयेत्॥ श्रोत्रिये जैत्वंत्रिः कार्यः पादोपसंग्रहणं गुरोः। ब्राह्मणः समाजेभिवादन
प्रकारमाह। मनुः। लौकिकं वैदिकं वापि तथाध्यात्मिकमेव वा। योददाति यतो ज्ञानं
तं पूर्वमभिवादयेत्॥ नामधेयस्य ये केचिदभिवादनं ज्ञानेति॥ तान्प्राज्ञोहमिति
ब्रूयात्स्त्रियः सर्वास्तथैव च॥ यः पुनः जानन्नपि आशिषं न ददाति तस्य दोषोभिहि
तो भविष्यपुराणे॥ अभिवादकाय यस्तु न रोत्यभिवादनं॥ आशिषं वा न कुरुते
स याति नरकं घोरं। तत्फलमाह मनुः। अभिवादनशीलस्य नित्यं वृद्धोपसेविनः।
चत्वारि तत्र वर्द्धंते आयुः प्रज्ञा यशो बलमिति॥ स्मृत्यर्थसारे॥ विप्रोष्य तु पादग्रा
ह्यो ज्ञातिस्त्री वधिर्योषितः॥ विप्रोष्य विप्रं कुशलं पृच्छेत्क्षत्रमनामयं॥ वैश्यं क्षेमं
समागम्य शूद्रमारोग्यमेव च॥ नवाच्यो दीक्षितो नाम्ना यवीयानपि यस्य वै॥ द
ज्ञैस्तमभिभाषेत भोभवक्रमनीनामभिः॥ परपत्नी मसंबंधा भगिनी च वेति भाष
येत्तु। त्रिवर्षपूर्वः श्रोत्रियोभिवाद्यः। अत्रिवर्षाः। संबंधिनः श्रेष्ठत्वेनापि स्वयोनिजाः॥

अंत्येचजानवृद्धाः सब्रह्मचारी चाभिवाद्याः॥ अप्यनभिवाद्यास्तत्रैव॥ उदक्यां सूतिकां
नारीं भर्तृघ्नीं गर्भघातिनीं॥ पाषंडं पतितं व्रात्यं महापातकिनं शठं॥ नास्तिकं कितवं
६६ स्तेनं कृतघ्नं नाभिवादयेत्॥ मत्तं प्रमत्तमुन्मत्तं धावंतमशुचिं नरं। वमंतं जृंभमाणं च
कुर्वंतं दंतधावनं॥ अभ्यक्तशिरसं स्नानं कुर्वंतं नाभिवादयेत्॥ जपयज्ञजलस्थं च स
मित्पुष्पकुशानलान्॥ उदपात्राग्निभैक्षान्नं वहंतं नाभिवादयेत्॥ अभिवाद्य द्विजश्रे
तानहोरात्रेण शुध्यति॥ अहोरात्रेणोपोषितेनेति शेषः॥ स्त्रैवैव वृथाभिवादने च
विप्रस्यैदमेव प्रायश्चित्तं॥ शूद्राद्यभिवादने त्रिरात्रं॥ कार्यं तु रजकादिषु॥ कार्यं रामः ६६
प्राजापत्यमित्यर्थः॥ चंडालादिषु चांद्रं स्यादिति संग्रहस्मृते॥ देवताप्रतिमां दृष्ट्वा
यतिं च त्रिदंडिनं॥ नमस्कारं न कुर्याच्चेदुपवासेन शुध्यति॥ सर्वेषामपि नमस्का
र्याः सवर्णस्य तु सुरा वदा॥ अभिवादनमस्कारस्तथा प्रत्यभिवादनं॥ आशीर्वा
द्यान्नमस्कार्यं वयस्यस्तु पुनर्भवेत्॥ स्त्रियो नमस्कारुद्धा आवयोः सा पत्युरेवतात्त

तोधीयीत वेदांश्च स्वाध्याये गुरुः शिथिलः॥ तथा आत्मनाम गुरोर्नाम नामातिकृपण
स्य च॥ आयुष्कामो न गृह्णीयाज्ज्येष्ठापत्यकलत्रयोरिति स्मरणाद्धुवादिनाम न ग्रा
ह्यं॥ रतिविधानपारिजाते अभिवादनविधानं॥ अथ ब्रह्मचर्यकालः॥ तत्र योगीश्व
रः॥ प्रतिवेदं ब्रह्मचर्यं द्वादशाब्दानि पंच वा॥ ग्रहणांतिकमित्येके केशांतश्चैव षो
डशे॥ केशांतो नाम गोदानं॥ वेदानधीत्य वेदौ वा वेदं वापि यथाक्रमं॥ अविप्लुतब्र
ह्मचर्यो लक्षण्यां स्त्रियमुद्वहेदिति॥ रत्युपकुर्वाणब्रह्मचारिधर्माः॥ अथ नैष्ठि
कब्रह्मचारिधर्माः॥ तत्र याज्ञवल्क्यः॥ नैष्ठिको ब्रह्मचारी तु वसेदाचार्यसन्निधौ
तदभावेऽस्य पत्न्यां वै अग्नौ वापि वा॥ मनुरपि॥ यदि त्वात्यंतिकं वासं रोचयेत स्वगु
रोः कुले॥ युक्तः परिचरेदेनमाशरीरविमोक्षणात्॥ आचार्ये तु खलु प्रेते गुरुपुत्रे गु
णान्विते॥ गुरुदारे सपिंडे वा गुरुवद्वृत्तिमाचरेत्॥ एतेष्वविद्यमानेषु स्थाना
सनविहारवान्॥ प्रयुंजानोऽग्निशुश्रूषां साधयेद्देहमात्मनः॥ वसिष्ठोऽपि॥ ब्रह्मचर्यं चरे

६७

द्धीमानाच्छरीरविमोक्षणात् ॥ आचार्ये तु खलु प्रेते तेन तत्तनयादावग्निं परिचरेद्यतवाक्कु
तुर्थषष्ठाष्टमेकाले भैक्षाशी गुर्वधीनो बद्धांजलिः शिखी वा गुरुं गच्छंतमनुगच्छे
दासीनमुपतिष्ठेच्छयानमपदासीत आहूताध्यायी सर्वलब्धं निवेदी खट्वाशयनदंत
प्रक्षालनाभ्यंजनस्त्रीवस्नानाभ्यंजनेवज्रीस्नानास्नानशौचस्त्रिरन्होभ्युपेयादप
रति ॥ त्रिरिति ब्रह्मचारी स्नायी स्यात्प्रियवर्जी ॥ एवं कुर्वतः फलमाह मनुः ॥ आसमा
प्तेः शरीरस्य यस्तु शुश्रूषते गुरुं ॥ स गच्छत्यंजसा विप्रो ब्रह्मणः सद्म शाश्वतमिति ॥ राम: ६७
याज्ञवल्क्योपि ॥ अनेन विधिना देहं सादयन्विजितेंद्रियः ॥ ब्रह्मलोकमवाप्नोति न
चेह जायते पुनः ॥ यत्तु हारीतः द्विविधाः स्त्रियो ब्रह्मवादिन्यः सद्योवध्वश्च तत्र ब्र
ह्मवादिनीनामुपनयनमग्नीधनं वेदाध्ययनं स्वगृहे भैक्षचर्येति । तद्युगांतरविष
यं ॥ पुराकल्पे कुमारीणां मौंजीबंधनमिष्यते । अध्यापनं च वेदानां सावित्रीवाच
नं तथेति यमेन विशेषोक्तेः एवमुपकुर्वाणस्य नैष्ठिकस्य च धर्मा उक्तास्तयोर्ब्र

तोपहतोपविशेषप्रायश्चित्तमुच्यते ॥ तत्र शातातपः ॥ ब्रह्मचारी तु योश्नीयान्मधु
मांसं कथंचन । प्राजापत्यं चरेत्कृच्छ्रं मौंजीहोमेन शुध्यति ॥ भिक्षाशनमकृत्वा यः
स्वस्थो ह्येकान्नमश्नुते । अस्नात्वा चैव यो भुंक्ते गायत्र्यष्टशतं जपेत् ॥ दिवा स्वपिति
यः स्वस्थो ब्रह्मचारी कथंचन । स्नात्वा सूर्यं समभ्यर्च्य गायत्र्यष्टशतं जपेत् ॥ सूत
कान्नं नवश्राद्धं मासिकान्नं तथैव च । ब्रह्मचारी तु योश्नीयात्त्रिरात्रेणैव शुद्ध्य
ति ॥ कृच्छ्रविधाने ॥ एकोद्दिष्टे ब्रह्मचारी प्रजपेद्युनिरतुभिः ॥ पादं भुंक्ते ब्रह्मचारी
मुच्यते किल्बिषात्ततः ॥ अरिष्टे मिजपेत्पादं षोडशे भोजयेद्यदि ॥ पंचायुतं ब्रह्म
चारी जले वा कृत्स्नबंधनं ॥ तत्र्योमित्रो जपेत्पादं वर्षोत्सर्गे च भोजयेत् ॥ त्रिवाल ये
ब्रह्मचारी त्वयुतं नैव दुष्कृतं ॥ अयुत जिष्ट पादं चन्द्रनेमं दुः जपेद्यदा ॥ अयु
तं चेद्ब्रह्मचारी तदा पापात्प्रमुच्यते ॥ अदितिः प्रजपेत्पादं सपिंडीं भोजयेद्य
दि ॥ अयुतं चेद्ब्रह्मचारी नरकान्मुच्यते तदा ॥ धर्मा— मंतान्मेत्रं च शतवारं यदा तदा ॥

व्रतलोपे ब्रह्मचारी मुक्तिकाले न किल्बिषं। पाराशर प्रायश्चित्तकौतुके रहस्यमख-
।मासिकादिषु नाश्नीयाद्समाप्तव्रतो द्विजः। त्रिरात्रमुपवासोत्र प्रायश्चित्तं विधी-

यते। प्राणायामशतं कृत्वा घृतं प्राश्य विशुध्यतीति। रहस्यज्ञानविषयं। ज्ञान-
पूर्वके तु स्मरणं। मधुमांसं च योश्नीयाच्छ्राद्धे सूतिकमेव वा। प्राजापत्यं चरेत्कृच्छ्रं
व्रतशेषं समापयेदिति। अनृतप्रायश्चित्तमाह गर्गः। त्रिरात्रमेकरात्रं वा ब्रह्म-
चार्यनृते चरेत्॥ कृच्छ्रमित्यनुषज्यते। स्त्रीसंगे याज्ञवल्क्य आह। अवकीर्णी
भावं कृत्वा ब्रह्मचारी तु योषितं॥ गर्दभं पशुमालभ्य नैर्ऋतं स विशुध्यति। मनु-
रपि। अवकीर्णी तु काणेन गर्दभेन चतुष्पथे। स्थालीपाकविधानेन यजेत्त-
निर्ऋतिं निशीति। शातातपस्तु। ब्रह्मचारी तु यो गच्छेत्स्त्रियं कामेन पीडितः प्राजा-
पत्यं चरेत्कृच्छ्रमब्दमेकं समाहितः। निर्वपेच्च पुरोडाशं ब्रह्मचारी तु पर्वणि। मं-
त्रैः शाकलहोमाद्यैरग्नौ कैवाज्यं च हावयेत्॥ मैथुनमष्टांगमित्याह दक्षः॥

ब्रह्मचार्यं सदा रक्षेदष्टधा वारणं पृथक्॥ स्मरणं कीर्तनं केलिः प्रेक्षणं गुह्यभा-
षणं॥ संकल्पोऽध्यवसायश्च क्रियानिर्वृत्तिरेव च। एतन्मैथुनमष्टांगं प्रवदंति मनी-
षिणः॥ विपरीतं ब्रह्मचर्यं ब्रह्मा प्राह प्रजापतिः। नष्टं भवतीति शेषः॥ न ध्यातव्यं न व-
क्तव्यं न श्रोतव्यं कथंचन। एतैः सर्वैः सुनिष्पन्नो यतिर्भवति नान्यथा॥ शुनादष्ट-
स्य प्रायश्चित्तमाह पराशरः। ब्रह्मचारी शुना दष्टस्त्र्यहं सायं पयः पिबेत्॥ गृहस्थ-
स्तु द्विरात्रं वाप्येकाहं चाग्निहोत्रवान्॥ नाभेरूर्ध्वं तु दष्टस्य तदेव द्विगुणं भवेत्
॥स्यादेतत्त्रिगुणं वक्त्रे मस्तके च चतुर्गुणं॥ एतत्प्रायश्चित्तं सवर्णनैष्ठिकेन द्विगु-
णं कार्यमित्याह हारीतः॥ उपकुर्वस्तु यत्कुर्यात्कामतोऽकामतोपि वा। तदेव द्विगु-
णं कुर्याद्ब्रह्मचारी समाहितः॥ सकृत्तौ श्मरतां चेपां दिनमात्रं द्विजातिनां। कृ-
च्छ्रेण तेषां शुद्धिः स्यात्। अन्यथा ब्रह्मचारिणां॥ प्रमादाद्यश्च स्वपेपि विसगौ रे-
त सो द्विजः। व्रती स शुध्यति कृच्छ्रेण त्रिरात्रोपोषणेन वा स्वच्छया स्नातोरेतो मे

दि. १०

युनं वा प्रकुर्वते ॥ ० ॥ प्राजापत्येनाचीर्णेन जपेन च शुचिर्भवेत् ॥ तं वा धियाजपेन्मं
त्रं लक्षं चैव जाबालये । ब्रह्मचारी स्वधर्मे चैव स्खलनं चेदपाक्रामेत् इति तदितिशृग्विधानवच
नम स्योपपात परं स्यादि ब्रह्मचारी प्रायश्चित्त विधानं ॥ अथोपाकरणयुक्ते दि
वसे विदधीते तदुपाकर्मयथोदितं ॥ अध्यायोपकृतिं कुर्यात्त्रौपासनवह्निने
ति । श्रवणस्य रवं उक्ष्यास्याः । धनिष्ठासंयुते कुर्यात् श्रवणे कर्मयन्नवेत् ॥ तत्कर्म
स्यकृतं ज्ञेयमुपाकरणसंज्ञितं ॥ श्रवणेन तु यत्कर्म ह्युत्तराषाढसंयुतं ॥ संवत्सर
कृतोध्याय स्तत्क्षणादेव नश्यति । यत्तु । अध्यायानामुपाकर्म श्रावण्यां श्रवणे
वा । हस्ते नौषधिभावे वा पंचम्यां श्रावणस्य चेति याज्ञवल्क्यादिभिः केवलायाः
श्रावण्याः पंचम्यां अग्रहणं तद्वाजसनेयिविषयं । संक्रांतिर्ग्रहणं वापि पौर्ण
मास्यां पदा भवेत् । उपाकृतिस्तु पंचम्यां कार्या वाजसनेयिभिरिति प्रयोगपारि
जाते वचनात् ॥ अत्रस्य च मारुगार्ग्यः । पर्वण्यौदयिके कुर्युः श्रावण्यां तैत्तिरीयकाः ॥

राम: दि. १०

बह्वृचाः श्रावणे कुर्युर्ग्रहसंक्रांतिवर्जिते इति । उदयव्यापिनी चैव विहन्त्वा खर्वघटिकाद्वयी ॥
तत्कर्मफलं ज्ञेयं तस्य पुरश्चरणं नतं ॥ अत्र कालविशेष माहवृद्धमनुः ॥ अर्द्धरात्रादध
स्तात्तु ग्रहसंक्रमणं तथा ॥ नोपाकर्म तदा कुर्यात् श्रावण्यां श्रवणे न चेति ॥ कात्यायनो
पि ॥ अर्धरात्रादधस्तात्तु संक्रांतिर्ग्रहणं तदा । नुपाकर्म न कुर्वीत परतश्चेन्न दोषकृत् ॥
भृगुस्तु प्रेते राजनि राष्ट्रे वा परचक्रादिपीडिते ॥ मनुस्मृतौ जेनावष्यां नोपाकुर्यादधि
पं श्लेष्मणा इति । वसिष्ठोपि ॥ मनुस्मृतौ जेन्टप तो विनष्टे सूतके मृते राष्ट्रसमाकुले च । उत्स
र्जनोपाकरणे न कार्ये ग्रस्ते दुस्से येगुरुरस्तपाले ॥ यस्तु वेदोपाकरणे प्राप्ते कुली
रे स्थास्थिरवौ । उपाकर्म न कर्त्तव्यं कर्त्तव्यं सिंहयुक्तके रतिविरुद्धवचनं ॥ तद्देशांत
र विषयं ॥ तथा च बृहस्पतिः ॥ नर्मदोत्तर भागे तु कर्त्तव्यं सिंहयुक्तके । कर्कटे संस्थि
ते भानावुपाकुर्यात्तु दक्षिणे इति । स्मृत्यर्थसारेपि । श्रवणे भाद्रे च घटिका चतुष्ट
याभिजिच्च सूत्राचर्यवर्जं । श्रवणरवं डे स्यातिधनिष्ठासंयुतं ग्राह्यं मोत्तराषाढसं

युतं।हस्तनक्षत्रं प्रयोगपर्यासंग्राह्यं।सूतकादिविप्लवसंभवे वौषध्युत्पन्न्यभावे वा श्राव
णभाद्रपदयोरेकस्मिन्दिने भद्रासंक्रांतिवर्जिते कार्यं।कर्मलोपो न लोपो नोत्कर्षः
८० ।अथैलिस्मस्मर्यं सारे।।मनुः।श्रावण्यां प्रौष्ठपद्यां वाप्युपाकृत्य यथाविधि।।युक्तश्छं
दांस्यधीयीत मासान्विप्रोर्द्धपंचमानिति।अपिशब्देन भाद्रपदे पंचमीहस्तश्रवणा
नामुपादानमिति हेमाद्रौ व्याख्यातं।यत्पुनर्नतु वचनं।शुक्लेमेदेप्युपाकृत्य विद्यावि
तविनाशनं।।आयुष्यमवाप्नोति तस्मात्तत्कर्म वर्जयेत् कश्यपीयमपि।गुरुशुक्रके राम:
तिरोधाने वर्जयेच्छ्रुतिचोदितान्।।इत्याह भगवान्यमः।।श्रवणं तु विशेषतइतिः ८०
तदेतदप्रथमोपाकर्मविषयं।गुरुभार्गवयोर्मौढ्ये बाल्ये वा वार्धकेपि वा।।तथा
धिमासस्सर्पे मलमासादिषु द्विजः।।नोपाकुर्यात्प्रथमतः।।कृतं कर्म विनाशके
दिति।।संग्रहकारवचनात्।।स्मृतिसमुच्चयेपि।यज्ञोपवीतं कर्तव्यं श्रावण्यां गुरुशु
क्रयोः।।मौढ्येपि वार्धके बाल्ये नित्यवत्कर्म चोदितमिति।स्मृतिभास्करेपि।।०।।

चंडांशोर्मंडलं प्राप्तो यदा शुक्रस्तदा स्यात्।।सर्वकर्मनिवृत्तिः स्यान्नित्यं नैमित्तिकं विने
ति।।स्मृत्यंतरेपि।।नित्ये नैमित्तिके जाप्ये होमयज्ञक्रियासु च।।उपाकर्मणि चोत्सर्गे ग्र
हवेधो न विद्यत इत्य।तद्द्वितीयादिविषयं।।तदप्यधिमासे न कार्यमित्याह चंद्रि
कायां ज्योतिःपराशरः।उपाकर्म तथोत्सर्गः प्रसवाहोत्सवाष्टकाः।।मासवृद्धौ परे
कार्या वर्जयित्वा तु पैतृकमिति।प्रसवाहोत्सवो जातेष्टिः।जातकर्म रोगजननका
ले एव विहितत्वात्।।परे उत्तरे मासीत्यर्थः।कात्यायनोपि।उत्कर्षः कालवृद्धौ स्या
दुपाकर्मादिकर्मणि।अभिषेकादिवृद्धीनां न त्वेकेष्वयुगादिषु।यत्तु ऋष्यशृंगव
चनं।दशाहरासु नोत्कर्षश्चतुर्ष्वपि युगादिषु।उपाकर्म महापक्ष्योद्वैतदिव
वृषादितरतितच्छंदोगविषयं।तेषां कालत्वदावपि सिंहार्क एवोपाकर्म भवति
।तथा च गार्ग्यः।सिंहे रवौ तु पुष्यर्क्षे पूर्वाह्णे विचरेद्बहिः।छंदोगा मिलिताः कुर्युरु
त्सर्गं स्वस्वच्छंदसां।।शुक्लपक्षे तु हस्तेन उपाकर्मापराह्णिकमिति।निषिद्धं चेत्

॥श्री॥ क्रियते तदा दोषमाह सत्यव्रतः। ग्रहचेद्दोषसंयुक्ते पर्वणि स्यादुपाक्रिया। दुःख
शोकमयाग्रस्ता राष्ट्रं। तस्मिन्द्विजा तरति। एतन्न च मध्याह्ने दृष्टे किं कर्तव्यं। तथा चोक्तं हे
५१ माद्रौ। उपाकर्मापराह्णे स्यादुत्सर्गः प्रातरेव चेति॥ गोभिलोपि॥ अध्यायानामुपा
कर्म कुर्यात्कालेऽपराह्णके। पूर्वाह्णे तु विसर्गः स्यादिति वेदविदो विदुरिति॥ एव
मुक्तप्रकारेण कालशुद्धिं विज्ञाय स्वस्वसूत्रोक्तप्रकारेणोपाकर्म कार्यं नु॥ केचि
च्छिदं कर्मद्वयं लौकिकाग्नौ कार्ममिसाहुः। तथा चाश्वलायनकारिका। कर्मद्वय रामः
मिदं केचिद्दृष्टा लौकिकेऽग्नौ प्रकुर्वते॥ त्वास्त्वं संस्कारपर्यन्तमुपलेपादि पूर्ववदिति॥ ७१
अत्रेति कर्तव्यता विशेषो भविष्योत्तरपुराणे॥ संप्राप्ते श्रावणस्यान्ते पौर्णमास्यां
दिनोदये। स्नानं कुर्वीत मतिमान् श्रुतिस्मृतिविधानतः॥ ततो देवानृषीन्पितॄंश्चैव त
र्पयेत्परमांभसा। उपाकर्मणि चैवोक्तमृषीणां चैव तर्पणं॥ कुर्वीत ब्राह्मणा
श्राद्धं देवेपानुद्दिश्य शक्तित इति। कात्यायनिस्तु। उपाकर्मणि चोत्सर्गे यथाकालं

कालं समेत्य च॥ ऋषीन्दर्भमयान्कृत्वा पूजयेत्तर्पयेत्ततः इति। बौधायनोपि॥
पूजयित्वा यथाशक्ति तर्पयेच्च ततः ऋषीन्॥ गोतमादीनृषीन्सप्त कृत्वा दर्भमयान्पुनः॥
पूजयित्वा यथाशक्ति तर्पयेद्दशमुच्चरन्निति। स्मृतिभास्करे व्यासस्तु। विष्टरं सप्तभि
र्दर्भैर्द्वादशांगुलदैर्घ्यकं। चतुरंगुलमग्रं स्यात्क्रमिमेकांगुलं तथा॥ प्रदक्षिणाग्रमं
ह्येत्वा ऋषीनावाह्य पूजयेत्॥ ऋषीणामर्चनं सर्वं कर्तव्यं च निवीतिना॥ आसनं पा
द्यमर्घ्यं च स्नानं पंचामृतैः पृथक्॥ वस्त्रोपवीतं गंधाक्षपुष्पाण्याभरणानि च॥
धूपदीपबलिं दत्वा नत्वा स्तुत्वा तथोदकैः। तर्पयित्वा यथान्यायं गृह्योक्तेन विधिना
ततः इति॥ वायुपुराणे तु। उपाकर्मणि विप्रेभ्यो दद्याद्यज्ञोपवीतकं। आयुष्मान् जायते
तेन कर्मणा मानवो भुवीति। वेदोपाकरणविषये विशेषमाह व्यासः। दर्भासीनो द
र्भकरः प्राङ्मुखो वाप्युदङ्मुखः॥ उपक्रमेत वेदादौ वेदे वेदमेव वा॥ प्रण
वं प्राक् प्रयुंजीत व्याहृतीः प्रणवं ततः॥ पश्चाद्दृचं त्रिरसात्सावित्रीमनुवाच्य च॥

उपक्रमेत्ततो मंत्रानादौ च ब्राह्मणं ततः। तथोपनिषदं कल्पं रहस्यान्यपि शक्तितः॥ अधी
त्य प्रणवं चोल्कामूर्मिस्पृष्टाजले स्थितेन तु। नमस्कृत्वा ततो दद्यानूर्ध्वीकृत्य गुरूनपीति॥
७२ अत्र ब्रह्मचारिविषये विशेष उक्तः कालादर्शे। मौंजीयज्ञोपवीते च नवं दद्याच्च धारयेत्॥
कटिसूत्रं चैव नवं वस्त्रांतरीयं च॥ ग्रंथांतरेपि। दंडानोपवीतानि मेखलां कटिसूत्रकं॥ कृ
त्वोपाकरणं कृत्वा ततः स्वाध्यायमारभेत्॥ पुराणानि विसृज्याथ पुनः पुनरिति क्रमात्॥
एतदुपाकर्म गृहस्थस्याप्यावश्यकमित्याह व्यासः। वेदव्रतानि कृत्वैव विप्रो यद्युद्वहेत्तदा॥ रामः
अधीयीत गृहस्थोपि नियमाद् ब्रह्मचारिवदिति। गोभिलोपि। उपाकर्मोत्सर्जनं च वन ७२
स्थानामपीष्यते॥ धारणाध्यापनं गत्वा गृहिणां ब्रह्मचारिणामिति॥ अस्य फलमा
ह कात्यायनः॥ प्रत्यब्दं यदुपाकर्म सोत्सर्गं विधिवद्द्विजैः॥ क्रियते छंदसां तेन पुनरा
प्यायनं भवेत्॥ अयातयामैश्छंदोभिर्यत्कर्म क्रियते द्विजैः। क्रीडमानैरपि सदा तत्ते
षां वृद्धिकारणं॥ उत्सर्जनं च वेदानामुपाकरणकर्म च। अकृत्वा वेदजाप्येन फलं ना

प्नोति मानवः इति। अथोत्सर्जनकालः॥ तत्र याज्ञवल्क्यः। पौषमासस्य रोहिण्यामष्टकाया
मथापि वा। जलांते छंदसां कुर्यादुत्सर्गं विधिवद्बहिः॥ हारीतः। अर्द्धपंचमान्मासानधी
त्योर्ध्वमुत्सृजतीति॥ पद्धतौ तूत्सर्जनमुपाकर्मदिने कार्यं तच्चाचारादिरगृह्यं। पुष्ये तूत्स
र्जनं कुर्यादुपाकर्मदिनेथवेति। तस्मिन्नब्दे आरब्धोपाकर्मोत्सर्जने नरैः पूर्वमुत्सर्ज
नं कृत्वा तदनंतरमुपाकर्म कार्यमिति विवेकः॥ इति श्रीमदनंतभट्टविरचिते विधान
पारिजाते उपाकर्मोत्सर्जनविधानं॥ ० ॥ अथेदानीमध्ययनविधानं॥ याज्ञवल्क्यः।
वेद एव द्विजातीनां निःश्रेयसकरः परः। यं यं तु मधीयीत तस्य तस्याप्नुयात्फलं॥
स्मृतिसमुच्चयेपि। वेदो यस्य शरीरस्थो न स पापेन लिप्यते॥ वेदाभ्यासस्तु विज्ञेयः श
रीरं किं प्रयोजनं॥ ऋग्विधानेपि॥ वेदाक्षराणि यावंति पठितानि द्विजोत्तमैः। तावंति
हरिनामानि कीर्त्तितानि न संशयः॥ यस्य वेदश्च वेदी च विच्छिद्येते त्रिपूरुषं। स वै
दुर्ब्राह्मणो नाम स्यात्सर्वकर्मबहिष्कृतः॥ नित्ये नैमित्तिके काम्ये यच्चान्यत्कर्म वैदिकं॥

अनधीतस्य विप्रस्य सर्वं भवति निष्फलं ॥ अनधीत्य द्विजो मस्तु शास्त्राणि च बहून्यपि ॥
शृणोति ब्राह्मणो नाशं नरकाणि प्रपद्यते ॥ नाश्नाशीरनाशेस्तीर्थ्यपः ॥ नाधीतवे
७२ दो विप्र आचारेषु प्रवर्त्तते ॥ नाचारफलमाप्नोति यथा शूद्रस्तथैव च ॥ अनधीतस्य वि
प्रस्य पुत्रो वाध्ययनान्वितः ॥ शूद्र पुत्रः स विज्ञेयो न देवफलमश्नुते ॥ स्कांदे ॥ अनभ्यासा
च्च वेदानामाचारस्य च लंघनात् ॥ आलस्यादन्नदोषाच्च मृत्युर्विप्रं जिघांसतीति ॥ त रामः
स्माद्ब्राह्मणो वश्यं वेदोध्येतव्यः ॥ मनुस्तु ॥ अब्राह्मणादध्ययनमापत्काले विधीयते ॥ अ ७३
नुव्रज्यादि शुश्रूषा यावदध्ययनं गुरोरिति ॥ वेदस्य रूपमाह वसिष्ठः ॥ पारंपर्यागतो ये
षां वेदः सपरिबृंहणाः ॥ तच्छाखं कर्म कुर्वीत तच्छाखाध्ययनं तथा ॥ स्वशाखां वा परित्य
ज्य पारक्यमधिगच्छति ॥ स शूद्रवद्बहिष्कार्यः सर्वकर्मसु साधुभिः ॥ न जातु परशाखोक्तं
बुधः कर्म समाचरेत् ॥ आचारन्परशाखोक्तं शाखारंडः स उच्यते ॥ अधीत्य शाखा
मात्मीयां परशाखां ततः पठेत् ॥ तच्छाखीयैस्तु संस्कारैः संस्कृतो ब्राह्मणो भवेत् ॥

तच्छाखाध्यायनं कुर्यान्नान्यथा पतितो भवेदिति ॥ अत्र शाखारण्डानां धर्मशास्त्रादेरुपल
क्ष- ॥ तथा च व्यासः ॥ धर्मशास्त्रं च विज्ञेयं शब्दशास्त्रं तथैव च ॥ पुराणानीतिहासा
श्च तथाख्यानानि यानि च ॥ महात्मनां चरितं श्रोतव्यं नित्यमेव हीति ॥ आरंभस्य शुभे दि
नेकार्यः ॥ तथा च ज्योतिःशास्त्रं ॥ विद्यारंभः प्रशस्तो भवति मधुरिपौ प्राप्तबोधे सुधांशौ
शस्ते नीहारवृत्तौ च त्रिदशपतिगुरावुद्गते चापि शुक्रे ॥ अथवा प्राप्ते सिंहराशौ दशश
तकिरणे चापि दैत्यारिपूज्ये स्वाध्याये भानुसूनौ क्वचिदपि गुरुदिने लग्नसंस्थे च जीवे ॥
तथा षष्ठी प्रतिपदं चैव वर्जयित्वा तथाष्टमीं रिक्तां पंचदशीं चैव सौरभौमदिनं तथा ॥
रत्नमालायामपि ॥ विद्यारंभः सुरगुरुसितभज्ञेष्वभीष्टार्थदायी कर्तुं श्री आयुष्मिरम
पिकरोत्यंशुमान्मध्यमोत्र ॥ नीहारांशोर्भवति जडता पंचता भूमिपुत्रे छायासुते
वपि च मुनेयः कीर्त्यते येवमाद्याः ॥ अथ नक्षत्राणि ॥ मृगादि पंचस्वपि भेषु मूले
हस्तादिके चात्रितये श्विनीषु ॥ पूर्वात्रये च श्रवणे च तद्वद्विद्यासमारंभमुशंति सि

ष्ठौ। अथाध्ययनप्रकारः॥ तत्र याज्ञवल्क्यः॥ गुरुं चैवाप्युपासीत स्वाध्यायार्थं समा-
हितः॥ मनुश्च॥ अध्येष्यमाणस्त्वाचान्तो यथाशास्त्रमुदङ्मुखः। ब्रह्मांजलिकृतोध्या-
७४ प्यो लघुवासा जितेंद्रियः॥ ब्रह्मारंभेवसाने च पादौ ग्राह्यौ गुरोः सदा। व्यत्यस्तपाणि-
नाकार्यमुपसंग्रहणं गुरोः। सव्येन सव्यः स्प्रष्टव्यो दक्षिणेन तु दक्षिणः। ब्रह्मणः
प्रणवं कुर्यादादावंते च सर्वदा॥ स्रवत्यनोंकृतं पूर्वं परस्ताच्च विशीर्यते। प्रांजलिः प-
र्युपासीत पवित्रैश्चैव पावितः॥ प्राणायामैस्त्रिभिः पूतस्तत ॐकर्तुमर्हति॥ अ- रामः
ध्येष्यमाणं च गुरुर्नित्यकालमतंद्रितः॥ अधीष्व भो इति ब्रूयाद्विरामोस्त्विति चारमे- ७४
त्॥ नोदितो गुरुणा नित्यमप्रणोदित एव वा॥ कुर्यादध्ययने योगमाचार्यस्य
हितेषु च॥ दक्षः॥ द्वितीये तु तथा भागे वेदाभ्यासो विधीयते। वेदस्वीकरणं पूर्वं वि-
विचारोभ्यसनं जपः। तद्दानं चैव शिष्येभ्यो वेदाभ्यासो हि पंचधा॥ मनुः॥ नित्यमुद्धृ-
तपाणिः स्यात्स्वाध्यायाचारसमाहितः। आस्यतामिति चोक्तः सन्नासीताभिमुखं गुरोः॥

हीनान्नवस्त्रवेषः स्यात्सर्वदा गुरुसंनिधौ। हीनान्नवस्त्रवेषत्वं गुर्वपेक्षया॥ उत्तिष्ठेत्प्रथ-
मं चास्य चरमं चैव संविशेत्॥ पाणिनीयशिक्षायां॥ हस्तेन वेदं योधीते स्वरवर्णार्थ-
संयुतं॥ ऋग्यजुःसामभिः पूतो ब्रह्मलोके महीयते॥ स्वरहीनं तु योधीते स्वरवर्णविव-
र्जितं॥ ऋग्यजुःसामभिर्दग्धो वियोनिमधिगच्छति॥ वराङ्गारस्वाह॥ वेदाः स्वार्थोध्येत-
व्यः इति। ज्ञानवद्भिः सर्वदा बोधो विप्राणां कर्मसिद्धये॥ पाठमात्रमधीयानः पंके गौरिव सी-
दति॥ व्यासोपि॥ वेदस्याध्ययनं सर्वं धर्मशास्त्रस्य चैव हि। अजानतोर्थं तद्व्यर्थं तु-
षाणां कंडनं यथा॥ यद्यपि पृथिवीं सर्वां सर्वरत्नोपशोभितां॥ दद्यात्तदासंच शिष्ये-
भ्यस्तत्त्वे न तद्द्वयं समं॥ मनुः॥ गुरोरनुमतिं कृत्वा वेदाध्यायनमारभेत्॥ अध्यापये
चेतनः शिष्यान्न्यायशीलान्गुणान्वितान्॥ याज्ञवल्क्यः॥ कृतज्ञाद्रोहिमेधाविशुचि-
कल्यानसूयकाः। अध्याप्या धर्मतः साधुशक्ताप्तज्ञानवित्तदाः॥ अनध्याप्यानाह म-
नुः॥ धर्मार्थौ यत्र न स्यातां शुश्रूषा वापि तद्विधा॥ न तत्र विद्या वप्तव्या शुभं बीजमिवोषरे॥

विद्ययैव समं कामं कर्त्तव्यं ब्रह्मवादिना ॥ आपद्यपि हि कष्टायां नत्वेन मिरिणे वपेत् ॥
विद्या ब्राह्मणमेत्याह शेवधिस्तेऽस्मि रक्ष मां ॥ असूयकाय मादास्तथा स्यां वीर्यवत्त
७५ मा ॥ यमेव तु शुचिं विद्यान्नियतं ब्रह्मचारिणं ॥ तस्मै मां ब्रूहि विप्राय निधिपायाप्रमा
दिने ॥ न निंदां तु उनेकुर्यात्पुत्रं शिष्यं च ताडयेत् ॥ अधोभागे शरीरस्य नोत्तमांगेन वक्ष
सि ॥ अतो उन्यथा तु प्रहरन्स्या यमुक्तो भवेन्नरः ॥ न्याययुक्तो दंड्यः ॥ सर्वधर्ममयं ब्रह्म
प्रदनिभ्योधिकं यतः ॥ तद्ददत्समवाप्नोति ब्रह्मलोकमविच्युतमिति ॥ स्मृत्यर्थसारे ॥ राम:
उदगयने शुक्लपक्षे शुभेऽहनि वेदस्वाध्यायं प्रारभेत्सर्वान्देवगणेशसरस्वतीं गुरुं च स ७५
पूज्य ब्रह्मचारिविप्रसुवासिनी रम्य ध्याशिषो गृहीत्वा ब्रह्मयज्ञवभाधारयणमाणं ॥
प्रणवव्याहृतिसहितां सावित्रीमुक्त्वा प्रणवपूर्वकं स्वाध्यायं प्रारभ्य किंचिदधीत्य प्र
णवेन विरामोऽस्त्विति उक्त्वा भूमिं स्पृष्ट्वा गुरुं वंदित्वा क्षयेयुस्ततो उपरेद्युः प्रभृति गतो श्रा
दी ज्ञात्वा गुरुं च नत्वा प्रणवेन प्रारंभसमाप्तिं च कुर्यादिति ॥ अथाध्ययनधर्माः ॥ क्रं उमात्र

मप्यधीयीत मार्गे शौक्तेन धर्मतः ॥ नचैव चतुरो वेदान् न्यायेन कदाचनेति ॥ लघुव्यासः ॥
कूर्मपुराणेऽपि ॥ एवं दंडादिभिर्युक्तः शौचाचारसमन्वितः ॥ आहूतोऽध्ययनं कुर्याद्वीक्षमा
णो गुरोर्मुखं ॥ नासनेन च भुंजानो न तिष्ठन्न पराङ्मुखः ॥ गुरोस्तु चक्षुर्विषये न यथेष्टा
सनो भवेत् ॥ नोदाहरेदस्य नाम परोक्षमपि केवलं ॥ न चैवास्यानुकुर्वीत गतिभाषण
चेष्टितं ॥ गुरोर्यत्र परीवादो निंदा वापि प्रवर्त्तते ॥ कर्णौ तत्र पिधातव्यौ गंतव्यं वा त
तोऽन्यतः इत्यादि ॥ तथा ॥ जृंभितं हसितं चैव कंठप्रावरणं तथा ॥ वर्जयेत्संनिधौ नित्यम
वस्फोटनमेव च ॥ कामं लोभं भयं मनिद्रां गीतवादित्रनर्तनं ॥ द्यूतं जनपरीवादं स्त्रीप्रे
क्षालंभनं तथा ॥ परोपघातं पैशुन्यं प्रयत्नेन विवर्जयेत् ॥ उदकुंभं दंतकाष्ठं गो
नदं मृत्तिकां कुशान् ॥ आहरेद्यावदर्थानि भैक्षं चाहरहश्चरेत् ॥ घृतं च लवणं स
र्वं वर्ज्यं पर्युषितं च यत् ॥ नादर्शं चैव वीक्षेत नाचरेद्दंतधावनं ॥ एकांतमशुचिस्त्री
भिः शूद्रांत्यैरपि भाषणं ॥ आश्वलायनः ॥ दक्षिणं तत्र जानु रासीत धर्माविमुखो गुरोः ॥

७६

कंपचेच्छिरा किंचिन्न कुप्येत नमस्करी॥ गुरुत्तापि सदा सीतन विलोकेत्केशुचास्
हस्यैव सन्निधौ गुरोरागमने द्विजः॥ तथा गुरुके मध्यरात्रे च विरामे रात्रे च विसर्जिते॥ उ
च्छिष्टे श्राद्धभुक्तौ च मनसापि न चिंतयेत्॥ स्वाध्यायमिति शेषः॥ स्मृतिसारे॥ सर्वं कुर्
सितगंधेषु परिवेशसमासु च॥ अभ्यंगे स्नानकाले च मलोत्सर्गे तिकंपने॥ गोविप्ररो
धने सर्वक्रीडासु आद्यपंक्तिषु॥ श्मशाने शूद्रसंपर्के चांडालादिप्रदर्शने॥ ईति रोदने
व्याकुले देशे जपस्थाने महाजले॥ महोत्सवेषु च तथा स्वाध्यायं वर्जयेद्बुधः॥ नार राम:
दः॥ द्यूतं पुस्तकशुश्रूषा नाटकासक्तिरेव च॥ स्त्रियस्तंद्री च निद्रा च विद्याविघ्नच ७६
कराणि षट्॥ पुस्तकप्रत्ययाधीतं नाधीतं गुरुसंनिधौ॥ राजते न सभामध्ये जारगर्भ
इव स्त्रियाः॥ मनुः॥ नाविस्पष्टमधीयीत न शूद्रजनसंनिधौ॥ न निशांते परिश्रां
तो ब्रह्माधीत्य पुनः स्वपेत्॥ तथा॥ शूद्राणां संपुटस्य ह्यधीयानस्य नित्यशः॥
जपतो जुह्वतो वापि गतिरूर्ध्वा न विद्यते इति॥ अत्र मंदसादिदोषाद् अध्ययनेऽस

मर्थस्य प्रायश्चित्तमुच्यते विधाने॥ वागिंद्रियविमूढास्तु ये विद्यां न विजानते॥ इंद्रियार्था
न्यथार्थाध्यायो न वेत्ति किंचन॥ विद्या वाधिगता यस्य प्रतानुयेत् पुनः पुनः॥ स तत्परी
रिनिच जपन्विद्यास्य प्रतिपद्यते॥ एवं प्रत्यो जपेन्मंत्रं शतवारं दिने दिने॥ कांतिबु
द्धिं न शास्त्रेषु यथार्थानतं च दृश्यते॥ यातेकं कुं जपेन्मंत्रं शतवारं दिने दिने॥ विपरीतं
न शास्त्रेषु यथार्थं दृश्यते सदा॥ सुतः सोमो जपेन्मंत्रं शतवारं दिने दिने॥ अन्यार्थं
न शास्त्रेषु यथार्थं दृश्यते सदा॥ कयानश्चि मंत्रं च शतवारं दिने दिने॥ व्यासोक्तं तु
पुराणेषु यथार्थं दृश्यते सदा॥ अहेलमानो मंत्रं च दिनं प्रति जपेत् खलु॥ शास्त्रेषु
संशयो नास्ति विश्वासः सर्वथा भवेत्॥ मत्स्यसं प्रजपेन्मंत्रं शतवारं दिने दिने॥
स्मृत्यर्थे नान्यथा बुद्धिर्यथार्थं पश्यति द्विजः॥ अपूपापिधानमंत्रं च पठेज्जे दशदिनं प्र
ति॥ वाग्देवा मातृकाले स्य जिह्वाग्रे वर्त्तते सदा॥ अग्ने त्वामंत्रेण जुहुयाद्दिव्याश्रीस्त
त्कुले स्थिरे॥ त्रिमधुचाष्टसहस्रं प्रतिवर्षं तु फाल्गुने॥ भवामि त्रो जपेन्मंत्रं शतवारं

दिने दिने॥ अविद्यानस्य शेषसर्वं विद्या यास्य तिष्ठति॥ अरण्ये नुजपेन्मंत्रं शतं तथा च्योदि-
नं प्रति॥ त्रिकालज्ञानसिद्धिं च सवर्षाल्लभते द्विजः इति मंदमतिप्रायश्चित्तं॥ गुरुशु-
७८ श्रूषा उक्ता कौर्मे हे देवि: यथा खनन्नतो भूमेर्नरो निधिमुपाश्नुते॥ तथैव गुरुगतां
विद्यां शुश्रूषुरधिगच्छति॥ यथा विषसंयुक्तं विषं वह्निनसंयुक्तं॥ तादृशं स्या-
दशुश्रूषो विद्यापीतं न संशयः॥ नारदः॥ गुरुशुश्रूषया विद्या पुष्कलेन धनेन राम: ७८
वा॥ अथवा विद्यया विद्या चतुर्थं नोपलभ्यते॥ इति॥ तथा॥ गुरुं त्वंकृत्य हुंकृत्य
विप्रं निर्जित्य वादतः॥ अरण्ये निर्जले देशे भवति ब्रह्मराक्षसः॥ तस्य प्रायश्चि-
त्तमाह बोधायनः॥ वादिने ब्राह्मणं जित्वा प्रायश्चित्तविधिस्तथा॥ त्रिरात्रोपोषि-
तः स्नात्वा प्रणिपत्य प्रसादयेदिति॥ ॥ अन्येप्यध्ययननियमाः॥ पाराशरायशिक्षा-
दितोवगंतव्याः॥ विस्तरभयान्न लिख्यते॥ अथाध्यापकधर्माः॥ तत्र यमः॥ सततं
प्रातरुत्थाय दंतधावनपूर्वकं॥ स्नात्वा हुत्वा च शिष्येभ्यः कुर्यादध्यापनं नरः॥

शिष्यशिक्षाविधिर्गौतमः॥ अनृत्यक्तो यजुर्वेदशुद्धाभ्यां तनुभ्यां शिक्षयेदिति॥ मनुः॥ पृष्ठत-
स्तु शरीरस्य नो च संगे कुर्यंचन॥ अतोन्यथा तु प्रहरन् प्राप्तः स्याच्चौरकिल्बिषं॥ यमः॥ यो
वर्षार्धस्य निर्जोऽध्याप्यास्पष्टे व्यक्ता विधानतः॥ अनध्यायेषु तं प्राहुर्वेदविप्लावकं बुधाः॥
हारीतः॥ अनेकाध्यापनं कृत्वा अनेकाध्ययनं तथा॥ अनुयोगप्रधानेन त्रीन्मासांस्तु कपि-
बेदिति॥ यावकमिति शेषः॥ इत्यध्यापकधर्माः॥ अथानध्याया उच्यंते॥ तत्रोशना॥ अयने
विषुवे चैव शयने बोधने हरेः॥ अनध्यायं प्रकुर्वीत मन्वादिषु युगादिषु॥ अयनं दक्षिण-
मुत्तरं च॥ विषुवं तुलमेषयोः शयनी बोधनी चैकादशी॥ मन्वादयो मात्स्ये निरूपिता॥ अ-
श्वयुक् शुक्लनवमी कार्तिकी द्वादशी सिता॥ तृतीया चैत्रमासस्य तथा भाद्रपदस्य च॥
फाल्गुनस्यामावास्या पौषस्यैकादशी सिता॥ आषाढस्यापि दशमी माघमासस्य सप्त-
मी॥ श्रावणस्याष्टमी कृष्णा आषाढस्यापि पूर्णिमा॥ कार्तिकी फाल्गुनी चैत्री ज्येष्ठी पंच-
दशी तथा॥ मन्वंतरादयो ह्येव दत्तस्य च योऽत्र तीया नवम्य सौ कार्तिके शुक्लपक्षे॥

नभस्यमासस्य मासस्य च कृष्णपक्षस्य च योदशी पंचदशी च माघे इति। याज्ञवल्क्यः। त्र्यहं प्रेते-
ष्वनध्यायः शिष्यर्त्विग्गुरुबंधुषु। उपाकर्मणि चोत्सर्गे स्वशाखाश्रोत्रिये मृते। पंचदश्यां
७८ चतुर्दश्यामष्टम्यां राहुसूतके। ऋतुसंधिषु भुक्त्वा च श्राद्धिकं प्रतिगृह्य च॥ आद्यमात्रे
कोद्दिष्टान्तिके॥ एकोद्दिष्टे त्र्यहं रात्रिमन्तके तथा॥ संध्यागर्जितनिर्घातभूकंपोल्का-
निपाते॥ समाप्य वेदं द्युनिशमारण्यकमधीत्य च। पशुमंडूकनकुलश्वाहिमार्जारमू-
षकैः। कृतेंतरे त्वहोरात्रं शक्रपाते तथोच्छ्रये। श्वक्रोष्टुगर्दभोलू- रामः
कसामबाणार्तनिःस्वने। अमेध्यशवशूद्रान्त्यश्मशानपतितान्तिके। देशेऽशुचावा- ७८
त्मनि च विद्युत्स्तनितसंप्लवे॥ भुक्त्वार्द्रपाणिरंभोन्तरर्धरात्रेतिमारुते। पांशु-
वर्षे दिशां दाहे संध्यानीहारभीतिषु। धावतः। पूतिगंधे च शिष्टे च गृहमागते॥ खरोष्ट्र-
यानहस्त्यश्वनौवृक्षगिरिरोहणे। सप्तत्रिंशदनध्यायानेतांस्तात्कालिकान्विदुरि-
ति॥ अत्र प्रत्यहं संध्याविशेषरुक्तं। स्मृतिसारे॥ उदयेस्तमयेचापि मुहूर्त्तं च यागामियनृ॥

तद्दिनं तदहोरात्रमनध्यायं विदुर्बुधाः। केचिदाहुः क्वचिद्देशे यावत्तद्दिननाडिकाः। ताव-
देवानध्यायो न तत्कृत्स्नो दिनांतरमिति। ब्रह्मांडपुराणे। रात्रौ यामद्वयादर्वाग्यदि पश्ये-
त्त्रयोदशीं। प्रदोषः स तु विज्ञेयः सर्वस्वाध्यायवर्जितः॥ षष्ठी च द्वादशी चैव अर्धरात्रोन-
नाडिका॥ प्रदोषे न त्वधीयीत तृतीया नवनाडिका। अन्यत्रापि। चतुर्थी प्रथमे यामे सा-
र्द्धयामे च सप्तमी। त्रयोदश्यर्द्धरात्रे च प्रदोषो जायते ध्रुवमिति। तथा हारीतः। प्रतिप-
त्सु चतुर्दश्यामष्टम्यां पर्वणोर्द्वयोः॥ श्वोनध्याये च शर्वर्यां नाधीयीत कदाचन। तथा।
अष्टमी हंत्युपाध्यायं शिष्यं हंति चतुर्दशी। अमावास्योभयं हंति प्रतिपद्बुद्धिनाशिनी॥
अष्टकास्तु समाख्यातास्ताभ्यामादिदिनत्रयं॥ मार्गशीर्षे तथा पौषे माघमासे तथैव
च। तिस्रोष्टकाः समाख्याताः कृष्णपक्षेषु सूरिभिः॥ शास्त्रं न तत्राधीयीत वृत्तबंधं विव-
र्जयेत्॥ तात्कालिकानध्यायनिमित्तानां समवाये विशेषमाह गौतमः। वर्षविद्यु-
त्स्तनयित्नुसंनिपाते त्र्यहमिति॥ स्मृत्यंतरेपि॥ विद्युद्गर्जितवर्षाणां संनिपातो यदा

मेवतु। कालवृष्टौ तु तत्कालमकाले तु त्रिरात्रकमिति। अथानध्यायप्रवादः। मनुः। वेदोपक
रणे चैव स्वाध्याये चैव नैत्यके। नानुरोधोस्त्यनध्याये होममंत्रजपेषु च। कौर्म्येपि। नै
८० त्यके नास्त्यनध्यायः संध्योपासन एव च। उपाकर्मणि कर्मांते होममंत्रेषु चैव हि। अनध्या
यस्तु नांगेषु नेतिहासपुराणयोः। न धर्मशास्त्रेष्वन्येषु पर्वण्येतानि वर्जयेत्। एष धर्मः
समासेन कीर्तितो ब्रह्मचारिणां। ब्रह्मणाभिहितः पूर्वमृषीणां भावितात्मनां। अधी
अधीयीत सदा नित्यं ब्रह्मविद्यासमाहितः। सावित्रीं शतरुद्रीयं वेदानां च विशेषतः।। रामः
अभ्यसेत्सततं युक्तो भस्मस्नानपरायण इति।। इति श्रीमत्परमवैदिकश्रीमदनागदेवभट्टसुतेन विदुषा कृपा— अनंतेन विरचिते विधानपारिजाताभिधे निबंधे प्रयो ८०
गपारिजातादिनिबंधोक्तं ब्रह्मचारिप्रकरणं समाप्तं। अथ ग्रहयज्ञस्वरूपमभिधी
यते। तत्र नित्यनैमित्तिकयोः प्रतिपदोक्तवस्त्वभावे तु काम्याभिग्रहशांतिः। काम्ये
तु प्रतिनिध्यभावात्प्रतिपदोक्तान्येव वस्तूनि। तथा च शौनकः।। ग्रहशांतिं प्रवक्ष्या

मि शौनकोहं द्विजन्मनां।। पुष्ट्यै ग्रहनिरुक्तेन वारे कुर्याद्दिवा च वि जन्मसु। अयने विषुवे चैव
सोमसूर्योपरागयोः।। ग्रहाणामुग्रचेष्टानामेनां शांतिं समाचरेत्।। नित्योयं ग्रहयज्ञः
स्यान्नैमित्तिक इतः परं। गर्भाधानादिसंस्कारकर्मस्वपि विशेषतः।। कार्यारंभेषु सर्व
वेषु नववेश्मप्रवेशने।। आरब्धकार्यारंभे त्यादौ सर्वेषु निमित्तेषु तु मीज्ञेया।। आरोग्य
स्नानसमये संक्रांतौ गेग संभवे। अतिचारे च यः कुर्याद्ग्रहपूजाविधानतः।। सोभी
ष्टफलमाप्नोति निर्विघ्नेन न संशय इति। तथाह्ययते विपदः क्षिप्रं वर्द्धंते संपदो
ऽखिलाः।। तापादयो विनश्यंति सर्वाः कार्याः प्रदक्षिणा इति। अथ दृष्टानिष्टप्राप्तिपरि
हारोपायत्वेन ग्रहयज्ञविधानं।। हेमाद्रौ स्कांदे। गार्ग्यं गर्गसुखासनासीनं कौशिकः
परिपृच्छति। निखिलां ग्रहशांतिं मे भगवन्वक्तुमर्हसि।। गार्ग्य उवाच। देवदानव
गंधर्वयक्षराक्षसकिंनरैः।। पीड्यंते ग्रहपीडाभिः किं पुनर्भुवि मानवाः।। शनैश्च
रेण सौदासो नरमांसेतियोजितः।। राहुणा पीडितो राजा नलो भ्रांतो महीतले।।
अंगारविरोधेन।।

रामो राष्ट्राद्विवासितः॥ अष्टमेन च राशौ केन हिरण्यकशिपुर्हतः॥ रविणा सप्तमस्थेन
रावणो विनिपातितः॥ पुरुषाणां जन्मसंस्थेन मृतो राजा सुयोधनः॥ पांडवा बुधपीडायां
८० विकर्मणि नियोजिताः॥ षष्ठेन ज्ञानसायुद्धे हिरण्याक्षो निपातितः॥ शनैश्चरेण सौ
दासो नरमांसे नियोजिताः॥ राहुणा पीडितो राजा नलो भ्रांतो महीतले॥ केतुनां चि
च पीडायां हतो वालिर्महाबलः॥ एते चान्ये च बहवो ग्रहदोषेण पीडिताः॥ मात्स्ये॥
श्रीकामः शांतिकामो वा ग्रहयज्ञं समाचरेत्॥ वृष्ट्यायुःपुष्टिकामो वा तथैवाभिच
रन्प्रभुः॥ ग्रहयज्ञास्त्रिधा प्रोक्ताः पुराणश्रुतिकोविदैः॥ प्रथमोऽयुतहोमोयं लक्षहोम रामः ८०
स्ततः परं॥ तृतीयः कोटिहोमस्तु सर्वकामफलप्रदः॥ गृहस्योत्तरपूर्वेण मंडपं कार
येद्बुधः॥ रुद्रायतनतो वा चतुरस्रमुदक्प्लवं॥ दशहस्तमथाष्टौ वा हस्तान्कुर्याद्वि
धानतः॥ तस्य द्वाराणि चत्वारि कर्तव्यानि विचक्षणैरिति॥ स्कांदे॥ नवग्रहमखे
कुंडं हस्तमात्रं समं भवेत्॥ चतुरस्रमधोहस्तं योनिवक्त्रं समेखलं॥ चतुरंगुलवि

स्तारा मेखलास्तद्वदुच्छ्रिताः॥ मात्स्ये॥ वितस्तिमात्रा योनिः स्यात्षट्सप्तांगुलिविस्तृता॥ ग
जोष्ठसदृशी तद्वदायता च्छिद्रसंयुता॥ मेखलोपरि सर्वत्र अश्वत्थदलसन्निभा॥ सा
च पश्चिमतो ज्ञेया योनिः स्यादिति केचन॥ मानहीनाधिके कुंडे अनेकभयदं भवेत्॥
तस्मात्योक्तरप्रवैतःस्थंडिलं हस्तमात्रकं॥ त्रिवप्रं चतुरस्रं च वितस्त्युच्छ्रायसंमितं॥
स्थंडिलवेदिः॥ वप्रा मेखलाः॥ तदुक्तं मात्स्ये॥ द्व्यंगुलोच्छ्रितो वप्रः प्रथमः समुदाहृ
तः॥ त्र्यंगुलोच्छ्रायसंयुक्तं वप्रद्वयमथोपरि॥ द्व्यंगुलस्तत्र विस्तारः सर्वेषां कथितो
बुधैः॥ स्कांदे॥ नवग्रहमखे कुर्याद्द्विजश्चतुरः शुभान्॥ अथवा चैकमेवाच्य वि
धिना ब्राह्मणांस्तथा॥ जन्मनक्षत्रगोत्रमग्निश्च वर्णाः स्थानमुखानि च॥ योज्ञात्वा कुरुते
शांतिमहास्ते नावमानिताः॥ उत्पन्नोर्कः कलिंगेषु यमुनायां च चन्द्रमाः॥ अंगारकस्त्व
वंत्यां मगधायां हिमांशुजः॥ सिंधवेषु गुरुर्जातः शुक्रो भोजकटे तथा॥ शनैश्चरस्तु
सौराष्ट्रे राहुर्वैराटिनापुरे॥ अंतर्वेद्यां तथा केतुरित्येता ग्रहभूमयः॥ यस्य यस्य च

यज्ञोचंतन्नेवक्ष्याम्यतःपरं॥आदित्यःकाश्यपोगोत्रेअत्रेयश्चंद्रमाभवेत्॥भारद्वा
द्वाजोभवेद्भौमस्तथात्रेयश्चसोमजः॥गुरुःस्यादांगिरोगोत्रःशुक्रोवैभार्गवस्तथा॥
८१ शनिःकाश्यपतांयायाद्राहुःपैठीनसस्तथाकेतवोजैमिनीयाश्चमहाग्निस्तदनंतरं॥आ
दित्येकपिलोनामपिंगलःसोमउच्यते॥धूमकेतुस्तथाभौमेजाठरोग्निर्बुधेस्मृतः॥
गुरौचैवशिखीनामशुक्रेभवतिहाटकः॥शनैश्चरेमहातेजाराहुकेत्वोर्हुता
शनः॥अथवर्णाः॥भास्करांगारकौरक्तौश्वेतौशुक्रनिशाकरौ॥सोमपुत्रोगुरुश्चै राम:
वतावुभौपीतकौस्मृतौ॥कृष्णंशनैश्चरंविद्याच्छायाराहुश्चकेतवः॥अथस्थाना ८१
नि॥मध्येतुभास्करंविद्याल्लोहितंपूर्वदक्षिणे॥दक्षिणेलोहितंविद्याद्बुधंपूर्वोत्तरेणतु॥
उत्तरेतुगुरुंविद्यात्पूर्वेणैवभार्गवंन्यसेत्॥पश्चिमेनशनिंविद्याद्राहुंदक्षिणपश्चि
मे॥पश्चिमोत्तरतःकेतुस्थाप्योवेशुक्लतंडुलैः॥अथधातवः॥सौम्ये॥ताम्रका
स्फटिकाद्रक्तचंदनात्स्वर्णकादुभौ॥रजतादयसस्थाच्चयःकार्याग्रहाःक्रमात्॥

स्कंदोशुक्रार्कौप्राङ्मुखौज्ञेयौगुरुसौम्यावुदङ्मुखौ॥प्रत्यङ्मुखःशनिःसोमःशेषा
दक्षिणामुखाः॥प्राङ्मुखोऊर्ध्वदृष्टी॥उदङ्मुखौवामदृष्टी॥प्रत्यङ्मुखोधोदृष्टिः॥दक्षि
णामुखाःदक्षिणदृष्टयइतिव्याख्येयं॥आदित्याभिमुखादिरत्युकेचोतावर्णरूपगुणे
युक्तान्ध्यात्वापूजयेत्तुतान्॥मात्स्ये॥पुराणेक्षिविप्रकल्पनेकृत्वाब्राह्मणवाचनं॥नां
दीश्राद्धंविधायादौरवेःपुयादृत्विजस्तथा॥नवेमण्डमरवेविप्राश्चत्वारोवेदवादिनः॥अ
थवाऋत्विजौशांतौद्वावेवश्रुतिकोविदौ॥कार्यावयुतहोमेनप्रयत्नविस्तरद्विवानास्था
पनंकुर्यात्कुंडेतुविधानतः॥अग्निप्रणयनंकृत्वावेदमावाहयेत्सुरान्॥देवानांतत्र
संस्थाप्याविंशतिर्द्वादशाधिका॥आदित्यादिमुखाः॥सर्वेसाधिप्रत्यधिदेवताःस्थाप
नीयामुनिश्रेष्ठनोत्तरेणवराङ्मुखौ॥नान्तरेणवहिर्योगिनःसंनिहिताइतिव्याख्ये
यं॥मध्यस्थापनस्योक्तत्वात्॥अग्निदृतंदिनेशायसोमायस्यंनरिंयच॥स्योनाप्
थिविसोमायइदंविष्णुर्बुधायच॥इंद्रश्रेष्ठाक्षौसुरेज्यायशुक्रंज्योतिःसिनायच॥०

प्रजापतेति सौराय आयं गौरिति राहवे॥ केतवे ब्रह्मजज्ञानं स्वैस्वैर्मंत्रैः प्रतिष्ठिताः॥ ईश्वरं
भास्करे विंद्यात् उमां विंद्यान्निशाकरे॥ स्कंदं मंगारके विंद्याद्बुधे नारायणं विदुः॥ गुरौ वेदनि
८२ धिं विंद्यात् शुक्रे शक्रो विधीयते॥ वेदनिधिर्ब्रह्मा॥ शनैश्चरे यमं विंद्यात् राहौ कालस्तथै
व चा चित्रगुप्तोधिपः केतो रित्युक्ता अधिदेवताः विष्णुधर्मोत्तरे॥ अतःपरं प्रवक्ष्यामि यो
देवो योग्रहः स्मृतः॥ अग्निरर्कः स्मृतः सोमो वरुणः परिकीर्त्तितः॥ अंगारकः कुमारश्च बुधः
श्च भगवान् हरिः॥ बृहस्पतिः स्मृतः शक्रः शुक्रो देवी च पार्वती॥ प्रजापतिः शनैश्चरे राहु रामः
र्नैयोगणाधिपः॥ विश्वकर्मा स्मृतः केतुर्ग्रहास्ते सुराः स्मृताः स्कांदे॥ वक्ष्ये स्थानानि ८२
देवानामीश्वरादि यथाक्रमं॥ सूर्यस्यैवोत्तरे देशे उमां सोमस्य दक्षिणे॥ स्कंदं मंगारक
स्यैव दक्षिणस्यां निवेशयेत्॥ सौम्यस्य पश्चिमे विष्णुं विधिं जीवस्य पूर्वतः॥ इंद्रमैशां
सिताद्दिंद्यान्मंदस्याग्नेय्यमो भवेत्॥ राहोः पूर्वोत्तरे कालं सर्वमेतत् भयवहं॥ केतोर्निर्ऋ

त्यदिग्भागे चित्रगुप्तं निधापयेत्॥ उत्तरेशानिसूर्याग्न्योर्गुरुकेत्वोश्च दक्षिणे॥ गणाधिपं प्र
तिष्ठाप्य स्पर्द्धिवनमस्कृतं॥ अथ मंडलानि॥ भानुं तु मंडलाकारं सोमं तु चतुरस्रकं॥ अंगा
रकं त्रिकोणं च बुधं बाणाकृतिं तथा॥ दीर्घचतुरस्रं गुरुं पंचास्रं भार्गवं तथा॥ धनुःशस्त्रं श
निं विंद्यात् राहुं सूर्पाकृतिं तथा॥ ध्वजाकाराः केतवश्च ग्रहा शंतरूपिणः॥ स्थापयेच्च
क्रं तु लेखेदिति पक्षे मंडलाद्याकारेण स्थापनं॥ द्वादशांगुलमादित्यं सोमं तु द्विगुणं लिखेत्॥
त्र्यंगुलं नांगुलं चैव गुरुं चैव षडंगुलं॥ बुधं नमिसुतं सौरिं च तु स्त्रिद्वांगुलं तथा॥ सोमा
द्र्धांगुलं राहुं केतुं कुर्याच्च षडंगुलं॥ मात्स्ये॥ विनायकं तथा दुर्गां वायुमाकाशमेव च॥ अन्य
सन्नं त्रिभर्तारं दीस्तथैवाश्विकुमारकौ॥ सहूमंदादिनेशानामुत्तरस्थो यथाक्रमं॥ रा
होः केतोर्दक्षिणे च विन्यसेत् क्रमतः सुधीः॥ स्कांदे॥ अन्तस्थापनमं त्र्यश्रकं पयाम्यानुद
वेशः॥ ईश्वरं चैव कं चैव निर्ऋत्यग्नि तेति पार्वती॥ यदत्रां देति च स्कंद विष्णुं विहिता रयाः स्तः॥
भाव्रह्मस्तिनिबृ स्नाणां सज्जोपेंद्रतिस्वब॥ यमाधल्येति च यमं कालं का चिरसी॥ तिद्य॥ चि

त्रा वस्विति मंत्रेण चित्रगुप्तं निधापयेत्॥ अग्निराप: क्षितिर्विष्णुरिंद्रैंद्री प्रजापतिः। स्वपात्र
द्रा च निर्दिष्टा अधिदेवाय यथाक्रमं॥ अग्निं दूतमिति ह्यग्ने र्वरुणस्य उदुत्तमं॥ स्योना पृथि
८३ विमे दिन्याः इदं विष्णुस्तु विष्णवे॥ इंद्रायेंद्रो मरुत्वंतींद्रस्यो त्रानपतेर्शिचीश्चित्ता॥ प्रजापते प्रजेश
स्य एष ब्रह्मेति वा विधिः॥ मंत्रो नमोस्तु सर्वेभ्यः सर्पाणां स्थापनमतः॥ मरुध्यातं तु॥ पा
मास्पतः पतनकर इत्यादि ज्ञातमष्टोत्तरं सदेतिमस्य पुराणोक्तमत्र द्रष्टव्यं॥ अथ ग्रहाणां चाधि
देवानां नैवेद्यकुसुमानि च॥ ग्रहवस्त्रसनदानस्थापनं चानुपूर्वशः॥ माल्यः प्रागुत्तरे ना.म: ८३
ण तस्माच्च दध्यन्नते विभूषितं॥ कृतन्नकृतपल्लवैः संयुक्तं वस्त्रयुग्मान्वितं। पंचरत्न
समायुक्तं पंचभंगयुतं तथा॥ स्थापयेद्व्रणं कुंभं वरुणं तत्र विन्यसेत्॥ गंगाद्याः सरि
तः सर्वाः समुद्राश्च सरांसि च॥ गजाश्वरथ्यावल्मीकसंगमाद्ध्रदगोकुलात्॥ मृदमा
नीय विप्रेंद्र सर्वौषधिसमन्वितं॥ स्नानार्थं विन्यसेत्तत्र यजमानस्य धर्मवित्॥ स्कां
दे॥ दिवाकरकुजाभ्यां हि दापयेद्रक्तचंदनं॥ चंद्रे च भार्गवे चैव सितवर्णं प्रदापयेत्॥

कुंकुमेन तु संयुक्तं चंदनं जीवसौम्ययोः॥ अगरुं चंदनं दद्याद्राहुकेत्वर्कजेषु च॥ ग्रहवर्णा
नि पुष्पाणि गायत्र्या धूपमादहेत्॥ रवेः कुंकुरुकं धूपः शशिनस्तु घृताक्षताः॥ सोमे सर्जर
सश्चैव अगरुश्च बुधे स्मृतः॥ सिंहलं गुरवे दद्याच्छुक्रे विद्यागरुं तथा॥ गुग्गुलं मंदचारे
तु लाक्षारसोश्च केतवे॥ उदित्येस्वेति मंत्रेण दीपं दद्यादतंद्रितः॥ गुडौदनं रवे दद्या
त्सोमाय घृतपायसं॥ लोहिताय रुविद्याान्नं बुधाय क्षीरषाष्टिकं॥ दध्योदनं गुरो दद्या
घुत्राय च घृतोदनं॥ मिश्रितं तिलमाषैश्च नैवेद्यं तु शनैश्चर॥ राहो मांसौदनं दद्यात्केते
श्चित्रौदनं तथा॥ निवेदयित्वाहुतिभि र्होमं कुर्यादतंद्रितः ~~दद्यात्केते~~श्चि द्रितः॥ प्रदेशमात्रा
अर्कस्य स्वमिधश्चार्कस्यं भवाः॥ दधिमध्वाज्यसंयुक्ताः प्रतिदेवं च होमयेत्॥ पालाशी
श्च वसोमाय खादिरी लोहिताय च॥ अपामार्गी बुधायेति आश्वत्थीश्च बृहस्पतेः॥ औ
दुंबरीश्च शुक्राय मंदाय च शमीमयीः॥ दौर्वी राहोः कुशीन्केतो होममंत्रास्ततः परं॥
प्रतिदेवं च होमयेदिति सर्वत्र योज्यं॥ इतरेषां देवानां स्वस्वग्रहसमिद्भिरेव होम॥ आ

कृत्वेन सहस्रांशो रिमं देवास्तथापदे।। अग्निर्मूर्धेति भौमाय उद्बुध्यस्व बुधाय च।। बृहस्प
ते अति गुरोः शुक्रायान्नात्परिस्रुतः।। शनिश्चरस्य मंत्रोयं शंनोदेवीरुदाहृतः।। कयानश्
८४ तिराहोश्च केतुं कृण्वन्न केतवे।। विष्णुधर्मोत्तरे।। आकृष्णेनेति सूर्यस्य स्यादित्यमानो
मुक्तः के।। शनोदेवीति सौरस्य कांडात्कांडेति राहवे इति मास्ये।। आवोराज्ञेति रुद्रस्य ब
लिहोमं समाचरेत्।। आपोहिष्ठेत्युमायास्तु स्योनेति स्वामिनस्तथा।। विष्णोरिदं विष्णु
रिति त्वामिदेहीति स्वयंभुवः।। इंद्रमिद्देवतातयइंद्रस्यतु हुयात्पुनः।। तथा यमस्य चायंगौ रामः
रिति होमः प्रकीर्त्तितः।। कालस्य ब्रह्मजज्ञानमिति मंत्रः प्रशस्यते।। चित्रगुप्तस्य चाज्ञा ८४
तमिति पौराणिका विदुः।। अग्निं दूतं वृणीमहे इति वह्नेरुदाहृतः।। उदुत्तमं वरुणेति
अपां मंत्रः प्रकीर्त्तितः।। तमेः ताधिव्यंतरितं विद्वेषाः सरस्वत्वशीवेति च।। इंद्रायेंदोर
रीतीद्रस्योतानपतोंशचीस्यितो।। प्रजापते प्रजेस्य आर्ष्यगौरिति सर्पके।। ब्रह्मणो
ब्रह्मजज्ञानमिति मंत्रा उदीरिताः।। आत्वंतं दृइंविष्णोशोदुर्गायाजातवेदसे।। आ नो

नियुत्वान्वायो श्च आदित्यानस्या विदिवः।। एषो उषा अपूर्व्येति अश्विनोर्मंत्र ईरितः।। एवं
च यच गृह्यमंत्रादोमे दुरुक्तस्य च तत्तद्धारवा परत्नेन तेन मंत्राद्र इष्टव्याः।। सर्वासु
शाखा प्रहुत्यन्तस्वोक्त्या तु।। समिधश्चात्र मध्वक्ता उअष्टशतैरेव वा।। होतव्या मधु
सर्पिर्भ्यां दध्ना चैव समन्विताः।। चिंतामतेणो।। समिधां लक्षणं वक्ष्ये संख्यां तासां
तथैव च।। विशीर्णा विदला ह्रस्वा वक्राः ससुषिराः कृशाः।। अतिस्थूला अतिदीर्घा
श्च समिधः कार्यनाशनाः।। विशीर्णायुः क्षयं कुर्याद्विदला पुत्रनाशनी।। सुषिरा व्या
धिजननी कृशा च रिपुवर्द्धनी।। दीर्घा विदेशगमनी।। प्रादेशाच्चाधिकान्यूनी समि
धः सर्वकर्मणि।। अर्को नाशयति व्याधिं पलाशः सर्वकामदः।। खदिरश्चार्थलाभाय
अपामार्गः सुदादग्धोनेष्ठा पुनर्यगः स्यादारभ्यादितस्तदा।। होमत्वं दग्धं यदा तत्तु
स्यात्पुनः कथं देयं हविः।। स एव यागः कर्त्तव्यः पुनर्यागस्तु नेष्यते।। मध्यान्हस्वर्द्धितो
वस्तुं उष्टं यदि तमवेद्धविः।। तस्यक्रान्हविषोव धान्मध्या सूर्यार्द्धतः पुनः।। गमनार्थं च

सूक्तेन वयं मुञ्चापद्यस्यते॥ पूर्ववत्प्रायश्चित्तं होमं कुर्यात्स्रुवेणस्य वाज्यं॥ रक्तपादः कपो-
ताख्यः किंचिदारुणाक्षद्युतिः॥ स चेद्गृहं प्रविशति समीपं वा व्रजेद्यदि पुरीषं च न प
८५ यं तमन्वाधानादि पूर्ववत्॥ देवाः कपोत सूक्तेन प्रायश्चित्तं जुहुयाद्घृतं॥ पट्टेल्वाहुति
जुहुयात्प्रायश्चित्तं गारुडाधिष्ठार देसूक्तेजपेदद्वाविकल्पो जपहोमयोः॥ गत्वा रजस्वलां
भार्यां निषिद्धदिवसेपि वा॥ अयाज्यं याजयित्वा तु विप्रादि प्रतिग्रहे च॥ अप्रतिग्रा
ग्राह्यपुरुषाद्द्रव्यं वा प्रतिग्रहे च॥ स्पृष्ट्वाग्निं च यन स्वं वा यूपं वा उभोज्यभोजने॥
एतेषु च निमित्तेषु भवेदन्यतमं यदि॥ पर्यूह्याग्निं परिस्तीर्य पर्युक्ष्य होमतः परं॥ दानः ८५
पुनर्वमित्ति मंत्राभ्यां तु जुहुयात्सर्पकृतं घृते॥ एताभ्यामेव मंत्राभ्यां जुहुयात्समि
धौ पृथक्॥ पर्युक्षणोद्धरणोस्या तामन्यत्तंत्रं तु नेष्यते॥ स्वाहाकारे विनिर्मुक्तो
यद्दामज्ञो जपेद्विजः॥ अथ विधुरोपासनं॥ आश्वलायनः॥ ॥उद्धृत्य चाग्निं प्रण
वेनचाप्यवच्छग्निरिसाहरयेद्गुरस्तात्॥ निधाय पृष्ठोदिवमंत्रकेण ततः स्रुकेहोमः

स्तः कीते स्त्रतुभिः॥ ऊरवादयो नेव च तस्य तां सविस्थानि नोऽद्यान रेमे च मंत्राः॥ नारोपणं
वाप्यवरोपणं वा चोत्पत्तिरेवं विधुरानलस्य॥ नित्यानि नैमित्तिककाम्यकर्मतत्रैव
कुर्याद्विधुरः सदैवेति॥ आश्वलायनमाचार्यमभिगम्य महर्षयः॥ प्रतिपृच्छ्य यथा
चारमिदं वचनमब्रुवन्॥ भगवन्विधुराणां हि धर्मान्नो वक्तुमर्हसि॥ विवाहस्त्वेष समर्प
स्य विधुरस्य क्रियाकथं॥ श्राद्धानि पंच यज्ञाश्च कार्या नैमित्तिकाः क्रियाः॥ यन्यादि
पैरानाश्च माद्याः॥ ततः शुक्लांबरधरः शुक्लगंधानुलेपनः॥ सर्वौषधैः सर्वगंधैः
स्नापितो विप्रपुंगवो॥ यजमानः सपत्नीकः शुचिर्जस्तानु समाहितः॥ दक्षिणाभिः प्र
यत्नेन पूजयेद्धेन विस्मयः॥ होमांते दक्षिणां दद्यात्कांस्यपात्रं पुष्टिवर्द्धनी॥ आदित्या
य शुभां धेनुं शंखं सोमाय दापयेत्॥ भौमाय रक्तवृषभं सोमपुत्राय कांचनं॥ गुर
वे पीतवासांसि शुक्राय श्वेतं तु दापयेत्॥ कृष्णां गां मंदिचाराम दाराहवेत्वा य संशुभं
॥केतवे [illegible] दाग मांसानि सर्वेषामेव कांचनं॥ यस्तु पीडाकरो नित्यं त्यवित्तस्य-

ग्रहः॥ तमेव पूजयेद्भक्त्या दक्षिणाभिः स्वशक्तितः॥ यथा ग्रहादि जातस्तद्देहे देवेदांगया
रतो॥ तोषः येन ग्रहदुर्वस्थैर्वा तुष्टमेतं विसर्जयेत्॥ अन्नहीनो दहेद्राष्ट्रं मंत्रहीनः
८६ स्तु ऋत्विजं॥ यजमानमदाक्षिण्यो नास्ति यज्ञसमो रिपुः॥ अग्निर्दग्धे यथा भस्मवातो
द्धतं विनश्यति॥ दुरितं पंच मंत्राणि दग्धदानाद्धुतं तथा नृणां॥ यथा शास्त्र प्रकाराणां
केवचं स्यान्निवारणं॥ एवं देवोपघातानां शांतिर्भवति वारणं॥ यथा समुद्धितं
यं यं येत्ता प्रतिहन्यते॥ एवं समुद्धितं घोरं शीघ्रं शांत्या विनश्यति॥ अपि स्वदं राम:
तस्य धर्मार्जितस्य नस्य च॥ नित्यं च नियमस्थस्य सद्धानुग्रहाः ग्रहाः॥ ग्रहगोवो ८६
नरेंद्राश्च ब्राह्मणाश्च विशेषतः॥ पूजिताः पूजयंत्येते निर्दहंत्यपमानिता॥ ग्रहा
णामिदमातिथ्यं कुर्यात्संवत्सरादपि॥ आरोग्यबलसंपन्नो जीवेच्च शरदां शतं
एवं समभ्यर्च्य निष्कामो देवादीन्विसर्जयेत्॥ यांतु देवगणाः सर्वे पूजामादाय पार्थि
वीं। इष्टकामप्रदानार्थं पुनरागमनाय च॥ अनेन विधिना यस्तु ग्रहपूजां समारभेत्॥

स वांछितान्कामान्वाप्नोति प्रियस्त्वमेभिर्धीयते। स देवायुतहोमोयं नवग्रहमखः स्मृतः॥ य
प्रतिकूलो ग्रहस्तमेव न तत्त्वदोस्य रे पूज्यः॥ यस्तु पीडाकरस्त्यक्त्वा तु॥ राहुकेत्वोः पृथ
ग्वास्य राभावान्यंद्वार रावगाद्यो॥ अन्यादौ नंदवारे तु पूजयेत्प्रयतो नर इति बौधा
यनकारिकाः॥ तथा॥ विवाहोत्सवयज्ञेषु प्रतिष्ठादिषु कर्मसु॥ निर्विघ्नार्थं मुनिश्रे
ष्ठ तथोद्वेगाद्भुतेषु च॥ वश्यकर्माभिचारादि तथैवोच्चाटनादिकं॥ नवग्रहमखं कु
र्यात्ततः काम्यं समाचरेत्॥ अन्यथा फलदं पुंसो न काम्यं जायते क्वचित्॥ तस्मा
दयुतहोमस्य विधानेन समाचरेदिति हेमाद्रिनिबंधोक्तमयुतहोमविधानं॥
अथास्य संक्षेपप्रयोगः नवग्रहमखस्त्रिविधः॥ अयुतहोमो लक्षहोमः कोटिहो
मश्चेति॥ तत्र श्रीकामादिग्रहपीडायां मृत्यौ ताहोदौ शांतिकामो चरेश्च नवग्रह
मखमयुतहोमं कुर्यात्॥ तत्र प्रशस्तेहनि सुमुहूर्ते स्वगृहे तसंभारो यजमानः कृत
नित्यक्रियः सुप्रक्षालितपाणिपादः स्वाचांतः अमुककामः अयुतहोमेनाहपस्यरति

संकल्प्य पुण्याहवाचनं मातृकापूजनं नांदीश्राद्धं च विधाय ॐ पुण्याहं भवन्तो ब्रुवं
त्विति प्रार्थ्य मंत्रेण वाचनं कुर्यात्॥ ॐ पुण्याहमिति त्रिः श्राव्य तैः प्रति वचनं॥
८७ एवं ॐ स्वस्ति भवन्तो ब्रुवंतु ॐ स्वस्ति ॐ ऋद्धिं भवन्तो ब्रुवंतु ॐ ऋध्यतामिति एवं ब्रा
ह्मणवाचनं विधाय यज्ञऋत्विजश्चतुरो वेदपारगविदो द्वौ वा वृत्वा गृह्योक्तविधि
ना मधुपर्केणार्हयेत्॥ तत आचार्यो यजमानगृहादुत्तरपूर्वदेशे प्रागुदक्प्र रामः
वणायां भूमाववहस्तं संडुमं चतुर्हस्तं विधिना विधाय तस्य मध्यभागे हस्तमा ८७
त्रं कुंडं योनिमेखलासहितं कृत्वा तस्येशाने देशे परदेवतास्थापनार्थं वेदि
कां मृद्धिहस्तविस्तृतां वितस्त्युच्छ्रायां वप्रद्वयावृतां चतुरस्रां एकवर्णां कार्या।
तस्याः प्रथमो वप्रो द्व्यंगुलोच्छ्रायः द्वितीयस्त्र्यंगुलोच्छ्रायः द्वावपि द्व्यंगुलविस्ता
रौ कार्यौ। ततः कुंडमध्ये उपलिप्तसिकतोपकीर्णे स्वगृह्योक्तविधिना भूसंस्कार
पूर्वकमग्निं प्रतिष्ठाप्य अग्रे वेद्यां द्वात्रिंशत्सुरानावाहयेत् अत्र यस्यैकस्थापयेच्च॥

तच्चावाहनं पुष्पतंडुलैः॥ ॐ भूर्भुवः स्वः सूर्य इहागच्छ इह तिष्ठेति प्रयोगेण॥ तेषु सूर्या
दयो नव प्रधानदेवाः॥ रुद्रादयो नवाधिदेवाः॥ अग्न्यादयो नव प्रत्यधिदेवाः॥ विनायका
दयः पंच लोकपाला इति द्वात्रिंशत्॥ तांश्च पूर्वोक्तमंडलादावावाह्य षोडशोपचा
रैः यथोक्तगंधपुष्पधूपदीपनैवेद्यादिभिः संपूज्य वेद्या उपरि वितानकसुशोभि
तं फलपुष्पयुतं दद्यात्॥ यस्य ग्रहस्य यो वर्णस्तस्मै तत्तद्वर्णानि वस्त्रकुसुमानुले
पनादीनि यथोक्तानि गुडोदनादीनि नैवेद्यानि च दद्यात्॥ तत्कालाभे सर्वेभ्यः श्वेताय
से वा दद्यात्॥ तत्र वस्त्रं संपूज्य बहिर्दीपप्रज्वलितपुष्पमालाविभूषितं कृत्वा गंगावाह
आरुयेत्॥ तत्र मंत्राः॥ गंगाद्याः सरितः सर्वाः समुद्राश्च सरांसि च। सर्वे समुद्राः स
रितस्तीर्थानि जलदा नदाः॥ आयांतु यजमानस्य दुरितक्षयकारकाः इति॥ देवदान
वसंवादे इत्यादि प्रसन्नोभव सर्वदेति कलशाः प्रार्थना च कार्या॥ ततो ध्यानं कुर्या
त्॥ तत्राध्यमार्गे विशेषः॥ आदित्यं सोमं भौमं बुधं बृहस्पतिं शुक्रं शनिं राहुं केतुं इति
प्रधानदेवताः॥

ईश्वरमुमां स्कंदं विष्णुं ब्रह्माणं इंद्रं यमं कालं चित्रगुप्तमित्यधिदेवताः॥ अग्निमपो भूमिं
विष्णुमिंद्रमिंद्राणीं प्रजापतिं सर्पान्ब्रह्माणमिति प्रत्यधिदेवताः॥ विनायकं दुर्गां वा
८८ युमाकाशमश्विनाविति पंचलोकपालांश्च॥ अमुकामुकसंख्याभिरर्कादिसमि
द्भिरेकैकयाज्याहुत्या एकैकया चर्वाहुत्या तिलाज्याभ्यां च प्रत्येकं तद्द्रव्येण दशभिर्द
शभिराहुतिभिरथवा तत्संख्याभिश्च व्यस्तसमस्तव्याहृतिभिस्तिलाज्यव्याहुतिभिः
शेषेण स्विष्टकृतमित्यादि यथाशाखोक्तं निर्वपामीत्यादि प्रयोगेण चतुरश्चतुरो रा.मः
मुष्टीन्निर्वपेत्॥ एवं प्रोक्षणेपि सूर्याय त्वा जुष्टं प्रोक्षामीत्यादि प्रयोगो द्रष्टव्यः॥ प्र ८८
क्षालनानंतरं समं विभज्य ज्येदमनुक्रमारति यथादैवतं क्रमेण निर्दिशेत्॥ ततः क्रमे
ण द्वात्रिंशत्स्वाहुतिरष्टपूर्ण्य॥ पद्धैकैव॥ इध्माधानानंतरं यजमानेन द्रव्यत्यागः
कार्यः॥ स च बहुकर्तृके होमे यथाकालं प्रत्याहुति त्यागस्य कर्त्तुमशक्यत्वात्सर्वमेव
होमद्रव्यजातं यद्द्रव्यजातं मनसा देवताभ्यो ध्यात्वा इदं यथादेवतमस्तु न ममेति स

कृत्॥ आपस्तंबश्रौतसूत्रे तु शाखिभिरपि त्यागः कर्त्तव्य इत्युक्तं॥ तथा च तत्सूत्रं॥ सर्पिरा
ज्येष्ठनीयादिद्रव्ययुक्तं कर्त्तारमितीरितं तद्व्याख्याकर्त्तृकपर्दिना तथा व्याख्यातत्वात्॥ ततो यज
मानान्वारब्ध आचार्य आघारावाज्यभागौ हुत्वा सूर्यायेत्युद्देशेन प्रादेशमात्राः कनिष्ठिका
स्थूलाः समिधः मध्वक्ता अर्कादिसमिधः आहुतेनेत्यादिमंत्रेण प्रत्येकं संख्यं हुत्वा ततोन्यस्तन
संख्याभिस्तेन समिद्भिरधिदेवताप्रत्यधिदेवताहोमः कार्यः॥ यद्वाधिदेवतादीनां
पालाशपलाशसमिधो होतव्याः॥ ततः स्रुवेणैकैकामाज्याहुतिं मंत्रेण जुहुयात्॥ ततत्र
स्रुनेव दानधर्मे रौकैको माहुतिं जुहुयात्॥ जमदग्नीनां पंचावत्तं भवति॥ ततः सर्वच
रुभ्योवदायस्योमं राजानमिति मंत्रेण स्विष्टकृतं जुहुयात्॥ एतावदाचार्य एव कुर्वी
त॥ ततो होमार्थकामानुसारेण सर्पिर्यवतिलव्रीह्यादिद्रव्यं सूर्यादिमंत्रैः प्रतिदे
वतं दशदश जुहुयात्कृत्विग्भिस्तानं देवतां मनसा ध्यायन्॥ रुपांशु प्राङ्मुखेन रुद्ध
मुखेन होतव्याः॥ ततः प्रणवव्याहृतिभिः स्वाहांताभिर्व्यस्ताभीष्टकामः समेध्य नामिति

ध्यायंतो वाग्यताश्छंदऋषिदैवतविनियोगज्ञानपूर्वकं समिद्धेग्नौ दक्षिणं जान्वाच्यांत
र्जानुहस्ता यज्ञोपवीतिनः पूर्वाह्ण एव प्राङ्मुखा उदङ्मुखा वा कुर्युः॥ होमसंख्या च समस्य
८० क्तावधानैः कार्या॥ यावद्धोमसमाप्तिस्तावत्प्रतिदिनं होमांते तयोश्चंदनपुष्पादिभिर्ग्र
हदेवताः पूजयेत्॥ ततः शुभे मुहूर्ते होमसंख्यां समाप्य चतुर्गृहीतेन द्वादशगृहीतेन वा
ज्येन फलवस्त्रकुसुमचंदनाक्षतपंचरत्नसुवर्णादियुतां पूर्णाहुतिं मूर्धानमिति मंत्रे
ण यजमानान्वारब्ध आचार्यो जुहुयात्॥ ततो होमशेषं संपाद्य यजमानस्याभिषेकं रामः
कुर्यात्॥ तच्चैवं॥ अग्नेः पश्चिमे सकुंडं वे प्राङ्मुखं पीठोपविष्टं यजमानमुदङ्मुखा ८०
श्चाचार्यश्चत्विजास्तिष्ठंतः पूर्वस्थापितकलशोदकेन समंगलगीतवाद्यं पल्लवदूर्वा
दिभिरभिषिंचेयुः॥ तत्र मंत्राः॥ समुद्रज्येष्ठा इत्यादयः सुरास्त्वामभिषिंचंत्वित्यादयश्च
पौराणाः॥ ततः सर्वौषधैः स्नापितो यजमानो माल्यगंधवस्त्रधरः प्रसन्नचेता आ
चार्यादिभ्यो दक्षिणां दद्यात्॥ तत्र सूर्याय कपिलां पयस्विनीं धेनुं॥ कपिले सर्वभूता

नां पूजनीयासि रोहिणि॥ तीर्थदेवमयी यस्मादतः शांतिं प्रयच्छ मे॥ इति मंत्रेण दद्यात्॥१॥
सोमाय शंखं॥ पुण्यस्त्वं शंख पुण्यानां मंगलानां च मंगलं॥ विष्णुना विधृतो यस्माद
तः॰ इति दद्यात्॥२॥ भौमाय रक्तवर्णां धुरंधरं वृषभं॥ धर्मस्त्वं वृषरूपेण जगदानंदका
रक॥ अष्टमूर्तेरधिष्ठानमतः शांतिं प्रयच्छ मे॥३॥ इति दद्यात्॥३॥ बुधाय सुवर्णं सुसुव
र्णं परिमितं॥ हिरण्यगर्भगर्भस्थं हेमबीजं विभावसो॥ अनंतपुण्यफलदमतः॰ इति दद्यात्
॥४॥ गुरवे पीतवस्त्रद्वयं॥ पीतवस्त्रयुगं यस्माद्वासुदेवस्य वल्लभं॥ प्रदानात्तस्य मे विष्णु
रतः शांतिं प्रयच्छतु॥ इति दद्यात्॥५॥ शुक्राय श्वेताश्वं॥ विष्णुस्त्वमश्वरूपेण यस्मा
दमृतसंभवः॥ चंद्रार्कवाहनो नित्यमतः॰ इति दद्यात्॥६॥ शनये कृष्णां गां॥ यस्मात्त्वं
पृथिवी सर्वा धेनुः केशवसन्निभा॥ सर्वपापहरा नित्यमतः॰ इति दद्यात्॥७॥ राहवे आ
यसं॥ यस्मादायसकर्माणि तवाधीनानि सर्वदा॥ लांगलाद्यायुधादीनि तस्माच्छांतिं
प्रयच्छ मे॥ इति दद्यात्॥८॥ केतुभ्यः छागं॥ यस्मात्त्वं सर्वयज्ञानां मंगले न व्यवस्थितः

यानं बिभावसो नित्यमतः। इति दद्यात्॥ ताम्रं दक्षिणा आदित्यस्य दक्षिणाम्। तथैनोर्याविता
मत्स्येन न्यून्या स्तावन्मूल्यं सुवर्णं स्यात् तत्तस्याः पूरणाय तत्तद्दानसमकालमेव दातव्यं।
९० नचेत्सुवर्णमंत्रः॥ पृथक् पठनीयः॥ अयं मुख्यो दक्षिणापक्षः॥ अथ वासवेभ्यः उक्तार्थिभ्यो
दक्षिणामेकैकां गां सुवर्णभूषितां गवामंगेष्विति मंत्रेण दद्यात्॥ अथवा वासवेभ्यः सुवर्ण
मेव देयं॥ येन वा गुर्वादितो वस्त्रं दद्यात्॥ सामर्थ्ये त्रिंशद्या रत्नभूमीरपि दद्यात्॥ क्रमेणामं
त्राः यस्माद्रत्नं त्र्ययनेकेत्र वस्यास्त्रिवस्य च॥ त्राय्या ममाप्यो न्यस्तु दत्ते जन्मनि जन्मनी राम:
तिष्ठाय्याया॥ यथा रत्नेषु सर्वेषु सर्वे देवाः प्रकीर्त्तिताः। तथा शांतिं प्रयच्छंतु रत्नदानेन मे ९०
सुरा इति रत्नानां॥ यथा भूमिप्रदानस्य कलां नार्हति षोडशीं। दानान्यन्यानि मे शांतिर्भूमि
दानाद्भवत्विह॥ इति भूमेः। वस्त्रालंकारादि चक्रास्त्रिभ्यो यथाश्रद्धं देयं। ततो यजमानोऽग्निं प्र
दक्षिणीकृत्य वेदिसमीपे गत्वा देवताः पूजयित्वा नमस्कुर्यात्॥ तत आचार्यः पुष्पां
जलिं दत्त्वा॥ उत्तिष्ठ ब्रह्मणस्पते। यांतु देवगणाः सर्वे इति देवताविसर्जयित्वा ततो यज

मानाः प्रतिमाः सोपस्करां गुपादिचार्याय समर्पयेत्॥ ततः सभ्यान्पूजयित्वाचार्यादि
क्षमापयेत्॥ प्रतिदेवतं त्रयस्त्र्य एकैको वा ब्राह्मणान् भोजयितव्याः॥ भूरि दक्षिणा च दे
या॥ आशिषो गृहीत्वा स्वबन्धुविनयं विसृज्य सोत्साहः ससुहृद्बांधवो भुंजीतेति॥ यत्रै
केकं ग्रहः पूज्यते तत्राधिप्रत्यधिदेवतयोर्विनायकादीनां चावाहनादीनि कुर्यात् आ
हुतीनामयुतसंख्या च एवं कुर्वतः फलं माहात्म्य॥ अनेन विधिना यस्तु ग्रहपूजां समाच
रेत्॥ स वांछितमाप्नोति प्रत्यक्षमगोमिहीयत इति॥ इति श्रीहेमाद्रिनिबंधे शांतिको
द्योक्त अयुतहोमविधानं समाप्तं॥ अथ लक्षहोमविधानं॥ कथितो युतहोमोयं लक्षहो
ममतः शृणु॥ सर्वकामाप्तये यस्माल्लक्षहोमं विदुर्बुधाः॥ पितृणां वल्लभो यस्माद्भु
क्तिमुक्तिफलप्रदः॥ अस्माद्दशगुणः प्रोक्तो लक्षहोमः स्वयंभुवा॥ आहुतीभिः प्रयत्ने
न दक्षिणाभिस्तथैव च॥ आहुतीभिस्तथान्नेनेति वा पाठः। द्विहस्तविस्तृतं तद्वच्चतु
र्हस्तायतं पुनः॥ लक्षहोमे भवेत्कुंडं योनिवक्त्रं त्रिमेखलं॥ हृदयंगुलोदिता कार्या प्रथ

मामेखला बुधैः॥ त्रिरंगुलोच्छ्रिता तद्वद्द्वितीया समुदाहृता॥ उच्छ्रायविस्तराभ्यां च तृतीया च
तुरंगुला॥ द्व्यंगुलस्तत्र विस्तारः पूर्वयोरपि शस्यते॥ तस्य चोत्तरपूर्वेण वितस्तिचयसं
२१ मितं॥ प्रागुदक्प्रवणं तद्वच्चतुरस्रं समंततः॥ विष्कंभाधोच्छ्रितं प्रोक्तं स्थंडिलं विश्वकर्म
णा॥ विष्कंभो विस्तारः॥ स्थंडिलं वेदिः॥ संस्थापनाय देवानां वप्रत्रयसमावृतं॥ तस्मि
न्स्थापयेद्देवान्पूर्ववत्पुष्पतंडुले॥ गरुत्मानधिकस्तत्र संपूज्यः श्रियमिच्छता॥ सा राम
मध्वनिशरीरस्त्वं वाहनं परमेष्ठिनः॥ विषपापहरो नित्यमतः शांतिप्रणअयं गरुडावा २१
हनमंत्रः॥ एवं विकुंभमामंत्र्य तद्वद्धोमं समाचरेत्॥ स्वहस्तारोपितं कृत्वा स्वमिसं
ख्याधिकं पुनः॥ एवं वेदवसमिदाज्यचरुतिलाज्यादिहोमं द्रवैक्षीरैवमंत्रैः कुर्यात्॥
गरुडमंत्रस्तु सुपर्णोसि गरुत्मानिति मंत्रः॥ घृतकुंभे वसोर्धारां पातयेदनलोपरि॥
ॐदुंबरीमर्थांप्राच ऋज्वीं कोटरवर्जितां॥ बाहुमात्रां स्रुचं कृत्वा ततस्तंभद्वयोपरि
घृतधारां तथा सम्यगग्नेरुपरि पातयेत्॥ श्रावयेत्सूक्तमाग्नेयं वैष्णवं रौद्रमैंद्रं॥

महावैश्वानरं सम्यक्ज्येष्ठसाम च पाठयेत्॥ स्नानं च यजमानस्य पूर्ववत्स्वस्तिवाचनं॥ दात
व्या यजमानेन पूर्ववद्दक्षिणा पृथक्॥ कामक्रोधविहीनेन ऋत्विग्भ्यः शांतचेतसा॥ त
दा अष्टशाचोष्टौ वा लक्षहोमेपि ऋत्विजः॥ कर्तव्याः शक्तितस्तद्वच्चत्वारो वाप्यमत्सराः॥
॥ न वृथा धूमरवाः सर्वे लक्षहोमे दशोत्तरा॥ दद्याच्च मुनिशार्दूल मन्यूनान्यपि शक्तितः॥ शय
नानि च वस्त्राणि हेमानि कटकानि च॥ कर्णांगुलीपवित्राणि कंठसूत्राणि शक्तितः॥ न
कुर्याद्दक्षिणाहीनं वित्तशाठ्येन मानवः॥ अदत्त्वा लोभमोहाद्यो कुलक्षयमवाप्नुयात्॥
अन्नदानं यथाशक्त्या दातव्यं रतिमिच्छता॥ अन्नहीनः कृतो यस्मात् दुर्भिक्षफलदो
भवेत्॥ अन्नहीनो दहेद्राष्ट्रं मंत्रहीनस्तु ऋत्विजः॥ अदक्षिणोपि यष्टारं नास्ति यज्ञस
मो रिपुः॥ न चाप्यल्पधनः कुर्याल्लक्षहोमं नरः क्वचित्॥ तस्मात्पीडाकरो नित्यं यज्ञस्त्वेव
भवति ग्रहः॥ तमेव पूजयेन्नित्यं द्वौ वा त्रीन्वा यथाविधि॥ एकमप्यर्चयेन्नृपा ब्राह्म
णं यज्ञपारगं॥ दक्षिणाभिः प्रयत्नेन बहुन्यावह्वित्तमानाल्लक्षहोमस्तु कर्तव्यो

यदा वित्तं भवेत्कुर्यात्॥ यतः सर्वानवाप्नोति कुर्वन्कामान्विधानतः॥ पूज्यते त्रिदिवःलोके च
स्वादिष्यमरुद्गणैः॥ यावत्कल्पशतान्यष्टौ अथ च मोक्षमवाप्नुयात्॥ सकामो यस्त्वि
मं कुर्याल्लक्षहोमं यथाविधि॥ सर्वान्कामानवाप्नोति पदं चानंतमायं कुमारी च शु
१०२ भं पतिं। भ्रष्टराज्यस्तथा राज्यं श्रीकामः श्रियमाप्नुयात्॥ यं यं कामयते कामं तं तमा
प्नोति पुष्कलं॥ निष्कामः कुरुते यस्तु परं ब्रह्माधिगच्छति॥ इति लक्षहोमफलश्रवणानि॥ रामः
अथ पद्धतिः लक्षहोमे युतहोमादेतावान्विशेषः॥ संकल्पादि पूर्ववत्॥ कुंडं तु समं ततो १०२
यजमानद्विहस्तविस्तृतं कार्यं॥ तच्च क्षेत्रफलेन चतुर्हस्तं भवति॥ तन्मेखलास्त्रेक
मेण द्वित्रिचतुरंगुलोच्छ्रायाः तावद्विस्ताराश्च तिस्रः कार्याः॥ वेदिस्तु तदीशान्यां भू
म्नि षड्विंशदंगुलविस्तारा चतुरस्रा प्रागुदक्प्रवणा वप्रत्रयोपरि दशांगुलोच्छ्रा कार्या।
तस्याः प्रथमो वप्रो द्व्यंगुलोच्छ्रायः॥ द्वितीयतृतीयौ त्र्यंगुलोच्छ्रायौ॥ त्रयोपि द्व्यंगु
लविस्ताराः कार्याः॥ एवं च वप्रैः सहाष्टादशांगुलोच्चा भवति। तत्र देवतावाहन

काले॥ प्रागुक्ताः सूर्याद्या ग्रहाश्चेंद्रादिदेवताश्चावाह्याः सर्वेषामुत्तरतः॥ सामध्वनिशरीरस्त्वं
वाहनं परमेष्ठिनः॥ विषपापहरो नित्यमतः शांतिं प्रयच्छ मे इति पुराणमंत्रेण गरुडमावा
हयेत्॥ पूजादिकलशस्थापनांतं पूर्ववत्कार्यं॥ अन्वाधाने पूर्वोक्तप्रधानदेवताकी
र्तनांते गरुत्मानधिकः कीर्त्तनीयः॥ निर्वापेपि तदर्थमधिको निर्वापः कार्यः॥ प्रोक्षणो
प्येवं त्रयस्त्रिंशत्स्थालीद्रोणका वा स्थाली। पूर्वोक्तदेवसमिदाज्यचरुप्रकल्पितद्रव्या
हुति होमः कार्यः। सर्वेषां गरुत्मतश्च पूर्वोदितमंत्रैः॥ होमांते तु स्रुवसंपातो। स्विगरुत्मा
निति मंत्रो ज्ञेयो होमादौ रंध्रमित्रमिति। समिदादिसंख्याव्यतिरेकेण व्यस्तसमस्त
व्याहृतिभिः पूर्ववदेव लक्षसंख्या पूरणीया॥ पूर्णाहुत्यनंतरमग्नेरुपरिस्तंभद्वयवि
दत्तामौदुंबरीं स्रुचं पर्णशाखाविवर्जितां बाहुमात्रां विधाय तया तदुपरिस्थं स्वकला
विधृतेन घृतपूरितेन कुंभेनाधोयवमात्रछिद्रेण धारां मुंचता अग्नेरुपरि वसोर्धारां पा
तयेत्॥ तदा चाग्नेयादीनि सूक्तानि महावैश्वानरं ज्येष्ठसामानि च श्रावयेत्॥ द

क्षिणा चायुत होमाद्दशगुणा दशधेन्वादि रूपां देयास्यांघ्रिदेशेन । दशांशाप्याया: ॥ अ
युत होमाद्दशगुणा निःदशगुणा भूसि श्च देया ॥ मंत्राश्च एव ॥ शक्तिमांश्चेन्मूषणाशय
१०३ नासनेवस्त्राणि । हेमकटकस्वर्णांगुली पवित्रकं कंठसूत्रादीन्दद्यात् ॥ अयुत होमा
दशगुणा भोजनं कार्यं विसर्जनादि समानं । फलं तु प्रागेव लिखितं ॥ ॥ इति श्रीमदनंत
भट्टविरचिते विधानपारिजाते लक्षहोमपद्धतिः ॥ अथ कोटिहोमविधानं ॥ तत्र म
त्स्यपुराणे ॥ अस्माच्छतगुणः प्रोक्तः कोटिहोमः स्वयंभुवा ॥ कार्यो वेदवेदांगवेदिनः ॥ रामः
णाव द्वादश तान् विप्रान्वस्त्रमाल्यानुलेपनैः ॥ पूर्ववत्पूजयेद्भक्त्या सर्वाभरणाम्बरैः ॥ १०३
रात्रीसूक्तं च रौद्रं च पावमानं सुमंगलं । पूर्वतो बह्वृचः शांतिं पठन्नास्त उदङ्मुखः ॥ शा
क्ररौद्रं च सौम्यं च कौष्मांडं शांतिमेव च ॥ पठेद्दक्षिणे द्वारि यजुर्वेदिकमुत्तमं ॥ सौप
र्णमथ वैराजमाग्नेयं रौद्रसंहितां ॥ ज्येष्ठसाम तथा शांतिं छंदोगः पश्चिमे पठेत् ॥
शांतिसूक्तं च सौरं च तथा शाकुनकं शुभं ॥ पौष्टिकं च महाराजमुत्तरेणाप्यथर्ववित् ॥

पंचभिः सप्तभिर्वापि होमः कार्योपि पूर्ववत् ॥ स्नाने दाने च मंत्राः स्युस्तथैव मुनिसत्तमः ॥ ए
षोद्देशविधानं च लक्षहोमवदिष्यते ॥ अनेन विधिना यस्तु कोटिहोमं समाचरेत् ॥ स
र्वान्कामानवाप्नोति ततो विष्णुपदं व्रजेत् ॥ यः पठेच्छृणुयाद्वापि स्मरेन्नाति त्रयं नरः ॥ स
र्वपापविशुद्धात्मा पदमिंद्रस्य गच्छति ॥ अश्वमेधसहस्राणि दश चाष्टौ च धर्मवित्
॥ कृत्वा यत्फलमाप्नोति कोटिहोमाच्च मश्नुते ॥ ब्रह्महत्यासहस्राणि भ्रूणहत्यार्बु
दानि च ॥ नश्यंति कोटिहोमेन यथा वशिष्ठभाषितं ॥ कोटिहोम प्रकर्तव्या यदावि
त्तं भवेद्बहु ॥ सर्वान्कामानवाप्नोति कुर्वन्कामान्विधानतः ॥ पूज्यते शिवलोके च ब्र
ह्माब्दियमेकं तु ते ॥ यावत्कल्पशतान्यष्टौ अथ योक्षमवाप्नुयात् ॥ सकामो
यास्त्विमं कुर्यात्कोटिहोमं यथाविधि ॥ तं तं सममवाप्नोति पदं चानंतमश्नुते ॥ पुत्री
पौत्रनप्तृपुत्रानित्या लक्षहोमवत् ॥ तथा ग्रहमज त्रयं कुर्याच्छस्वानाच्छनमान
वः ॥ न तस्य ग्रहपीडा स्यान्न च बंधुजनक्षयः ॥ ग्रहयज्ञत्रयं गेहे लिखितं यस्य

तिष्ठंति। न तत्र पीडा बालानां न रोगो न च बंधनं॥ अशेषयज्ञफलदमशेषाघौघनाशनं
कोटिहोमं विदुः प्राज्ञा भुक्तिमुक्तिफलप्रदं॥ अश्वमेधफलं प्राहुर्लक्षहोमं सुरोत्तम॥
दादुशाह समस्तद्य लक्षहोमस्य यत्फलं स्मृता॥ द्वादशाहो यज्ञस्तत्फलं प्रदस्येयं॥ इतिक
१०४ थितमिदानीमुस्मवानं देहे तु सकलकलुषहारी देवयज्ञाभिषेकः॥ परिपठति यश्च
त्यंयः शृणोति तस्यादिमिभवति सत्त्वनाश्चरारोग्ययुक्तः॥ इति मात्स्ये कोटिहोममहत्त्व
वाक्यानि॥ अथास्य प्रयोगः॥ अत्रापि लक्षहोमवदवानुष्ठानं॥ यदा शीघ्रं समाप रामः
यितुमिच्छति तदा होमकर्त्र पक्षे यो विधिकाश्यपियचाष्टवरीतव्याः॥ अत्रा १०४
पिगस्मातास्य हेवत्रयलिङ्गद्वैवताः प्रत्याकुंडवेदिकयोः कोटिहोमिच चुरस्त
मित्यादिविशेषो द्रष्टव्यः॥ ग्रहहोमः॥ पूर्ववत्॥ व्याहृत्या हुतेयस्तु कोटिमिता हो
तव्यः॥ दक्षिणा तु लक्षहोमाद्द्विगुणा सहस्रं धेनवः॥ सहस्रं शरव इत्यादिः॥ दाने
मंचस्सरावा॥ यद्धास्य— गा॥ सुवर्णभिषिताः सोपस्करा स्त्र्यांश्चुदुशेन देया॥ तत्र उत्तरा व॥

अथवा सर्वेभ्यः सुवर्णं दद्यात्॥ तत्नादिदानं पूर्ववत्॥ ब्राह्मणभोजनमयुतहोमात्सहस्र
गुणं॥ अन्यत्सर्वं लक्षहोमवन्मंतव्यं॥ इति हेमाद्रिनिबंधे शांतिकांडीका॥ नि अयुतहो
मलक्षहोमविधानानि॥ अथ महायज्ञसाधारणो विशेषः॥ हेमाद्रावेवोक्तमास्या
यने कुंडे तथा च वश्यकर्मणि॥ त्रिमेखलं चैकवक्त्रमरत्निविस्तरेण तु॥ पालाशस्स
मिधः शस्ता मधुगोरोचनान्विताः॥ चंदनागरुणा तद्वत्कुंकुमेनाभिषेविताः॥ होम
येन्मधुसर्पिर्भ्यां बिल्वानि कमलानि च॥ सहस्राणि दशैवोक्तं तद्दिवसत्रयं सुवा॥
वश्यकर्मणि॥ बिल्वानां पद्मानां चैव धर्मवित्॥ सुमित्रिया न आपः ॐ धयरति हो
मेयत्॥ न चात्र स्नपनं कार्यं न च कुंभाभिषेचनं॥ स्नानं स्यादौषधैः हुत्वा सुहृत्कुपु
ष्पां बरोरुहा॥ कंठसूत्रैः सकटकैरंगुलीयपवित्रकैः॥ सूक्ष्मवस्त्राणि द
यानि शुक्लगावः सकांचनाः॥ अवशानि वशी कुर्यात्सर्वशत्रुबलान्यपि॥ अभि
चाराय पिमि त्राणि होमायं पापनाशनं॥ द्विद्विषणाभिचारे च त्रिकोणं कुंडमीष्यते॥

द्विमेखलं कोणमुखं वृत्तमायं च सर्वतः। होमं कुर्युस्त्रियो विप्रा रक्तमाल्यानुलेपनाः॥ निवा
लोहितोष्णीषा लोहिताम्बरधारिणः॥ वरं वायसपक्षाश्च अजापात्रपुटसमन्विताः॥ समिधो
८०५ वामहस्ते न श्येनास्थिलवणो युताः॥ होतव्याः श्मश्रुकेशैश्च ध्यायद्भिरहितं रिपोः॥ दु
र्मिचियास्तस्मिन् सं तु नथा हुं फट्दीतीति चाश्येनाभिचारमंत्रेणासुरं सत्ताभिमंत्रितं॥ प्र
तिरूपं परि पोः कृत्वा सुरेण परिकल्पयेत्॥ हृद्गूप रूपस्य सकलं न्यंगा सर्गो विनिक्षि
पेत्॥ ग्रहरूपजविधानां तु सादे वाभिचरन्नरं॥ विद्वेषणं तथा कुर्वन्ति तदेवं समाचरेत्तु रामः
इहैव फलदं पुंसां तन्नामुत्र शोभनं॥ अमुत्र परलोके न शोभनं नरकहेतुरित्यर्थः॥ ८०५
तस्मात् शांतिकरं त्वत्र कर्तव्यं मतिमद्भुतं॥ ग्रहयज्ञं यं कुर्यात् स्वच कामेन मानवः॥
स चिह्नतःपदमाप्नोति पुनरावृत्ति दुर्लभं॥ यस्येदं श्रृणुयान्नित्यं श्रावयेद्वापि मान
वः॥ न तस्य ग्रहपीडा स्यान्न च बंधु धनक्षयः॥ ग्रहयज्ञं त्वयं गेहे लिखितं यस्य तिष्ठति॥
न पीडा तत्र बालानां न च रोगो न बंधनं॥ अशेषयज्ञफलदमित्यादि पूर्ववत्॥ इति ग्र

हयज्ञोपयुक्तविशेषः॥ अथ महांतो युतहोमलक्षहोमकोटिहोमा उच्यंते॥ हेमाद्रौ
वे च मत्स्ये॥ राज्ञाथ प्रसक्तेन प्रजानां च हितेप्सुना॥ ग्रहयज्ञः सदा कार्यो लक्षहो
मसमन्वितः॥ नदीनां संगमे चैव सुराणां सन्निधौ तथा॥ सुसमे भूमिभागे च देवताधिष्ठि
ते नृपः॥ गुरुणा ऋत्विजैश्चैव सार्धं भूमिं परीक्षयेत्॥ खनेद्धस्तत्र कुंडं च सुसमं हस्तमा
त्रकं॥ द्विगुणं लक्षहोमे च कोटिहोमे चतुर्गुणं॥ युग्मे शोकृत्विजः प्रोक्ता अष्टौ ते वेदपा
रगाः॥ कंदमूलफलाहारा दधिक्षीराशिनोपि वा॥ वेद्यां निधापयेच्चैव रत्नानि विधानि
च॥ कुंडं उर्ध्वं परिधेयांश्वेतनाम्नि च समर्चयेत्॥ कृष्णा लोमहारस्यार्थः। परिधेयाः प्रा
णीतस्यार्थः। गायत्र्यष्टशा साहस्रं मानस्तोकेति षड्गुणाः॥ त्रिंशाद्रूणा दिमन्त्रेश्च चत्वा
रि॥ ~~माय~~ मावतु वेदचेः कूष्मांडैर्जुहुयात्त्वं च किरिकायां तु षोडश॥ होतव्या दशसाह
स्रा अर्धो वेजान वेदसा॥ श्रियामंत्रेण होतव्याः सहस्राणि चतुर्दश॥ शेषाः पं
चसहस्राणि तु होतव्यास्त्वं द्रदेवतैः॥ कुनेशातसहस्रे तु पुष्पस्नाने विनिर्दिशेत्॥ कुंभेः

षोडशांशं रक्तैश्च सहितैः सुमंगलैः ॥ स्नापयेद्यजमानं तु ततः शांतिर्भविष्यति ॥ एवं कृते
तु यत्किंचिद्दुष्कृतं पीडास्य मुद्भवं ॥ तत्सर्वं नाशमायाति कृत्वा कुंभं वै दक्षिणान्वयः ॥ तस्मात्स
२०६ र्वप्रयत्नेन प्रधाना दक्षिणा स्मृता ॥ हस्तस्य श्वेतरथयाना निर्मितं वा सोयुगं निचा ॥ अत
तु होकारयेत् ॥ मासे प्राप्ते स्वमासि सुलक्षहोमे न वेदिता ॥ लक्षहोमे तु राजेंद्र विधानं
परिकीर्तितं ॥ इदानीं कोटिहोमस्य श्रेणु त्वं कथयाम्यहं ॥ गंगातटे च यमुनासर
स्वत्यो नराधिप ॥ नर्मदा देविकायां च कोटिहोमो विधीयते ॥ तत्रापि ऋत्विजः कार्या रामः
रविनंदन षोडश ॥ सर्वहोमेषु राजेंद्र यावद्विधिषु पावनी ॥ ऋत्विगाचार्यसहितो २०६
दीक्षां संवत्सरं स्थितः ॥ चैत्रमासे तु संप्राप्ते कार्तिके वा विशेषतः ॥ प्रारम्भे कर्मणां
यो वा वत्सरे वत्सरे नृप ॥ यजमानः पयो भक्षी फलाशी च तथा नघ ॥ यदि वा व्रीहयो माषा
स्तिलाश्च सहस्रपिष्टाः ॥ पलाशाः समिधः शस्ता वसोर्द्धारा तथोपरि ॥ मासे च प्रथमे प
द्या धृतिप्रस्तीर भाजनं ॥ द्वितीये कृशरोपेतं यावकं माषसाधनं ॥ संयावकं तृतीये

ष्ये देयं रविनंदन ॥ चतुर्थे मोदकाद्येन प्राणप्रीतिमावहेत् ॥ पंचमे दधिभक्तं तु षष्ठे
वै सक्तुभोजनं ॥ अपूपाः सप्तमे देया अष्टमे घृतपूरिका ॥ षष्ट्योदनं च नवमे दशमे यव
षष्टिका ॥ एकादशे समासं तु भोजनं रविनंदन ॥ द्वादशे त्वथ संप्राप्ते मासे रविकुलोद्व
ह ॥ षड्रससंयुक्तं भक्ष्यभोजनं सार्वकामिकं ॥ कृत्वा सुराणां राजेंद्र पश्चात्समन्वि
तैः ॥ दानानि सर्वदेवानां प्रीतये च समाचरेत् ॥ देया द्विजानां राजेंद्र मासि मासि च
दक्षिणा ॥ अहतवासाः संवीतैर्दिनार्धे होमयेद्दिने ॥ तस्मिन्सदा स्थिते भार्यां यजमाने
संयुते ॥ इंद्राग्न्यादिसुराणां च प्रीणनं सार्वकामिकं ॥ एवं कृत्वा विधानेन पूर्णाहुतिः
नु ॥ ते शता ॥ सहस्रगुणितां देया यावद्धुतस्य हस्तकं ॥ पुरोडाशेन ततः प्रपूज्य देवतीर्दिव
ती चेच क्रे लिंगे ॥ उद्या ~~[illegible]~~ सामान्यवाक्यं च पुनः प्रपूजयेद्द्विजान्नृ
प्रीणयित्वा सुवासवान्वित्वं चैव यथाक्रमं ॥ कृत्वा शास्त्रविधानेन तु पिंडदानं सत
पर्णा ॥ समो नीतस्य होमस्य विप्राणां च दक्षिणा ॥ देयेति शेषः ॥ तुलां चैव समो

कृत्वा वह्नौ शेषपद्मं पुनः॥ आत्मानं तोलयेत्तत्र पत्नीं चापि द्वितीयके॥ सुवर्णेनैव चा-
त्मानं रजतेन तथा प्रियां॥ तोलयित्वा ततो राजन्वित्तशो शेषविवर्जितः॥ दत्वा शतसहस्रं
१०७ तु श्रुद्धस्य कनकस्य तु सर्वस्वं वा प्रदेत्तत्र सत्य कलत्रमेतु॥ एवं सर्वोपचारेण तु देवमा
तुषकारिणे॥ एवं शांतिस्तथाख्याता यां कृत्वा सुखी भवेदित्यादि॥ अथ प्रकरहोम
हायुतहोमोपयुक्तिः। खनेद्वृत्तकुंडं च सुसमं हस्तमात्रं कौमित्युक्तमान्॥ स तत्कलु
मो वा नोति कृत्वायज्ञ त्रयं त्रपत्नं तेतु पसंहाराच्चो। तच्चलक्षहोमाहुतीनां दशमो भागो राम:
यथा यथा माहुतिसंख्या॥ कोटिहोमे शातगुणि। ता लक्षहोमो हुते यइति॥ इति होमा १०७
द्रिनिर्बंधे शांतिकां देमविधानं॥ अथाता संप्रवक्ष्यामि द्विजेंद्राः श्रूयतामिदं॥ लक्षहो
मविधिं पुण्यं कोटिहोमविधिं तथा॥ स्वयंभुरयमुवाच प्राकृत्सभेत्ता तपितामहा-
॥ तमिस्सर्वं प्रवक्ष्यामि श्रूयतां पापनाशनं॥ ये चेलु आलप्ततो कार्यमिमि यांयच्छ्रेमं
उपं॥ याः सनिधौ ये चमं त्राख्य अन्यन्नत्रैव यन्दवेत्॥ लक्षहोमविधिं विप्राः॥ ॥

कथ्यमानं बोनियत। कुम्मा अकृत्विजः कार्या आस्नणाये विपश्चितः॥ नियमं व्रतसंप
न्नाः स्वकिताः पार्थिवेन तु। नित्यं जपपराश्चैव नियोज्यास्तादृशा द्विजाः। कंदमूलफ
लेराराद्दक्षिक्षीराशिनोपियो॥ प्राग्वोदं च हस्तोदेशे समं स्थंडिलमेव चा। तत्रावेदिं
प्रकुर्वीत पंचांगुलसमुद्धृतां। दक्षिणोत्तरतो यामं त्रिंदरलिः पूर्वपश्चिमे॥ कुंडे
च खनितव्यानि मंगुलान्येकविंशति॥ निधापयेद्धिरण्यानि रत्नानि विविधानि
च॥ सिकतोपरि देयाच तत्राप्यग्निं समिंधतो महो श्रेवस्तनस्तत्रान्प्राच्यादिशिस
मर्चयेत्॥ अवदानविधानेन स्थाली पाकं प्रकल्पयेत्॥ आज्यभागाहुती हुत्वा
नेवाहुत्यो तु होमयेत्॥ अग्निं सोमं च तत्रैव विष्णुं चैव प्रजापतिं। विश्वे देवान्के
हुंद्रं चैमि त्रिविष्टकृते तथा॥ दधिमधुघृताक्ताश्च समिधश्चैव तु यज्ञिया॥ होम
येद्धुतस्तस्य स्यमंत्रेश्चैव यथाक्रमं। चतुर्विंश॥ २४ गायत्र्या मानरतोके लिख
इतथा। द्वात्रिंश अहदिमंत्रै श्चतस्मो विष्णुदेवाते॥ ४॥ कुर्मांडं जुहुयात्संच-

किंस्क पातुक्तो षोडश।।१६।। जुहुयाद्दशसाहस्रं जातवेदसे रन्ध्रचा१०००० पंचसहस्रमात्रा
रायान्यानि जुहुयाद्दिं द्रवैः।।५००० हुनेश। तस्य हस्ते तु अभिषेकं तु कारयेत्।।पूर्वाभि
१०८ षेकवत्प्रोक्तं तदत्रापि प्रयुनप्रदं।।अथ षोडशकुंभैश्च स्थिरलेपैः स्वमंगले।।सर्वौष
धिसमायुक्तैः सर्वरत्नोविमिश्रितैः।।अभिषेकं ततः कुर्यास्तिनमंत्रैर्यथोदितैः।।स्वा
मीनं तु ततस्तस्मिन्प्रधानादक्षिणा स्मृता।।गृह्या अस्यरत्नयानानि भूमिं वस्त्रयुगानि
च।।अनदुहो गोशतं दद्याद्द्विजांश्चैव दक्षिणां।।एषश्चैकादशाद्वैवादशेद्योऽर्हधे राम।
नवः।।स्वशक्त्या वा प्रदद्यात्ता वित्तशाठ्यं विवर्जयेत्।।एवं कृते च यत्किंचिद्रूपपीडा १०८
समुद्भवं।।भौममाकाशजं वापि अन्यद्वा यद्विजायते।।तत्सर्वं लक्षहोमेन प्रशामं
यास्यसंशयं।।शांतिर्भवति पुष्टिश्च बलं तेजः प्रवर्द्धते।।वृद्धिर्भवति राष्ट्रं च सर्वो
पद्रवसंक्षयः।।इति वृहत्सारासारे लक्षहोमविधानं।।अथ कोटिहोमविधानं।।
अथातः संप्रवक्ष्यामि कोटिहोमविधिं द्विजाः।।श्रूयतामादरेणायं सर्वकामफलप्रदः।।

सानुष्ठानाद्विजाः प्रोक्ता ऋत्विजो यागकर्मणि।।विधिज्ञाश्चैव मंत्रज्ञाः सदाचाररताश्च ये।।
कार्याश्चैव विशेषेण ग्रहयागविधौ विदुः।।एकांगविकलो विप्रो यतनधा नेधा न्यायहा
रकः।।सर्वांगविकलो पुष्प यजमानस्य हिंसति।।तस्मात्सर्वप्रयत्नेन विद्विषमं वादिविद्वि
जो।।कार्याश्चैव प्रयत्नेन ग्रहयज्ञस्य सिद्धये।।ग्रहाः फलंति नागाश्च सुराश्चैव नरे
श्वराः।।अधीताश्चैव मंत्राणां मेरोत्तरशतं शतं।।स एवं ऋत्विग्विज्ञेयाः सर्वकामफल
प्रदः।।आवाहनीयो यत्नेन प्रतिपत्समुद्भुमहुः।।एवं कृते च यत्किंचिद्रूपपीडा
समुद्भवं।।तत्सर्वं नाशयेत्क्षिप्रं कृतघ्नः सौहृदं यथा।।लक्षाद्धं तगुणः प्रोक्तः को
टिमंः स्वयंभुवा।।आहुतीभिः प्रयत्नेन दक्षिणाभिः फलेन तु।।पूर्वविऊहदेवानामा
वाहनविसर्जने।।होममंत्रास्तथैवोक्ता स्नानं दानं तथैव च।। ।।० ।।० ।।०
मंडपस्य च वेद्याश्च विशेषं तु निबोधत।।कोटिहोमे चतुर्हस्तं चतुरस्रायतं पुनः।।
योनिवक्त्रद्वयोपेतं तेषां कुंडं त्रिमेखलं।।कुंडे नौद्धृतं ताकार्यं प्रथमामेखल

लाबुधैः॥ अंगुलेनोच्छ्रिता तद्वद्द्वितीया मेखला स्मृता॥ उच्छ्रिता मेखलान्यातु तृतीया चतुरंगु
ला॥ द्विगुणस्तत्र विस्तारः पूर्वयोरेव तास्मृते॥ वितस्तिमात्रा योनिः स्यात्षट्सप्तांगुल
१०१ विस्तृता॥ कूर्मपृष्ठोच्छ्रिता मध्ये पार्श्वतश्चांगुलोच्छ्रिता॥ गजोष्ठसदृशी तद्वदायता
च्छिद्रसंयुता॥ एतत्सर्वेषु कुंडेषु योनिलक्षणमुच्यते॥ मेखलोपरि सर्वत्र अश्वत्था
दलसंनिभा॥ वेदी च कोटिहोमस्याद्वितस्तीना चतुष्टयं॥ चतुरस्रा समा तद्वद्भि
विप्रैः समावृता॥ वप्रत्रयसमायुक्ता पूर्वोक्तं वेदैः कार्यस्तथैव च॥ ततः षोडशहस्तः स्या राम:
न्मंडपश्च चतुर्मुखः॥ पूर्वद्वारे तु संस्थाप्य बह्वृचं वेदपारगं॥ यजुर्वेदं तथा या १०१
म्ये पश्चिमे सामवेदिनं॥ अथर्ववेदिनं तद्वदुत्तरे स्थापयेद्बुधः॥ अष्टौ तु होतृकाः का
र्या वेदवेदांगवेदिनः॥ एवं द्वादशते विप्रा वस्त्रमाल्यानुलेपनैः॥ पूर्वविसृजयेमन्त्यास
र्वाभरणभूषितैः॥ रात्रिसूक्तं च सौरं च पावमानं सुमंगलं॥ पूर्वद्वारे जपेच्छांति पावमान
सुषडंगमुखः॥ शाकंभरौद्रं च सौम्यं च कूष्मांडं शांतिमेव च॥ पाठयेद्दक्षिणद्वारे यजु

र्वेदमनुत्तमं॥ सौवर्णामाथ वैराजमाग्नेयं रुद्रसंहितां॥ ज्येष्ठसाम तथा शांति छंदोगः पश्चिमे
पठेत्॥ स्वविधानैः तथा शांतिमथर्वोत्तरपठेत्॥ पंचभिः सप्तभिः वापि होमः कार्यस्त्वथर्व
वेत्॥ स्नाने दाने च मंत्राः स्युः पूर्ववद्विजसत्तमः॥ वसोर्धारविधानं च लक्षहोमवदिष्यते
अनेन विधिना यस्तु ग्रहपूजां समाचरेत्॥ सर्वकामनवाप्नोति ततो विष्णुपुरं व्रजेत्॥
यः पठेच्छृणुयाद्वापि ग्रहयागमिमं बुधः॥ सर्वपापविशुद्धात्मा पदमिंद्रस्य गच्छति॥ अश्व
मेधसहस्राणि अग्निहोत्रशतानि च॥ नश्यंति कोटिहोमेन सत्यं सत्यं वचनं॥ यथा॥ तस्मा
त्सदा प्रयोविदध्याद्दृष्टि मज्ञासौख्यवनस्य बुध्येः॥ आयुष्य च द्वैविजयाय कीर्त्ये
लक्षादिहोमरूपागमेन तु॥ २०० इति रुद्रकल्पारोशे महाकोटिहोमविधानं॥ ३ अथ प्रकारांत
रेण लक्षहोमविधानं॥ हेमाद्रौ शांतिकांडे देवीपुराणे॥ मनुरुवाच॥ ग्रहपूजाप्रकर्त
व्यस्तु प्रकाम्यहोमे ग्रहादिपूजायां शतमष्टादिकं॥ तथा॥ अष्टाविंशतिहोमस्तु यथा प्रा
क्षोमसादि तिथिविधीयते स्तु कामिनिहितं॥ लक्षहोम॥ स्त्रि वारस मान्नेकनवायुसंमे स
सहस्राणि दश चाष्टौ च धर्मवित्॥ कृत्वा यत्फलमाप्नोति तत्कोटिमात्त रस्तु ने॥ ब्रह्महत्या॥ दि

प्रकर्त्तव्यः सर्वपीडानिवारकः॥ गायत्र्या ग्रहमंत्रैश्च कुर्यात्कुंडे जातवेदसे॥ रौद्रवारुणवा
न्नेयवायुसौम्यैः सावित्रैस्तथा॥ होमं शान्तसहस्रं तु अष्टोत्तरं विधीयते सर्वपीडाविनाशा
यकोटिहोमः शुभावहः॥ यवव्रीहिघृतक्षीरैर्लक्षं तु प्रसाधकं॥ पंकजोशीरबिल्वाम्र
१०० दलाहोमे प्रकीर्त्तिताः॥ सर्वशास्त्रार्थकुशलैर्ग्रहमात्रप्रपूजकैः॥ होमः कार्यः सदावि
प्रैः सर्वशांतिप्रदायकः॥ ग्रहोत्थोपसर्गादि हंतु नागभयाशुभं॥ यक्षरक्षःकृतापीड
डा लक्षहोमात्प्रणश्यति॥ ब्रह्मोवाच॥ सर्वलोकोपकाराय संक्षेपान्न तु विस्तरात्॥ राम।
लक्षहोमं प्रवक्ष्यामि यथा प्रोक्तं तु शंभुना॥ भूमिकंपे दिग्दाहे ग्रहयुद्धे उपस्थिते॥ १००
केतुसंदर्शने चैव आदित्यस्य तु कंपने॥ हतप्रवर्ते तथा सूर्येन तथा दिग्दाहसमन्विते॥ र
हवृद्धिस्तथा नद्यो विपरीता वहंति वै। निर्घाते गगनोत्पन्ने संवारिमध्ये वहेच्छिला।
उपसर्गास्तथा लोके राज्ञां तु क्षयकारकाः॥ यस्य राज्ञो ग्रहाः पंच अष्टमस्थास्तु रा
धिपः॥ ग्रहणं चंद्रसूर्यस्य ग्रहे वाष्टमसंस्थिते॥ बलिदाने प्रकर्त्तव्यं मांसैणापूजनं हितं॥

सूर्यस्याभ्यर्चनं कार्यं त्रिविधस्याशुभनाशनं॥ लक्षहोमं महाकोटिहोमं पुरोदितं॥ म
हाहोमं महालक्षहोमं॥ गोभूहिरण्यवस्त्रान्नतिलदानं शुभावहं॥ पायसं क्षीरदध्या
ज्यं देयं नैवेद्यमुत्तमं॥ एकलिंगे प्रकर्त्तव्यं अथ विप्रगृहेषु च॥ एकमेव लिंगमेकलिं
गमिति विग्रहः॥ वृषविनायकादिरहितमित्यर्थः॥ तदपि प्रत्यङ्मुखं सिद्धलिंगं॥ सि
द्धे वनवर्त्ये पुरप्रधाने पवेश्मनि। ब्राह्मणैः शुचिभिः स्नातैः संयतैर्मंत्रपारगैः॥
वेदोक्तविधिना कार्यं विजयार्थमनुत्तमं॥ बाहुमात्रे ततः कुंडे जंघामात्रेऽथवा पुनः॥
होतव्यं सुरराजेंद्र नान्येषु विधिरीश्वर। अथ ते कथयिष्यामि लक्षहोमस्य यो वि
धिः॥ शुभे मनोरथे स्थाने देवतायतनेऽथवा॥ नृपवेश्मनि कर्त्तव्यं कुंडे सर्वार्थसा
धकं॥ चतुर्हस्तं तथा निम्नं विस्तारं सुरसत्तम॥ सर्वेषां शुभदं कुंडे मेखलासंयुतं भ
वेत्॥ षोडशांगुलविस्तारमुच्छ्राये षोडशांगुलं॥ चतुरंगुलमध्ये वेदाज्यं च चतुर्हस्तस्य
कीर्त्तितं॥ द्वात्रिंशांगुलविस्ताराद् — द्विगुणा विस्तरा॥ योनिः कुंडे प्रकर्त्तव्या ना

छिकास्तेषु ज्ञेते कश्चित् ॥ हस्ते मा चैव तथा कुंडे नियुतहोमविधी मते ॥ लक्षहोमे शुभं खा
तं च तु हस्तं सुराधिप ॥ यव व्रीहि घृतं क्षीरं तिलाः कंगुलकानि च ॥ चैतस्य सुराजेंद्र
१०१ पालाश्याः समिधस्तथा ॥ हवींषि कुंडसमाख्येषु ज्येष्ठानि दुर्व्वाः शुभावहाः ॥ गायत्र्या त्र्यंब
केणाथ शान्तवा वैष्णव्याथापि वा ॥ जातवेदसमंत्रेण सहस्रं द्रेण चैव हि ॥ सहस्रशी
र्षेण च तथा हिरण्येन तथापि वा ॥ रुद्रमंत्रैस्तथा सौरैः पंचरात्रागमोदितैः ॥
हिरण्येन नमो हिरण्यबाहवे इत्यादिना ॥ होतव्यं शतमष्टौ तु सहस्रं लक्षसंख्यया ॥ राम:
पंकजोत्पलबिल्वादि होमद्रव्यं शुभावहं ॥ कंपनं स्वेदकंपैच उर्ध्वे शुपातः प्रजल्पनं ॥ १०१
देवतानां सुराध्यक्ष उत्पाताः क्षयकारकाः ॥ लक्षहोमं प्रकुर्वीत कोटिहोममथा
पि वा ॥ गोदोहरुद्रमवने महास्नानं शुभावहं ॥ अन्यथा नरके घोरे जायते राजवि
भ्रमः ॥ दुर्भिक्षस्य च नाशं च सुखं नाशं सुराधिप ॥ जायते नात्र संदेहः स्वयं हि म
म भाषितं ॥ ये देवास्ते महाःस्वर्वैयस्ते भुजंगमाः ॥ मेघाश्चैते समाख्याता लोके र

क्षिप्रदायकाः ॥ तेषां संदर्शनात्क्षि संदीप्यते पुरुषो मवेदिति गायत्र्या च युक्तेनैवादिहो
मविधानं ॥ नृसिंहपुराणेपि ॥ दुःस्वप्नदर्शने घोरे मारूपीडासु चात्मनः ॥ स्त्रीप्रतिमा ह
दृष्ट्वा चलंती च विशेषतः ॥ प्रस्वेदयुक्तां प्रतिमां दृष्ट्वा बोनुपनंदने ॥ तथा महाज्वरग्रस्ते
धारां देवस्य मस्तिनि ॥ सततां नरसिंहस्य कुर्याद्धा कारयेद्द्विजैः ॥ होमं च भोजनं चैव
तस्य दोषः प्रणश्यति ॥ अयने विषुवे चैव चंद्रसूर्यग्रहे तथा ॥ नरसिंहसमाराध्य ल
क्षहोमं तु कारयेत् ॥ शांतिर्भवति राजेंद्र नस्यतस्यानवासिनं ॥ अनावृष्टिर्महा
मारी ज्वरदोषमयेन तथा ॥ नरसिंहं समाराध्य ब्राह्मणैर्वेदपारगैः ॥ कारयेल्लक्ष
होमं तु ग्रामे च पुराधिपः ॥ दृष्ट्वोपसर्गमरणं प्रजानामात्मनश्च हि ॥ सम्यगा
राधनं चैव नरसिंहस्य मंदिरे ॥ शंकरायतने वापि कोटिहोमं नराधिपः ॥ कार
येन्नृसंयते विप्रैः स्वभोजनसदक्षिणः ॥ कृते तस्मिन्यथोक्ते तु भागदद्याति न तम्र
यं ॥ एवमादिफलोपेतं नारसिंहार्चनं नृप ॥ कुरुत्वं भूपतेः पुत्र यदि वांछसि स्वस्ति ॥

इतः परतरं नास्ति स्वर्गमोक्षफलप्रदं। दरिद्रे दुष्करं कर्तुं देवदेवस्य पूजनं।संस्मरणे
पुल्लानि पत्रपुष्पाणि पार्थिव।।तोयं नदीप्रवाहे तु देवः साधारणः स्थितः।।मनोनि
१०२ यममयस्यैकं विष्णवाराधनकर्मणि।।मनोनियमितं येन तस्य मुक्तिः करे स्थिता।।इत्ये
तदुक्तं मया गुह्यं चोदितेन मया तवाहार्चनमच्युतस्य।।दिने दिने त्वं कुरु विष्णुपूजां वद
स्वस्याचान्यत्कथयामि किं ते।।राजोवाच।।अहो महत्त्वया प्रोक्तं विष्णवाराधने जं राम:
फलं।।महात्मे मुनिश्रेष्ठ लये विष्णुं नार्चयंति वै।।त्वत्प्रसादाच्छ्रुतो होमः नारसिंहा १०२
र्चनक्रमः।।विधिवत्तत्कथयिष्यामि कोटिहोमविधिं वद।।मार्कंडेय उवाच।।यदर्थं वै
पुरा पृष्टः शौनकोऽभ्यागतः पुरा।।यत्तस्मै कथयामास शौनकस्तद्ददामि ते।।शौ
नकं तु सुखासीनं पर्यपृच्छद्बृहस्पतिः।।गुरुरुवाच।।लक्षहोमस्य यन्मे मिस्तद्वि
धिश्चावि विशेषतः।।वदस्व मुनिश्रेष्ठ कोटिहोमस्य चैव हि।।शौनक उवाच।।प्रव
क्ष्यामि यथावत्ते शृणु देवपुरोहित।।लक्षहोमं तथा मे मिनद्विधिं च विशेषतः।।य

ज्ञकर्मणि शस्ता या भूमेर्लक्षणमीदृशं।।ससिकता समा स्निग्धा दर्वल्लवमथोत्तरा।।कुरु
मां चैव निश्चानुशोधयेत्तां विशेषतः।।वराहरूलया तत्र मृदा छादप्रलेपयेत्।।प्रमा
णं बाहुमात्रं तु सर्वतः कुंडलक्षणं।।चतुरस्रं च तु हस्तं तु मध्ये सूत्रेण कारयेत्।।ऊर्ध्वं
च मेखलां कुर्याच्चतुरस्रां सुविस्तरां।। ।।चतुरंगुलमात्रं तु उच्छ्रितां सर्वसंचितां।।
ब्राह्मणान्वेदसंपन्नान्ब्रह्मकर्मसमन्वितान्।।आमंत्रयेद्यथान्यायं यजमानो
विशेषतः।।वस्त्रचर्मव्रती युक्ता रात्रं ते द्विजोत्तमाः।।अहोरात्रमुपोष्याय गायत्री
मयुतं जपेत्।।ते शुक्लवाससः स्नाता सुगंधाः पुष्पधारिणः।।निराहाराः सुतपस्वः
संतुष्टाः संयतेंद्रिया।।सर्वत्र च समाः मौनः रात्काग्रमनसः पुनः।।आरंभे चरूस्तोय
ज्ञंततो होममतं द्रिताः।।यक्षः पूज्ञा भूमिमालिख्य चाभ्युक्ष्य प्रक्ष्याप्यग्निं निधापये
[illegible]त्।।निववविधिना ततो होमं तु कारयेत्।।आघाराविघ्नाज्यभागौ च जुहुयात्स्व
मेव तु।।यववान्यतिलैर्मिश्रां गायत्र्या प्रथमाहुतिं।।जुहुयादेकचित्तेन स्वाहाकारा

न्वितं बुधः॥ यन्त्वं श्रीदिः। एवं सान्निध्यात्तु गायत्री छंदसां माता ब्रह्मयोनिः प्रतिष्ठिता॥ सवि
तादेवता तस्या विश्वामित्रस्तथा ऋषिः। ततो व्याहृतिभिः पश्चाज्जुहुयात्तिलादिकं॥ यजुष्प्र
१०३ दर्शिते संख्या लक्षं वा कोटिरेव वा॥ तावद्दिनेकर्यादच्युतार्चनपूर्वकं॥ दीनानाथजने
भ्यश्च यजमानः प्रयत्नतः। तावद्ब्रह्मभोजनं दद्याद्यावद्धोमः समाप्यते॥ समाप्ते दक्षिणां दद्या
दृत्विग्भ्यः श्रद्धयान्वितः। यथावित्तमलोभेन ततः शांत्युदकेन च॥ प्रोक्षयेद्ग्राममध्ये तु
अधिवासस्य विशेषतः। एवं कृते तु ग्रामस्य पुरस्य नगरस्य वा॥ राष्ट्रस्य च महाभाग राज्ञो
जनपदस्य च॥ सर्वबाधाप्रशमनी शांतिर्भवति सर्वदा॥ मार्कंडेय उवाच॥ इत्येतत्तेन १०३
केनोक्तं कथितं नृपनंदन॥ लक्षहोमविधिं राजन्राष्ट्रस्यैकांतसिद्धिदं॥ ग्रामे गृहे या पु
रराष्ट्रे देशे द्विजैरयं मया कृतः पुरा विधिः॥ तत्रापि शांतिर्भविता नराणां गवामन्ये स्वैः
सहस्रपतेश्च॥ ॥इति श्रीनृसिंहपुराणे युग्मे तु होमलक्षहोमकोटिहोमविधानं॥
॥ ॥अथ भविष्योत्तरपुराणोक्तमुच्यते॥ ॥श्रीकृष्ण उवाच॥ राजन्संवरणः पूर्वंप्र

तिष्ठाने पुरोत्तमे॥ बभूव स महीपालः शास्त्रास्त्रकुशलो बली॥ ब्रह्मण्यः पितृभक्तश्च दे
वब्राह्मणपूजकः॥ तस्याथ कुर्वतो राज्यं सम्यक्पालयतः प्रजाः॥ भोजगाममहायोगी स
नेको ब्रह्मणः सुतः। दृष्ट्वा तस्य सनं राजा प्रणम्य शिरसा तथा॥ अर्घ्यं चिलाद्यं धापाद्ये
रासनं विनिवेद्य च॥ इतिहासपुराणोक्ता बहुप्रकारविविधाः कथाः॥ राजर्षीणां पुराणा
नां चरितानि तथापरं वत्तु॥ तथा कथांतरे राजा कुर्वन्सदसि संस्थितः॥ हिताय पृथिवीशा
नां जगतश्चात्मनस्तथा॥ तथा कथांतरे राजा कुर्वन्सदसि संस्थितः॥ हिताय पृथिवीशा
नां जगतश्चात्मनस्तथा॥ पप्रच्छ विनयोपेतो योगाचार्यं महामतिः॥ संवरण उवाच॥
भगवन्महदुत्पातं सर्वमेवेन सप्रकंपने॥ निपतंति पांसुवर्षे च गृहभंगे तथैव च जन्मन
स्त्रपीडासु सैन्ये न वृष्टिभयेषु च॥ ज्वरेषु मारीपीडासु दुर्भिक्षे राष्ट्रविप्लवे॥ व्याधीनां संभ
वे ज्ञाने शरीरे रक्ष्य वा शरीरबाति पीडिते॥ के शोमहातिबोध्य लौकिके सर्वमेव तत्तमे॥
सनक उवाच॥ भृणु राजन्प्रवक्ष्यामि शांतिकर्म तथोत्तमं॥ कोटिहोमं लक्षकोटिहोमं तु ल
मारख्यामा।१

सर्वकामफलप्रदं॥ ब्रह्महत्यादिपापानि येन नश्यंति तत्क्षणात्॥ उत्पाताः प्रशमं यांति म
हत्संपद्यते सुखं॥ विधानं तस्य वक्ष्यामि शृणुष्वैकमना मुने॥ शुभे नक्षत्रयोगे च वारे
सर्वगुणान्विते॥ यजमानस्यानुकूले कोटिहोमं समारभेत्॥ पूजयित्वा प्रयत्नेन ब्राह्म
१०४ णं वेदपारगं॥ वस्त्रैर्विभूषणैश्चैव गंधमाल्यानुलेपनैः॥ प्रणम्य विधिवत्तस्मै आत्मा
नं विनिवेदयेत्॥ त्वं नो गतिः पिता माता त्वं भ्राता त्वं परायणं॥ त्वत्प्रसादेन विप्रर्षे सर्वं मे स्या
न्मनोगतं॥ आचार्यो हि मोक्षाय च मे कुरु यज्ञमनुत्तमं॥ कोटिहोमाख्यमतुलं शांत्यर्थं सार्वका राम:
मिकं॥ पुरोहितस्ततः प्राज्ञः शुक्लांबरधरः शुचिः॥ ब्राह्मणैः सहितः पुण्यैः संयतैः सुस १०४
माहितैः॥ भूमिभागे समे शुद्धे प्रागुदक्प्रवणे तथा॥ पुण्याहं वाचयेत्पूर्वं नत्वा विप्रान्सुपू
जितान्॥ ततस्तु सहितैर्विप्रैः सूत्रयेन्मंडपं शुभं॥ उत्तमं दशहस्तं तु तदर्द्धेन तु मध्यमं॥
अधमं तु तदर्द्धेन शक्तिकालाद्यपेक्षया॥ मध्ये तु मंडपस्यापि कुंडं कुर्याद्विचक्षणः॥
चतुर्हस्तप्रमाणेन आयामेन तथैव च॥ मेखलात्रितयं तस्य द्वादशांगुलविस्तृतं॥ तत्र

माणं तथा योनिं कुर्वीत सुसमाहितः॥ कुंडस्य पूर्वभागे तु वेदिं कुर्याद्विचक्षणः॥ चतुर्ह
स्तां समां चैव हस्तमात्रोच्छ्रितां नृप॥ स्थानं तत्सर्वदेवानां कुर्याद्यत्नेन बुद्धिमान्॥
उपलिप्य ततो भूमिं मंडपस्य समंततः॥ विन्यसेत्कलशांस्तत्र जलपूर्णांश्चतुर्दश॥
अभ्यर्च्य पुष्पचूताद्यैः पत्रैर्विरूपशोभितान्॥ वितानमुपरिष्टाच्च मंडपस्य प्रकल्पये
त्॥ स्थापयेद्दिक्षु सर्वासु तोरणानि विचक्षणः॥ एवं संभृतसंभारः पुरोधाः सुसमा
हितः॥ पुण्याहजयघोषेण होमकर्म समारभेत्॥ स्थापयित्वा सुरान्वेद्यां वक्ष्यमाणा
नरिंदम॥ ब्रह्माणं पूर्वभागे तु मध्ये देवं जनार्दनं॥ पश्चिमे तु तथा रुद्रान्दक्षे त्वस्कं तुत्तर
नस्तथा॥ ईशान्यां च ग्रहान्सर्वानाग्नेय्यां मरुतस्तथा॥ वायुं सौम्य तथैशान्यां लो
कपालान्क्रमेण तु॥ एवं संस्थाप्य विबुधान्यथास्थानं नृपोत्तम॥ पूजयेद्विधिवद्व
स्त्रगंधमाल्यानुलेपनैः॥ वेदोक्तमंत्रैस्तल्लिंगैः पुष्कलोकैः पृथक्पृथक्॥ आदित्या
वसवो रुद्रा मरुतो लोकपालास्तथा॥ ब्रह्मा जनार्दनश्चैव शूलपाणिर्भगाद्ग्रहा॥ २

हा॥ अत्र सन्निहिताः सर्वे भवंतु सुखभागिनः॥ पुजां गृह्णंतु सर्वेत्र मया मंत्रोपपादितां॥
कुर्वंतु च शुभं सर्वे यज्ञकर्त्तारस्मादिताः॥ एवं संप्रार्थयित्वा सु देवान्यत्नेन शुद्धधीः॥
नैवेद्यैर्विविधैर्भक्ष्यैः फलैर्दीपैस्तथैव च॥ ततस्तु ते द्विजोः सार्द्धं कुर्युस्ये विधिपूर्वकं॥
१०५ कुर्यात्संस्कारकरणं यथोक्तं वेदचिंतकैः॥ ततः प्रज्वालये द्वह्निं नाम्नाख्यातं घृता
र्चिषं॥ नियोजयेद्द्विजांस्तत्र शतसंख्यानदोषतः॥ अथवा मेच बहूंश्चयथायाम
नियोजयेत्॥ विद्यावद्धान्ययोर्वृद्धान्दहस्यां न्संयतेन्द्रियान्॥ स्वकर्मनिरतांश्चद्धार राम:
न्ज्ञानशीलान्प्रयत्नतः॥ चिंतयेत्तत्र देवेशं पंचास्यं रूपपावकं॥ मुखानि तस्य च १०५
त्वारि सप्तजिह्वानि पार्थिव॥ एकजिह्वमथैकं तु तस्माच्छ्रेष्ठं सर्वकामदं॥ प्रमायमाने
नेत्र्या होतव्यं ज्वलिते नले॥ ऋग्भिः पूर्वमुखे होमो यजुर्भिः सोत्तरामुखे॥
सामभिः पश्चिमे कार्योऽथर्वभिर्दक्षिणामुखे॥ ऋग्भिः ऋग्वेदिभिरिति व्याख्ये
यं॥ एवमन्यत्रापि। आघारावाज्यभागौ च पूर्वं हुत्वा विचक्षणः॥ परीते च परिस्ती

र्णे कल्पिते च तथासने। ब्रह्मणः पूर्वमध्येत सर्वं पश्चात्समारभेत्॥ होमो व्याहृतिभि
श्चैव पूर्वस्तत्र विधीयते॥ प्रणवादिभिश्च तद्विंगैः स्वाहाकारांते योजिते॥ जुहुया
त्सर्वस्व देवानां वेद्यां ये चोपकल्पिताः॥ एवं प्रकल्प्य विद्वान्कोटिहोमारभ्य मु
त्तमं॥ तिलाः कृष्णा घृताभ्यक्ताः किंचिद्यवसमन्विताः॥ होतव्याः कोटिहोमे तु सा
मिधश्च पलाशजाः॥ दूर्वाङ्कुरांस्त्रिसहस्रं तु दद्यात्पूर्णाहुतिं शुभां॥ पंचमे तन्मुखैरा
जन्सर्वकामार्थसिद्धये॥ पूर्णाहुत्यः समाख्याता॥ कोटिहोमे नराधिप॥ सकृत्स्ना
त्वा नृपश्रेष्ठ दशस्यास्य विशारदैः॥ ॥ प्रारम्भदिनमारभ्य ब्रह्मणो ब्रह्मचारिभिः॥
भाव्यं सयजमानैस्तु अथवा सपुरोहितैः॥ क्रोधनी लोभादयो दोषा वर्जनीयाः
प्रयत्नतः॥ यजमानेन राजेंद्र सर्वान्कामानभीप्सता॥ इति भविष्योत्तरे कोटिहोमविधा
नं॥ अत्र क्रमेण यजेत्॥ यजमानेनाचार्यादिभ्यः॥ श्रेयः संपादनं कार्यमित्युक्तं प्रयोग
पारिजाते संस्कारकांडे ग्रहयज्ञप्रकरणे॥ आचार्यप्रभृतिभ्यश्च यथार्हार्चनपूर्वकं ततः॥

समिदाज्यचरूणां च तिलहोमफलं ततः। ब्रह्मत्वे कुंभपूजायां चार्चनस्य फलं च यत्॥
लोकपालग्रहेशानां स्तवयाश्चंगदेवताः। तासां जपफलं तत्र हुतस्तीयाज्ञलपूर्व
१०६ कं॥ तत्र स्तोम्यो यथाशक्ति दातव्या दक्षिणा ततः। आचार्याद्यं जापकेभ्यो ब्रह्मणे
चाप्यनुक्रमे॥ आज्यं निरीक्ष्य दत्वा च ब्राह्मणान्भोजयेत्ततः इति वामनके इति॥ एवं
समासतो कोटिहोमानन्यतो पूरणमिति न्यायेन परस्परसमुच्चयेन नवग्रहमखप्र
योगो द्रष्टव्यः। तोरणाद्युत्तोद्धारध्वजास्तंभप्रतिष्ठादिमूलवाक्यानि गारुडादि रामः
ष्वेके द्रष्टव्यानि। ग्रंथविस्तारभियात्र नोच्यंते॥ ॥अथ शतमुखादि कोटिहोम १०६
विधानं॥ भविष्योत्तरे॥ संवरण उवाच॥ बहुत्वात्कर्मणां ब्रह्मन् कोटिहोमः सुदु
ष्करः। कालेन महता चैव शक्यः प्राप्तुं कथं च न॥ नियमाद्ब्रह्मचर्याद्वा दुःकरश्चे
ति मे मतिः॥ निरोधो ब्राह्मणानां च मंत्रणाद्यादिषु दुष्करः॥ कार्ये गुरुतरे चीयस्त्वा
त्सर्वकालाद्यतोपेक्षया॥ एतद्विज्ञाय मे ब्रह्मन्यादि शास्त्रेषु पठ्यते॥ कोटिहोम

स्य संक्षेपवद्भमे ब्रह्मसंभव॥ शनक उवाच॥ शतानने दशमुखो द्विमुखे एकमुखस्त
था॥ चतुर्विधो महाराज कोटिहोमो विधीयते॥ ॥कार्यस्य गुरुतां ज्ञात्वा नैकधा मथ
पर्वणाः पर्वणाः सूर्यचंद्रग्रहणात्ययस्या यथासंक्षेपतः कार्यो कोटिहोमस्तथा श्रृ
णु॥ हस्तावकुंडशतं दिव्यं यथोक्तं हस्तसंमितं॥ एकैकस्मिंस्ततः कुंडे दश विप्रान्नि
योजयेत्॥ सद्यः पक्षे तु विप्राणां सहस्रं परिकीर्तितं॥ एकैकस्मिन्कुंडे प्रतिलक्षदश
ब्राह्मणा इति कोटिहोमस्य हस्तमर्वां नीतिप्रचयशिष्टसंख्यानुवादियं॥ एकस्था
न. पितेष्मो सर्वशोः ततः परिभाविते॥ होमं कुर्युर्द्विजाः सर्वे कुंडे यथोदितं॥ यथा
कुंड चैव विराजस्य महाक्रतौ॥ न चैवाग्निबहुस्यान्न चये विभिद्यते॥ तथा
कुंडे३ र्थद्यताच्चिचिनियोजिते॥ एतच्चिष्ण्यम्नो॥ एकाग्नावमेव यज्ञः कोटिहो
मो न संशयः॥ एवं या क्रियते क्षिप्रं व्याकुलैः कार्यगौरवात्॥ शतानन सविज्ञे
यः कोटिहोमो मखोत्तमः॥ अत्र सर्वापीति कर्तव्यता पूर्ववत्॥ कुंडानां स्तं संभि

तमितिहस्तमात्रतानुष्टुतार्चिषिनियेडितदयुक्त्वातूष्टतादिशीघ्रदाहिहोमद्रव्यविष
या॥तिलादौतुशतांशस्यलक्षत्वेनलक्षहोमोकंकुंडंकार्यं॥अयुतेत्वथहोतव्येकुंडंहस्ता
१०७ हस्तमात्रकं॥द्विगुणंलक्षहोमेतुकोटिहोमेचतुर्गुणमितिप्राक्॥अस्यास्तिरिमात्रमिति
कात्यायनपरिभाषोक्तेश्चस्यतेत्रस्यदशस्यचलक्षहोमस्याविशेषाच्च॥अत्रसहस्रश्रा
न्ताःसंख्याऋत्विङ्मात्रविषया॥ऋत्विगाचार्यसहितेइतिपूर्वोक्तस्याचार्यस्यविशेषा
विधानेबाधकाभावात्॥ ॥तेनाचार्येणैकस्मिन्कुंडेऽग्नौप्रणीतेसतितमग्निमन्ये
षुकुंडेषुविहृत्यप्रतिकुंडंदशदशऋत्विजोजुहुयुरितिशातमुख॥अथदशमुखस्तत्रैव॥ राम:
अयुतहोमैःकार्याःस्यादपराकालादिकेपिवा॥तदादशमुखःकार्यःकोटिहोमोमहामते॥ १०७
विप्रास्तांद्विशतीतत्रसुविभज्यनियोजिता॥तेचविज्ञातशीलाःस्युर्वृत्तवंतोजितेंद्रियाः॥
अथचपक्षेचैकस्मिन्कुंडेदशलक्षहोमाःसंपद्यंति॥तत्रालक्षसार्द्धत्रिकरंकुंडंलक्षहो
मेचतुष्करं॥कुंडंचचकरंप्रोक्तंदशलक्षात्कुलेक्रमादितितंत्रांतरोक्तंकुंडंग्राह्यं॥प्रति

कुंडंशत्विजांविंशतिःस्थाप्या॥अन्यत्सर्वंपूर्ववत्॥इतिभविष्योत्तरेदशमुखः॥अथ
द्विमुखःकथ्यते॥तत्रैव॥अथकुंडद्वयंकृत्वाविभज्यचविभावसुं॥होमंकुर्युर्द्विजाम
याःस्वस्वविधिपूर्वकं॥शांतंतत्रनियोज्यस्याद्विप्राणांप्रविभज्यवै॥यदामासेद्वितीया
सेवाकार्यकालउपस्थिते॥तदातुद्विमुखःकार्यःकोटिहोमोविस्तरैः॥अत्रप्रतिकुंडंपं
चाशदृत्विजः॥न्यूयःस्वरूपंस्यात्यक्त्वाहुतीयकुंडेपिमंत्रैरग्निंस्थापयेदितिगम्यते॥कुं
डंतुपंचहस्तं॥तंत्रांतरोक्तः॥इतिद्विमुखः॥अथैकमुखः॥तत्रैव॥यदातुस्वेच्छयायजेयं
जमानःसमापयेत्॥कालेनमहताराजंस्तदाचैवैकमुखोभवेत्॥एककुंडस्थितोवह्नि
रेकचित्तैःसमाहितैः॥यथालाभस्थितैर्विप्रैर्ज्ञानशीलैर्विचक्षणैः॥नसंख्यानियमो
ऽत्रास्तिब्राह्मणानांनरोत्तम॥नकालनियमश्चैवस्वेच्छयाह्युच्यते॥आरब्धाकर्तु
कामस्यचातुर्मास्यादिकर्मवत्॥सदाप्रसक्तःकर्तव्योयज्ञोयंसार्वकालिकः॥अयमे
वैकमुखोराजन्कालेनबहुनाभवेत्॥बहुविघ्नस्तुकालेनतस्मात्संक्षेपमाचरेत्॥

यतो हि चित्तमायुश्च वित्तं चैवास्थिरं सदा ॥ ॥ अतः संक्षेपतः सर्वकामकार्यं प्रश-
स्यते ॥ ततः समाप्ते यज्ञे तु कारयेत्तु महोत्सवं ॥ शंखतूर्यनिनादेन ब्रह्मघोषरवेण च ॥ ए-
तैः सर्वैर्ज्ञानमुखादिष्वपि साधारणं बोध्यं ॥ ततस्तु दक्षयेद्विप्रान् ऋत्विजः श्रद्धयान्वितः
१०८ । दक्षयेद्दक्षिणाभिस्तोषयेत् ॥ निष्कमेकं क्रतौ श्रेष्ठे वस्त्रै रत्नैर्विविधैर्नृप ॥ गोशतं चैव दा-
तव्यं मध्यमानां च शतं तथा ॥ सहस्रं च सुवर्णस्य सर्वेषामपि पूजयेत् ॥ ततस्त्वावभृथे
स्नायात्तैश्च द्विजैः पूर्वकल्पितैः ॥ लक्षहोमः क्रमेणैव सदा विजयकारिणः ॥ एवं समाप- रामः
येद्यस्तु कोटिहोममखं शुभं ॥ तस्यारोग्यं प्रियं पुत्रा राष्ट्रवृद्धिस्तथैव च ॥ सर्वपाप- १०८
क्षयश्चैव जायते नृपसत्तम ॥ अनावृष्टिभयं चैव उत्पातभयमेव हि ॥ दुर्भिक्षं ग्रहपी-
डा च प्रशमं यांति भूतल ॥ एतत्सुत्वं पापहरं सर्वकामफलप्रदं ॥ सनकाद्यैर्मुनि-
ना पार्थिवाय निवेदितं ॥ सर्वोपसर्गशमनं भवेन्नैव न ये कारयंति मनुजा नृपको-
टिहोमं ॥ भोगान्नवाप्य मनसोभिमतान् प्रकामं ते यांति शक्रसदनं मुविष्णुदूसलाः ॥

अत्र केचिच्चतुरोपि कोटिहोमप्रकारान्राजाधिकारानिच्छंति ॥ गोशतसहस्रसुव-
र्णदानग्रामादिदानस्यान्येन कर्तुमशक्यत्वात् ॥ इति ॥ शिष्टास्तु फलवाक्ये मनुजा इ-
तिश्रवणात् प्रज्ञातिरिक्तस्य राजममयेन ब्राह्मणादेरपि चात्राधिकारः राजदत्तग्रामा-
दिदानस्यापि संभवादित्याहुः ॥ न च ग्रामैर्गजै राष्ट्रैरश्वैः पूजयेच्च पुरोहितमिति वचना-
द्राजमात्रस्याधिकार इति वाच्यं ॥ पुरोहितशब्दस्य तुलादानवाक्येषु गुरुशब्दस्येवाचा-
र्यपरत्वात् लक्षं चनानुपपत्तिरिति ॥ इति भविष्योत्तरशतमुखदशमुखद्विमुखैकमु-
खकोटिहोमविधानं ॥ ॥ अथ ग्रहमंडलकल्पनं ॥ विष्णुधर्मोत्तरे ॥ वज्र उवाच ॥ एकै-
कस्य त्वमुक्तं विधानं ग्रहपूजने ॥ सर्वग्रहाणां यजने विधानं मम कीर्त्तय ॥ मार्कंडेय उ-
वाच ॥ सर्वग्रहाणां यजने मंडलस्य विधिं शृणु ॥ आदावेव नरव्याघ्र यागं वक्ष्याम्यतः
परं ॥ प्रागायते कर्त्तव्यमादौ रेखाद्वयं नृप ॥ तस्योपरि तथा कार्यमपरं तूत्तरायतं ॥
एवं कृते यत् कुसलं मध्ये तु चतुरस्रकं ॥ तस्मिन् कोष्ठान् प्रकुर्वीत तथा रेखाश्चतुष्टयं ॥ ए-

वंकृतस्यं भवति महाराणां द्वादशाक्षयं। अथो दशतथा तस्य ध्रुवस्थानं तु मध्यमं॥ प्राच्यां
दिशि महानाथमेषंतु परिकल्पयेत्॥ राशिस्थानस्य वर्णानि राशिवर्त्तीनि रंजयेत्॥ राशि
वर्णान्यथो वक्ष्ये यथावदनुपूर्वशः॥ अरुणाश्च सितश्चैव हरितः पाटलस्तथा॥ आ
१०७ पांडुश्च विचित्रश्च श्वेतलोहश्च कपिलस्तथा॥ पिंगलः कर्बुरो बभ्रुर्मलिनश्च यथाक्र
मं॥ मेषादीनां विनिर्दिष्टा वर्णाः पार्थिवसत्तम॥ आकाशवर्त्तकं कर्त्तव्यं ध्रुवस्थानं
तथैव च॥ ध्रुवस्थाने महिनाथं देवतास्वहृन्न्यसेत्॥ मंडलिः शुक्लकेव रोक्ष्य दिग्वि रामः
भागं विबोधमे। ध्रुवस्य मंडलमध्ये कुबेरस्यैव चोत्तरे॥ मंडलं गगनस्याग्रभागे प्रागु १०७
त्तरे भवेत्॥ प्राग्भागे च तथा राजन्मंडलं ब्रह्मणः स्मृतं। प्राग्दक्षिणे तथा भागे दिशा
मर्थां प्रकल्पयेत्॥ दक्षिणे च तथा भागे याम्यं वै परिकल्पयेत्॥ भार्गवं नैर्ऋते का
र्यं भुवो भूपाल मंडलं॥ शेषस्य तु तथा कार्यं प्रतीच्यां दिशि मंडलं॥ दिग्गधस्तात्तु स्मिन्का
यातस्या मंडलं पश्चिमोत्तरे॥ ग्रहा श्वारवशात्राजन्यस्मिन्नाशेऽप्यवस्थितः॥ मंड

लं तस्य कर्त्तव्यं तस्मिन्नेव यथाविधि। न्यासः कार्यो गृहेंद्राणां देवताभिः सहानघ॥ आ
दित्यस्य तु मेराशौ केकैतोः कार्यं तु मंडलं॥ राशौ स्ववर्त्तीनि दृशां यस्य मंडलं नृप॥ उमा
द्यः परिधिस्तस्य रंगेनान्येन पार्थिव॥ गंधचूर्णयुतारंगाः कर्त्तव्या मतिमित्तता॥ रा
शिचक्रं समग्रं तु रखया परिवारयेत्॥ नक्षत्राणां ततः कार्यं न्यासं पार्थिवसत्तम॥ रा
शौ राशौ यथास्थानं रेखया परिकारितं॥ राशौ राशावतो वक्ष्ये नक्षत्राणां समाश्र
यं॥ अश्विनी भरणी चैव कृत्तिकांशतुरीयकं॥ मेषराशौ विनिर्दिष्टं नित्यं पार्थिव
सत्तम॥ पादत्रयं कृत्तिकानां रोहिणी सकला तथा॥ मृगशीर्षस्य तथैवार्द्धं वृषस्य
माश्रयं॥ मृगशीर्द्धं तथैवार्द्राकादित्या अवराजयं॥ नियमवस्समुद्दिष्टं मिथुनस्य
समाश्रयं॥ अन्यमत्सार्द्धं तथैवाश्लेषा पादं पुनर्वसोः पुष्यं सार्पं कर्कटकाश्रयं॥ पित्र्यं
भाग्यमथार्यम्णः पादः सिंहाश्रयं भवेत्॥ पदत्रयमथार्यम्णो हस्तं त्वाष्ट्रदलं त
था॥ कन्याराशौ विनिर्दिष्टं नित्यं पार्थिवसत्तमं॥ चित्रार्द्धमथ स्वाती च विशाखा च

रणत्रयं॥ तुलराशौ विनिर्दिष्टं मुनिभिस्तत्वदर्शिभिः॥ विशाखाचरणं मैत्रं शाक्रं च वृश्चि
कं स्मृतं॥ मूलमाप्यं तथा पादो वैश्वदेवस्य चादिमे॥ पादत्रयं वैश्वदेवाद्धनुस्तं वै
११० श्रवणं च स्याद्धनिष्ठार्द्धं च मकरे नियमेन प्रकीर्त्तितं॥ मैं धनिष्ठार्द्धं शतभिषमजैकस्य
चरणत्रयं॥ कुंभराशौ विनिर्दिष्टं स्वतंत्रं पार्थिवोत्तम॥ पादमाजपदं सर्वं माहिर्बु
ध्न्यं नराधिप॥ पौष्णं च कथितं मीने मुनिभिस्तत्वदर्शिभिः॥ ॥— — केवलेन नरोत्त
न्नक्षत्रस्य पृथक्पृथक्॥ राशिचक्रस्य बाह्येन राकेकंतारकं न्यसेत्॥ प्रागुक्तव रामः
र्णैर्भूपाल न्यासं कार्यं यथाविधि॥ ताराचक्रस्य विन्यासं तु रेखया परिवारयेत्॥ ११०
नक्षत्रदेवतान्यासं बहिः कार्यं समंततः॥ यथानक्षत्रसामीप्यं मत्स्यवर्णैः पृथ
क्पृथक्॥ तस्यापि रेखा कर्त्तव्या वृत्ताव्याप्य तु मंडलं॥ रेखाबाह्येन विन्यास्या दि
गीशानां तु कारयेत्॥ दिशां च पार्थिवश्रेष्ठ यथावदनुपूर्वशः॥ स्वाश्रयस्य समं
वर्णाद्दिगीशानां तु कारयेत्॥ उत्तरस्यां तु कर्त्तव्यं धनदस्य तु मंडलं॥ रुक्मवर्णं

प्रयत्नेन दिशां वर्णाभितः शृणु॥ उत्तरा च भवेच्छुक्ला रक्ता प्राची प्रकीर्त्तिता॥ दक्षिणा पीत
वर्णा स्यात्कृष्णा ज्ञेया च पश्चिमा॥ पद्मवर्णा नैर्ऋतेशानी ताम्रा स्यात्सर्वदक्षिणा॥ पाला
नि शी च विदिष्टा तथा दक्षिणपश्चिमा॥ नीलोत्पलसवर्णा तु वायव्या तु प्रकीर्त्तिता॥ दिङ्मं
डलं तु तद्बाह्यं रेखया परिवेष्टयेत्॥ वृत्तया वेष्टयेद्वृत्तं रेखया चतुरस्रया॥ तत्कोण
शंखपद्मादिभिर्मंडलैरुपशोभयेत्॥ लेखाविधानं दिक्षु तास्य वज्रैर्वतु कल्पयेत्॥ मंडला
स्य तु कोणेषु उदकुंभांश्च वा न्यसेत्॥ फलपद्मं च संख्यानां च पुष्पादि चार्चितान्॥ चतु
रो विन्यसेद्दिक्षु द्वारिसमेव विचक्षणः॥ लेखासु विन्यसेद्ध्वजान्पताकांश्च जांस्तथा॥
छत्राणि च सुवर्णानि पद्मानि पृथक्पृथक्॥ स्थानं तु विज्ञाय यथावदत्र कार्यं त
था मंडलप्रमाणं॥ यथा महत्वं नृपमंडलस्य तथा तथा वृद्धिमुपैति कर्त्तुः॥ इति हेमाद्रौ
शांतिकांडे विष्णुधर्मोत्तरोक्तमंडलकल्पनविधानं समाप्तं॥ इति श्रीमदनंतभट्टविर
चिते विधानपारिजाते ग्रहयज्ञविधानं॥ ॥ अथ कुंडलक्षणं॥ शारदातिलके॥ निर्मा

यमंडपं चेच्छेत्ततः कुंडं प्रकल्पयेत्॥ चतुरस्त्रं त्रिधा प्रोक्तं हस्तमानेन देशिकः॥ नवाना
मपि कुंडानां मात्रोक्तः संमतः किल हस्तमानप्रयोगं च दृश्यमानाद्यंगुलभेदतः॥ वातायन
१११ न पथं प्राप्य ते भाति रविरश्मयः॥ तेषु सूक्ष्मा विसर्पन्ति रेणवस्त्रसरेणवः॥ त्रसरेणुः
सविज्ञेयोऽष्टाष्टौ ये परमाणवः॥ त्रसरेणवो वालाग्रं रथरेणुस्तु सस्मृतः॥ तेऽष्टौ वा
लाग्रकं ज्ञेयौ लिक्षा प्रकाशितदष्टकं॥ तदष्टकं यवस्तैस्तैष्टावंगुलं समुदाहृतं॥ सा
ऽष्टत्तमांगुलिः सत्तयवाः सैव तु मध्यमा॥ षड्यवा साऽधमा प्रोक्ता मानांगुलमितीरितं॥ राम
साऽष्टयवाधिकेयर्धा॥ विन्यस्तैस्तिर्यगिष्टानि यवैर्मानांगुलिः स्मृता॥ कर्तुर्दक्षि १११
णहस्तस्य मध्यमांगुलिमध्यतः॥ पर्वणोरंतरं दैर्घ्यं मात्रांगुलमुदाहृतं॥ विनांगु
ष्ठेन शेषाभिः पुष्टिमंगुलिभिः कृतं॥ चतुर्धा विभजेदेको भागो मुष्ट्यंगुलिः स्मृता॥ य
ष्टिं चित्पुरुषायामं विभज्य दशधा पुनः॥ एकं द्वादशधा भागं कृत्वा तत्रैकमंगुलं॥
हरेद्देहांगुलं नाम ज्ञानीयात्तस्य तत्पुनः॥ उच्छ्रायः प्रतिमायास्यान्महामानांगुलि

श्रया॥ महामानांगुलं तन्मात्रांगुलमितीरितं॥ मानांतरांगुलेनैव प्रतिमां तानि कारयेत्॥
प्रासादा दीक्षिततैनैव कुर्यान्मानांतरेण च॥ वेदिकापीठशिबिकारथादीनां विधिः पुनः॥
मानांतरांगुलेनैव भवेत्तान्येन केन बिंबशायागोपकरणान्येवं कुर्यान्मानांगुलेन वै॥
होमांगानि सुनादीनि कुंडमुष्ट्यंगुलाश्रयं॥ ॥देहलब्धांगुलेनाथ कुंडादीनि प्रकल्प
येत्॥ ब्रह्मविष्णुशिवादीनां ये हस्ताः परिकीर्तिताः॥ षट्सप्ताष्टयवैर्मानांगुलैः स्यु
स्तान्प्रयोजयेत्॥ पलमानांगुष्ठपर्वप्रमाणो नाधिकेन च॥ प्रासादावासवेश्यानि विध्य
ड्डहस्तप्रमाणतः॥ नगरग्रामदेवाराण्डकोष्ठानां शिवहस्ततः॥ नवानामपि कुंडा
नां विधानस्थानपूर्वकं॥ निर्माणं विविधं वह्निस्पर्धसाधकानीहितेच्छया॥ त्रयोदशांगुलं
मेकं वेदिकायाश्चतुर्दिशां कुंडानि चागमोक्तानि विदध्याद्विधिवद्गुरुः॥ पूर्वाद्यष्टसु
काष्ठासु रम्याकाराण्यनुक्रमात्॥ चतुःकोणं भगाकारं चंद्रार्धं चत्रिकोणकं॥ वृत्त
षडस्रं पद्माभं अष्टास्रं नामतो विदुः॥ पुरंदरेशयोर्मध्ये वृत्तं वा चतुरस्रकं॥ तदा च॥

यत्नान्निर्दिष्टं नवमं कुंडमुत्तमं॥ कुंडानि चतुरस्राणि वृत्तनानाकृतीनि च॥ नव पंचाथ
चैकं वा कर्त्तव्यं लक्षणान्वितं॥ पद्मोपदिश्यते कुंडचतुष्कं तत्र कर्मणि॥ वेदास्रमर्ध
चंद्रं च वृत्तं पद्मनिभं तथा॥ कुर्यात्कुंडानि चत्वारि प्रागादिषु विचक्षणः॥ पंचमं कार
११२ येत्कुंडमीशादिगे गचत्वारिंशारद्विका॥ एकं वारिवकार्यं प्रतीच्यां कारयेद्बुधः॥ चतुर
स्रमथवा कुंडं वृत्तं कुंडमथापि वा॥ हस्तमात्राणि सर्वाणि दिक्षु सुस्थापनादिषु॥ नित्यहो
मे च सहस्रे कुर्यात्कुंडानि सर्वदा॥ द्विहस्तादिकं कुंडानां प्रकारस्तत्र च्यते बुधैः॥ द्विहस्ते राम:
कुंडे॥ कोटित्रयस्त्रिंशांशितांगुली॥ यवाः सप्तमिताः एकाश्च तस्मात्लिक्षिकास्तथा॥ ११२
कोटिबाहुश्चैकचत्वारिंशदंगुलिसंमितौ॥ यवाः एकोनपालिक्षाः॥ षट् स्यरव्यास्त्रि
हस्तके॥ नागवेदांगुलोकारं चतुरस्रं चतुःकरे॥ त्र्यंगुलानि त्रिपंचाशद्यवाः पंचा
या लिक्षिकाः॥ चतस्रो व्याप्य विज्ञेयाः पंचहस्तोक्तिते बुधैः॥ षड्हस्ते चाष्ट पंचाश
दंगुलानि यवे तथा॥ एकोलिक्षाश्च तस्य[illegible]स्तु ज्ञेया गणितकोत्तमैः॥ त्रिषष्ट्यंगुल

संयुक्ता यवाः सप्त सिद्धिहस्तके॥ अष्टहस्ते सप्तषष्ट्यंगुलान्यनुनयो यवाः॥ अन्यच्च
काश्च तस्मात्लिक्षा कोटिभुजौ मतौ॥ द्वासप्तत्यंगुलीसंख्ये भुजकोटिनवाङ्मितेऽद
शकोटिमिते कुंडे पंचसप्तांगुलानि च॥ यवाः सप्ताथ एकेका लिक्षा तु करणी मता॥
छेत्स्ये संचतुरस्रं तु पोन्याद्युक्तमागतं॥ दशहस्ता तु कुंडानां नियमो नोक्तमया
स्फुटे॥ स्ववर्तिं चानुसारेण कर्त्तव्यं तच्च विमः॥ एवं कुंडश्च वः॥ कटिरुत्तरस्येलिका
त्यना विज्ञेया सर्वदा तद्वै द्विहस्तादिविधिस्मयं॥ कुंडानां यच्चतुर्विंशो भागः सो
गुलसंज्ञकः॥ विभज्यानेन कर्तव्या मेखलाकंठनाभयः॥ ध्वजाय प्राप्तये लिपगर्ध्व
मेकांगुलीयकं॥ निरवनेत्सर्वकुंडानां ध्वजायः कीर्त्तितो बुधैः॥ ध्वजापदीनं यत्कुं
उं प्रोक्तं चतुरतिष्टकं॥ तस्माद्गुरुः प्रयत्नेन ध्वजायं सर्वदा नयेत्॥ विस्तरेण गुणि
तं पैव्यं कुंडक्षेत्रफलं भवेत्॥ तस्य च्यवसुमिर्मक्षे शोधमायो ध्वजादिकः॥ ध्वजा
परहितं कुंडं सुलक्षणमपि त्यजेत्॥ उक्तं ध्वजायमिच्छंति याज्ञिकाः कुंडकर्मणि॥

अन्येषमायमिष्ठतिं दैवज्ञाः कुंडकर्मणि॥ अग्निस्थानं होमकुंडं शालापाकगृहाणि वा
॥ एमेकुर्यान्निधानेन याज्ञिकानां गृहं तथा॥ तस्मात्तु ज्ञायते माय कुंडे दैर्घ्यं विचक्षण
ैः॥ चतुरस्रं चतुःकोणं सचैवं हस्तायतायथापुरा॥ हस्तमानेन तत्कार्यं तावन्निम्नायतं
११३ खनेत्॥ पंचत्रिमेखलाख्यायं ज्ञात्वा शेषमतः खनेत्। पश्चाद् द्व्यमिति ज्ञात्वा यथारु-
चि समाचरेत्॥ सहस्राद्धितये कुंडे पंचविंशांगुलानि च॥ यवोदरकात्र यो लिख्यात्तु
मितः परिकीर्तिता॥ अंगुलमध्ये बाह्ये तु त्रयोदरकास्त्रलिख्यकाः॥ द्विसहस्राद्विर- राम।
द्वौ तु हस्तेसंयोजयेत् सुधीः॥ दशसाहस्रिके होमे चतुस्त्रिंशन्मितांगुलैः॥ अतरेत्व ११३
नुपातेन योज्यं कुंडं महर्षिभिः॥ अतरेत्वनुपातेन योज्यहस्तप्रमाणकं॥ कुंडं च सुत
होमोंकेसंयोज्यं त्वेवमंगुलि। पदुवाणकैर्यकाव्यालिख्यायुतवृद्धितः॥ यावद्दत्रक्षो
मे वेक्षतारस्तावदेवं प्रकल्पयेत्॥ कुंडानां यादृशं रूपं मेखलानां च तादृशं॥ मेखलाः
पंच वा तिस्र एका वाथमवेदिहो॥ उत्तममृषिभिर्निर्दिष्टं कुंडं चेपंचमेखलं॥ त्रिमे

खलं मध्यं हीनं स्यादेकमेखलं॥ षट्बाणाक्षिनेत्रैस्तु मितास्युः पंचमेखलाः॥ कुंडं
द्विमेखलं मध्यं नीचं स्याधिकमेखलं॥ यद्यामेखलं॥ युद्दामनीषिभिः प्रोक्तं कुंडं उंचस्या-
त्रिमेखलं॥ प्रथमा द्व्यंगुलायामा तु उन्नता सानवांगुलैः॥ मध्या तु त्र्यंगुला वा द्वितीया
तु यमांगुलैः॥ अंगुलैः पंचभिर्वेदमितैः स्यान्मेखलाद्वयं॥ एकांबुंगुलेत्वेधाविस्ता
रा मेखला मता॥ चतुर्भिरंगुलैः स्यात्स्यादुन्नतिश्च समंततः॥ तस्याश्चोपरि वप्रः स्या
च्चतुरंगुलमुन्नतः॥ अष्टाभिरंगुलैः सम्यग्विस्तीर्णास्तु समंततः॥ तस्योपरि पुनः का
र्यो वप्रः सोपि तृतीयकः॥ चतुरंगुलविस्तीर्णस्त्र्यंगुलोन्नतश्च समंततः॥ तयोरन्यतरे
णात्र कुंडं कुर्याद्यथारुचिः॥ आद्या सत्त्वगुणा प्रोक्ता राजसी च ततः परा॥ तामसा-
स्यात्तृतीया च देवी विष्णुवादाद्याः क्रमात्॥ खातादूर्ध्वं गलमितः कंठः कुंडे स्वयं
विधिः॥ कुंडे त्रिहस्ते ताः स्तास्युस्तत्कांचिद्गुणास्वमिताः॥ कुंडे द्विहस्ते ताज्ञेया मुर-
निसप्तगुणांगुलाः॥ अष्टहस्ते तु कुंडे नागजनकं युगांगुलाः॥ कुंडे पंचरेनंदस्या-

मरत्नौगुलैस्सप्तताः॥ ताः स्युः कुंडे कृतुकरे दिग्वस्वष्टांगुलान्विताः॥ कुंडे सप्तकरे खांशान
वस्वंगांगुलामताः॥ कुंडे वसुकरे ताः स्युर्भानुषट्स्वष्टकांगुलाः॥ कुंडे नवकरे विश्वरुद्र
नंदांगुलाः स्मृताः॥ दिग्घस्ते मेखलाः स्युर्नागाब्धेः॥ अमिते कुंडे मनुमानुद्वांगुलाः॥ उत्
११४ सेधायमतो ज्ञेया मेखलाः सर्वतोऽधेः॥ एवं तेभिहितास्तात मेखलानां सुनिश्चयः॥ हो
मकुंडस्य तस्याः प्राक् दक्षिणतः पश्चिमेपि वा। मेखला मध्यतो योनिः कुंडोर्द्ध्वांश विस्तृता॥
उन्नतिर्द्व्यंगुले नास्या॥ कुंडोष्ठी वोश्वत्थपत्रवत्॥ एकैकांगुलतो योनिः कुंडेष्वन्येषु वर्द्धयेत्॥ रामः
यवद्वयक्रमेणैव योन्यग्रमपि वर्द्धयेत्॥ कुंभे द्वयस्य मायुक्तं मध्ये त्वोष्ठपत्रिरूपा॥ २ ११४
ऽग्रेण कुंडाभिमुखी किंचिदुत्सृष्टमेखला॥ योन्याः पश्चिमतो नालमायामे चतुरं
गुलं॥ त्रिद्व्येकांगुलिविस्तारः क्रमान्मूलान्नाग्रमिष्यते॥ अथ स्त्रिसंख्यांगुलोपेता मुष्टुया
यामतः समा॥ वेदिं विधाय तस्यां तु न्यस्य नालं विधानवित्॥ शेषं प्रपूरयेद्दंतापारि
धिस्थापनाय वा॥ विधाय रंध्रं मध्यस्थं मेखलोपरि शोभने॥ इंद्राग्नियमदिक्कुंड

योनिः सौम्यमुखी स्मृता॥ योनिः पूर्वमुखान्येषु पूर्वेशांत्यैतरामवेत्॥ नार्पयेत्कुंडे कोणेषु यो
नितां तु विधानवित्॥ कुंडानां मध्यदेशे तु कल्पयेत्पंकजाकृतिं॥ नाभिर्यद्वा कुंडरूपा मानम
स्य निगद्यते॥ मनुष्यरत्निकहस्तानां नाभिरुत्सेधता मता॥ नेत्राद्यांगुलके पतः कुंडेष्वन्ये
षु वर्द्धयेत्॥ यवद्वयक्रमेणैव नाभिं पद्ममुदारधीः॥ योनिकुंडे योनिमब्जकुंडे नाभिवि
वर्जयेत्॥ नाभिक्षेत्रं त्रिधा भित्वा मध्यं कुर्यात्कर्णिकां॥ बहिरंशद्वयेनाष्टौ दलानि परि
कल्पयेत्॥ अथ मुष्ट्यादिकुंडानामुपपत्तियोगं वदामि ते॥ मुष्टिमात्रं शतार्द्धे स्यात्तु शते
वैरत्नमात्रकं॥ सहस्रके हस्तमात्रमयुते तु द्विहस्तकं॥ लक्षार्द्धे त्रिकरं कुंडं लक्षहोमे चतुः
करं॥ मोक्षे पंचकरं कुंडं दशलक्षाहुतिष्वपि। षड्ढस्तं लक्षविंशत्या कोट्यर्द्धेस्मिन्सप्तहस्त
कं॥ कोटिहोमे दशकरं प्रोक्तं कुंडं महर्षिभिः॥ दशात्तु हस्तादधिकं परं कुंडमस्ति मही
तले॥ सर्वसिद्धिकरं कुंडं चतुरस्रमुदाहृतं। पुत्रप्रदं योनिकुंडमर्द्धचंद्रं शुभप्र
दां॥ शत्रुक्षयकरं त्र्यस्रं वर्तुलं शांतिकर्मणि॥ छेदमारणयोः कुंडं षडस्रं च पद्मसंनिभं॥

बुद्धिदं रोगशमनं कुंडमष्टास्रमीरितं॥ रौद्र्यां स्तंभने चतुष्कोणं मध्ये भोगे मनोहृति॥ चंद्रा
र्धं मारणे याम्ये द्वेषो नैर्ऋत्यकोणकं॥ वारुण्यां शांतिके वृत्तं षडस्रमुच्चाटने निले॥ उदी
११५ च्यां पौष्टिके वप्ररौद्रमष्टास्रमीरितं॥ चतुरस्रं तु सर्वेषां केचिदिच्छंति तांत्रिकाः॥ कुंड
स्य रूपं ज्ञानार्णवे परमं प्रकृते वदुः॥ प्राच्यां शिरः समाख्यातं बाहू दक्षिणसौम्ययोः॥ उ
दरं कुंडमित्युक्तं योनिः पादौ तु पश्चिमे॥ कुंडमत्रोक्तमार्गेण निर्मायाद्य सलक्षणं॥ रक्त
मत्स्यालिपिसृष्ट्यां सर्वसिद्धिकुप्रियं यथा॥ ॥ खातेऽधिके भवेद्रोगी हीने धेनुधनक्षयः॥ राम:
वक्रे कुंडे तु संतापो मरणं छिन्नमेखले॥ मेखलारहिते शोकोऽप्यधिके वित्तसंक्षयः॥ ११५
भार्याविनाशनं कुंडं प्रोक्तं योन्यां विवर्जितं॥ अनेकदोषदं कुंडं यत्र — नाधिकं यदि॥
तस्मात्सम्यक्परीक्ष्यैव कर्तव्यं शुभमिच्छता॥ दिग्देशाकुंडानि मुक्तो योनल्लोलौकि
कोक्तिः॥ तस्माद्दिग्देशकुंडानि संग्राह्याणायुक्तलक्षणैः॥ कुंडमेवं विधं न स्यात्स्थंडि
लं वा समाचरेत्॥ हस्तमात्रेण तत्कुर्याद्वालुभिश्च सुशोभनं॥ अंगुलोत्सेधसंयुक्त

चतुरस्रं समंततः॥ इति कुंडनिर्माणविधिः॥ ॥ अथ स्थंडिलसंहितायां॥ इष्टुमाचं स्थं
डिलं वा स्वक्षिते यज्ञकर्मणि॥ ति। वायव्यसंहितायां च॥ अथाग्निकार्यं वक्ष्यामि कुंड
वा स्थंडिलेपि वा स्थंडिलं वालुकाभिर्वा रक्तमृज्जस्तापि वेति॥ अथ शुल्बकारि
कायां कुर्याद्वितार्धांगुलिमानमर्धं केशतादुतो ह्यंगुलमानमुच्यं॥ वेदांगुलोच्छ्रितं तु स्व
हस्त होमके वस्वांगुलान्येव नच्छैव चायुते॥ लक्षाहुतौ स्थंडिलकं रूपांगुलं चोच्छ्रवि
दध्यात्त्रयुते च विंशतिः॥ तत्त्वांगुलं कोटिमखे तथोच्छ्रितं तथा बुद्धिनाधिकमानमा
हुः॥ प्रकृतिवद्विकृतिः कर्तव्येति न्यायेन प्रकृतिगतं च मानं मेखलायोन्यादीनां
स्थंडिलेपि प्राप्तिरस्तीति निश्चितं॥ अत एव बौधायनोक्तं॥ कुंडवन्मेखला हस्ता
योविंशत्या ततः परं॥ बौधायनमते प्रोक्तं स्थंडिलं चतुरस्रकं॥ कुंडाभावे तु होमा
र्थे स्थंडिलं पीठमेव वा॥ होमार्थे स्थंडिलं पीठ कार्यमित्याह शौनकः॥ तत्र योनि
मेखलाभावः॥ यदा द्विहस्तं क्रियते तदा द्विहस्तमात्रं स्यात्पीठे द्वादशांगुलं लिखेत्॥

अनेकमानेप्रादेशमात्रं पीठार्थसिद्धिःस्यात्॥ स्थंडिलमानतो ज्ञेयं॥ नपीठं उच्छ्राययेद्दाद-
शांगुलं कार्यं॥ अवतास्योदये प्राची स्यात्कृत्तिकोदये॥ चित्रास्वात्यंतरे प्राचीनप्रा
चीचंद्रसूर्ययोरिति प्राचीविधानं॥ रात्रौ संसाधयेत्प्राचीं साधकेंद्रः प्रमाणतः॥ कृत्तिका
११६ श्रवणापुष्यं चित्रास्वात्योर्यदंतरं॥ तानत्प्राच्यादिशोरूपं युगमात्रोदिते पुनरिति॥ अ
थ कुंडमंडपविधानं॥ ईश्वर उवाच॥ अथ मंडपनिर्माणं वक्ष्यामि विधिपूर्वकं॥ यज्ञ
नो यज्ञसंपत्तिहेतुः सर्वफलप्रदं॥ नक्षत्रराशिवाराणामानुकूल्ये शुभे दिने॥ विधुराजं रामः
समाराध्य कलापुण्याहवाचनं॥ समुद्रगानदीतीरे संगमे वा शिवालये॥ आरामे वि
पुले गेहे वा देवखातादिसंन्निधौ॥ गुरुस्येशानभागे वा मंडपं रचयेद्दृढं॥ तत्र भूमिं पर ११६
रीक्ष्येत वास्तुज्ञानविशारदः॥ स्फुटितां च सशल्यां च वल्मीकारोहिणीं तथा॥ दूरतः
परिवर्ज्यानि केतुरायुर्धनापहा॥ स्फुटिता मरणं कुर्यात् उरवरा धननाशिनी॥ सशल्या
त्या क्लेशदा नित्यं विषमा शत्रुतोरी बलं लदीर्घत्तरहवा विद्धं मरणं व्याधिकुर्या

द्गर्तिकवा महीः॥ यमरोगकरा वा भूमिर्नित्यं मृत्युक्षयप्रदा॥ गर्तहक्षयकरी सा च भूमिर्याति
कोतिका॥ धनहानिकरी पृथ्वी कीर्तिदा वर्तुलाद्दवा॥ बातलवा तथा भूमिर्नित्यं
युद्धोगकारिणी॥ सुरभी तां रति यत्र संव संरवृषैः सह॥ सुंदरी तां गति यत्र पुरुषे स
हंसत्तमे॥ काश्मीरचंदनामोदा कर्पूरागरुगंधिनी॥ कमलोत्पलगंधा च जातिचंपक
गंधिनी॥ पाटलामल्लिकागंधा नागकेसरगंधिनी॥ दधिक्षीराज्यगंधा च मधिस्तुरसुगं
धिनी॥ सर्वेषामेव वर्णानां भूमिः साधारणा मता॥ श्वेता रक्ता पीता कृष्णा विप्रादीनां
प्रशस्यते॥ मधुरा च कषाया च आम्ला च कटुका च या॥ कुशैः शयैस्तथा काशैर्दूर्वाभि
र्याच संमता॥ प्रशस्ता भूर्महाबाहो मंडपादौ विशेषतः॥ प्रासादारंभकाले च गृहादौ
वा भुवीश्वरे॥ शस्योद्धारः प्रकर्तव्यो यदिच्छेच्छुभमात्मनः॥ प्रासादारंभकाले च यदंगा
स्पृश्यते पुमान्॥ वास्तुदेहे दृढं तत्र शल्यं विद्याद्विचक्षणः॥ कुंडपतिशिरः पुंस्त्रीशिरः
शल्यं समुद्धरेत्॥ शल्यं न चास्थितं ज्ञेयं खन्यमानेकरत्रये॥ अग्निर्दिङ्नश्वरो गम्यः प्रथ

नृहानिश्च जायते॥ यत्नेनोत्सार्य द्वल्यं यदिच्छेच्छुभमात्मनः॥ बाहौ कंडूयमाने तु निर्दिशे
द्गेहसंस्थं खरं॥ हस्तद्वये न संतिष्ठेद्गृहस्थानां कपिले न वा॥ स्वामिनो मरणं विद्याद्विदेशागम
११७ नं तथा॥ तस्मात्सर्वप्रयत्नेन शल्यमुत्सारयेन्नरः॥ कुक्षौ कंडूयमाने तु कांस्यशल्यं विनिर्दि
शेत्॥ हस्तमात्रे तु संतिष्ठेल्लक्ष्मीं गच्छति तत्र वा॥ सा श्रीश्च भवेद्भार्या यशोहानिश्च जाय
ते॥ हस्तौ कंडूयमाने तु कंकालं च विनिर्दिशेत्॥ त्रिहस्ते न च संतिष्ठेत् नवन्यमानेन चान्य रामः
था॥ अग्निदाहश्च रोगश्च अस्य शल्ये मरणं भवेत्॥ यत्नेनोत्सारयेत्स्थत्व्ययं॥ पृष्ठे कंडू ११७
यमाने तु बहुशल्यं विनिर्दिशेत्॥ हस्तेनैकेन संतिष्ठेन्नोत्र कार्या विचारणा॥ स्वामिनो
शो भवेन्नत्र भार्या या जायते सती॥ पादौ कंडूयमाने तु हस्तिशल्यं विनिर्दिशेत्॥ सार्द्ध
हस्ते न संतिष्ठेद्गृहस्थानां गदितं तव॥ गोनाशो राजदंडश्च सस्यहानिश्च जायते॥ कुक्षिं
कंडूयमाने तु पाषाणं तत्र निर्दिशेत्॥ हस्तद्वितयमाने न लभ्यते नात्र संशयः॥ भुजंग
दंशो यत्रस्याद्वल्यं तत्र समुद्धरेत्॥ जानुकंडूयमाने तु भस्मशल्यं विनिर्दिशेत्॥ हस्त

द्वये न संतिष्ठेद्गृहस्थानां गदितं तव॥ अग्निदाहो भमस्तापः क्लेशो दुःखमयानि च॥ करोत्यवं
विधं कर्म्म तस्मात्तं समुद्धरेत्॥ गोशृंग पीतमंडूकं शंखशुक्ति च कर्पटं॥ ज्ञात्वैवं के अ
प्रशस्ताः स्युर्याश्च नृस्वारं भयानकाः॥ अंगारं चैतुषं केशमस्थिशल्यं समुद्धरेत्॥ खन्य
माने जलं यावच्छल्यदोषो विनश्यति॥ द्वारान्तरास्थिते वारि खेनितानैव शल्यं तो॥ पंचह
स्तं प्रखातव्यं शल्यदोषोपशांतये॥ इत्थं भूमिं परीक्ष्याथ कुर्यात्प्राचीविनिर्णयं॥ मीनो
र्गत्यादि शोज्ञात्वा कुर्यात्किर्मलादेशिकः॥ तत्रत्यादि परिज्ञानं ज्ञाणुवद्भ्येमथा विधिः सु
समे भूतले ह्रत्वावृत्तं भ्रमणरूपतः॥ तन्मध्या विदोशंकुं तं स्थापयेद्द्वादशांगुलं॥ अग्र
च्छायान्त्य यच्छा ह्यत्रेते पूर्वापरद्वये॥ पूर्वापरद्वये कृत्वा चिन्हं तदाभितस्तथा॥ समानप
रिमाणौ कृत्वा वृत्तद्वयं पुनः॥ तयोः संश्लेषसंजातमत्स्यं द्वयोरंतरस्थितं॥ संधिद्वयेष
प्राक्॥ संधिद्वयेष्व च प्राकुप्रसंकुसूत्रं मध्ये तु विन्यसेत्॥ सूत्रदक्षोत्तरं तेषां मग्रेप्रा
च्यादिकल्पयेत्॥ एवमाशापरिज्ञानं समाख्यातं मया स्फुटं॥ ज्ञात्वैवं मंडपादीनि कु

यत्रिम्यम्बिचक्षणः॥ यष्टिकुर्याच्च यथाद्दष्टुं विपन्नोरुकं भजेत्॥ १७॥ रात्रौ संसाधयेत्प्रा
चीं साधकैः प्रमाणतः॥ कृत्तिकाश्रवणांपुष्यं चित्रास्वात्योर्यदंतरं॥ १॥ तत्प्राच्यां दि-
११८ शोरूपं युगमार्ग्रोदिते पुनः॥ कथितं मे महाप्राज्ञ शिल्पिशास्त्रानुसारतः॥ अथैषां
साधनं वक्ष्ये यत्प्रोक्तं ब्रह्मणा पुरा॥ नवानां मंडपानां च वास्तुशास्त्रेण कीर्तितं॥ प्रा
कप्रत्यगमनं सूत्रं न्यसेन्मंडपमानतः॥ उदग्दक्षिणसूत्रार्थं मत्स्यौ द्वौ परिलेखयेत्॥
प्रागक्प्रत्यगं के च हस्तं दत्वा विचक्षणः॥ शंकरस्य मुखेपुच्छे मध्यान्ते प्रसारितं॥ उद राम:
ग्दक्षिणसूत्रं स्याद्युक्तमान प्रमाणतः॥ सूत्रार्धमानसूत्रार्धदिक्षु चिह्नं समालि- ११८
खेत्॥ तच्चिह्नं तु समाश्रित्य प्रतिलोमानुलोमतः॥ सूत्रार्धमानसूत्राग्रोस्त्राणि
प्रतिपादयेत्॥ एवं स्यात्सूत्रपातेन चतुरस्रं शुभावहं॥ यद्वा सूत्रानुसारेण कर्ण
ब्धं चतुरस्रकं॥ नवानां मंडपानां तु निर्माणं शास्त्रनोदितं॥ श्रेष्ठमध्यमहीने स्तु-
मानैर्वचिलमहामते॥ चतुर्विंशतिहस्तश्च गरुडो मंडपो भवेत्॥ द्वाविंशत्या भवेद्

श्रेष्ठ पद्मो विंशतिकैः करैः सुघोषश्चाष्टदशभिः कलाभिः कामराजकः॥ मनुसंख्यैः कांचनस्तु
विरामोर्कमितैः करैः॥ हस्तैस्तु दशभि पोरिव सुभिरूक्षनोमंडपो भवेत्॥ ज्येष्ठमध्यमहीनेस्तु
मानैस्तैस्तेन वमंडपाः॥ ॥ यद्वोत्तमं मानमाहुर्हस्तषोडशकेन तथा॥ चतुर्दशमिते हस्ते
मध्यमं परिकीर्तितं॥ हीनं द्वादशहस्तैस्तु मानमुक्तं मनीषिभिः॥ शृणु वर्णानुपूर्व्येण मं-
डपानं शुभलक्षणान्॥ हस्तैर्विंशतिभिः कार्यो मंडपस्तु ग्रजन्मनां॥ अष्टभिर्बाहुजा-
तानां विंशोमर्कमितैः करैः॥ दशभिस्तु वैश्यानां वसुभिः शूद्रवर्णिनां॥ सर्वेषां
ब्राह्मणादीनां प्रोक्तं कार्यानुसारतः॥ स्थलादर्काङ्गुलोच्छ्रायमंडपस्थलमीरितं॥ यो
वत्कर प्रमाणास्तु पं उपः कर्त्तसंमतः॥ तावद्दीसारशनां कुर्यात्तां चतुर्गुणां॥ पुनस्तां
त्रिगुणां कृत्वा तदर्के षार्कसंमितान्॥ शंकून्निधाय सर्वांता चतुर्दिक्षु प्रसारयेत्॥ स्तं
भास्तत्र निखातव्याः सुदृढा द्वादशमितः॥ पंचहस्तसमुच्छ्राया ऊर्ध्वोक्तफलप्रदाः॥
चत्वारो मध्यतो देव्याम ऊर्ध्वे चिडासंन्विताः॥ अष्टहस्तसमुच्छ्रायाः शोभास्ते पंच मांशकैः॥

– लिंगरकैजवः सर्वेसारदारुमयाः शुभाः ॥ यज्ञियं वृक्षो वेणुर्वाक्रमुकः स्तंभकर्मणि ॥
अन्ये विरुद्धवृक्षा वामवेयुर्नान्यमहरुद्राः ॥ गृहशाल्याः स्वयं शुष्काः स्फुटितश्च पुरातनाः ॥
११८ अस्योम्यमोमिजनितः संसाज्याः स्तंभकर्मणि ॥ कटैः स्वच्छिद्रअसंछन्नो चासमंतात्सतृणै-
रपि ॥ द्वारबंधं शुभे वंशैर्नारिकेलदलैस्तथा ॥ भित्तिं च परितस्तस्य कुर्याद्दित्याकुरथै-
नः नियमो यं समाख्यातः स्थिरलिंगक्रियादिषु ॥ मंडपं मंडपद्वादशाख्याभिस्तु विचक्ष-
णः ॥ ईशान्यादिको- रामः
णाः ॥ ० ॥ ० ॥ अथैतान् संप्रवक्ष्यामि प्रोक्तास्तु स्तंभदेवताः ॥ ० ॥ ईशान्यादिको- ११८
णाः ॥ ० ॥ ० ॥ अथैतान् संप्रवक्ष्यामि प्रोक्तास्तु स्तंभदेवताः ॥ ० ॥ ईशान्यादिको-
मेशो व पूजनीयाः प्रयत्नतः ॥ ब्रह्मा विष्णुश्च रुद्रश्च इशक्रमानु जनार्दनाः ॥ पितरः सर्पसे
नान्याः दृषदश्चोनिशांपतिः ॥ प्रचेता यसुसीरीचवा कपतिश्च ह्रदनंदनः ॥ एते देवाः स
माख्याताः ॥ स्तंभकर्मणि सूरिभिः दिक्षु द्वाराणि चत्वारि विदध्यात्पंचमांशतः ॥ यद्वा
द्वाराणि चत्वारि मध्ये वा विदधीत वे ॥ कनीयसि स्याद्धि करं चतुरंगुलिवर्द्धितः ॥ मध्य
मोत्तमयोर्द्वारं वास्तुशास्त्रे प्रकीर्तितं ॥ चतपदत्रवमाला ध्वं वितानेरुपशोभितं ॥ वि

चित्रवस्त्रसंछन्नं चंद्रतारामिश्चविराजितं ॥ सफलैः कदलीस्तंभैः क्रमुकैर्नारिकेलकैः ॥
फलैः नानाविधैर्मोज्ञैर्दर्पणैश्चामरैरपि ॥ भूषितं मंडपं कुर्यान्नानापुष्पसुगंधि-
तं ॥ कलशैर्घंटिकाभिश्च साधारैः कटकैस्तथा ॥ अत्रैवमन्ये प्रोक्ताश्चापिमंडपे यन्मं-
त्रिणामः ॥ आख्यानेस्याधानेः क्रतुः स्वरतः स्वमभानकः ॥ मनोज्ञो मंडपो यो सौ कर्म
कर्तुः शुभावहः ॥ अनुक्तसाधनैः कर्त्तनाशनः ॥ आरतिमंडपनिर्माणं ॥ द्वारे पुतोर-
णानि स्युः क्रमात्क्षीरमहीरुहां ॥ मंडपाद्वास्यदेशे च हस्तमानेन तानि वि ॥ दवास्तोर-
णारूपेणा संस्थितायज्ञमंडपे ॥ बिल्वविध्वसनाचैवचिरस्थायं चाध्वरस्य च ॥ वट्यश्वा-
त्थरणां प्राच्यां यज्ञांगं दक्षिणे मतं ॥ वारुणो बोधिस्तंभः स्कैर्वेयां विजयी भवेत् ॥ एव
मेषामलाभे स्यां मे सदभावे शमाद्रुमाः ॥ जंबू खदिरसाश्च तालोरणास्युताः ॥ सुश्लो
मनं नाम पूर्वे अग्निमीळे तिमंत्रितं ॥ इषेत्वोति च मंत्रेण सुभद्रारख्यं तु दक्षिणे ॥ सुक
र्मारख्यं तु वारुण्यां अग्न आयाहि मंत्रतः ॥ शंनोदेवीति मंत्रेण सुहोत्रं तत्तरेन्यसेत् ॥

पश्चिमद्वारमारभ्य तोरणानि निवेशयेत्। स्तंभोच्छ्रायस्तु तत्तेषां सप्तहस्तैः पृथक्पृथक्
॥दिग्गजप्रमाणेन तत्सरीणाहं ईरितः। निर्यक्फलकमानं स्यात्स्तंभोनाम दृढमीनतं॥तो
रणाग्रटयिस्त्रैवमर्धचंद्र लवयन्न्यसेत्॥ ऋजुर्वे मध्यशृंगं स्यात्किंचिद्वक्रं तु पक्षयोः शैवे
१२० त्येवं समाख्यातं वास्तुशास्त्रविशारदैः। तत्केकः कलशः स्थाप्यः पूर्वादि प्रतितोरणं॥
मं उपेकलशौ द्वौ द्वौ द्वारे द्वारे निवेशयेत्॥ गोलितोदककं संपूर्णा वाम्रपल्लवशोभितौ
॥गंधपुष्पाक्षतोपेतौ सर्वौषधिसमन्वितौ॥ प्रतिकोणं तथैकैकं स्थापयेत्कलशं शु रामः
भं॥ ध्वजबंधगं वा कपतिच विधेशांतेषु पूजयेत्॥ मंडपस्य तु कोष्ठा कलशेषु क्रमाद्द १२०
मी॥ स्वस्त्ययो दुर्जयश्चैव सिद्धार्थो मंगलस्तथा॥ पूज्या द्वादशस्य कुंभेषु शाक्रायास्त
न्मन्त्रमैः पूर्वकं म्येद्विनौ विप्रो पठेतां नियमात्तमः॥ श्रीसूक्तं पावमानं च सोमसू
क्तं सुमंगलं॥ रौद्रं च सोमकामध्यायं रक्षोघ्नं देशिकाज्ञया॥ दक्षिणे च यजुर्वेदं रु
द्राध्यायस्य पाठकौ॥ तथा पुरुषसूक्तं च श्लोकाध्यायं समुच्चयं॥ मंडलब्राह्मणं

चैव प्रेरितो गुरुणा पुनः॥ पश्चिमे सामगो विप्रो वृषुर्या स्त्रजपकौ॥ सूक्तं मां गिरसं रुद्र
सूक्तं चैव पराजितं॥ देवीं च मधुसूक्तं च शांतिकाध्यायमेव च। पठेतां तौ महाप्राज्ञौ स्वदिक्षि
देशिके मतो। उत्तरे चाथर्वविदौ द्वौ पृथ्यान्नजापकौ। देवीं च मधुसूक्तं च शांतिकाध्याय मे
व च। यावत्कर्मसमाप्त्येत जपेयुस्ते द्विजोत्तमाः॥ एवं चतुर्षु द्वारेषु स्थापयेद्द्वारपालका
न्॥ इति तोरणप्रकरणं। ततो मंडपस्यं तु चिगुणां परिकल्पयेत्। पूर्वादिषु क्रमात्ता
स्य भागेनैकेन वेदिका। मंडपस्य नवांशास्तु वेदिका वे स्मृता बुधैः। तुलापुरापदाना
दौ मध्यभागे तु वेदिका॥ शांतिके पौष्टिके विप्र शिवको लोप्रशस्यते। चतुर्थांशोच्छ्रि
तिस्तस्मा राजहस्तोच्छ्रया पवा॥ लक्षणं राजहस्तस्य कथयामि तवानघ। घरण व
त्र्यांगुलैर्विप्रदं उहस्तास्मृतो बुधैः वेदनेत्रांगुलैः प्रोक्तो वंशस्तस्तो मनीषिभिः। रा
जहस्तो विशांककसंख्यांगुलैः पद्मिरुदाहृतः। स्वामिहस्तो मतीभवेदष्टचंद्राकैर
रंगुलैस्तथा। दर्पतो दरसंकाशा निर्मोक्तिततविवर्जिता॥ सुप्रभा कारा तु या वेदी कर्तुः

कामफलप्रदा॥ वक्रपादाश्रयाक्रिया मध्या पुरुषादृष्टी शोभना॥ मानहीना काकासीक
र्तुः कामविनाशिनी॥ यत्कामिर्वाच्यपत्कामिरिष्टकामिर्दृढा यथा॥ चतुरस्रा चतुःको
णा तंडुलाविस्तृतापि वा॥ एवं द्विर्ध्वगुले हीनाश्च त्रविदृश्यजन्मनां॥ इतितेमिलितं
१२२ तान वेदीलक्षणाममृतं॥ इति वेदीनिर्माणप्रकरणं॥ ॥अथातः संप्रवक्ष्यामि ध्व
जारोपणमुत्तमं॥ सूक्तैर्वा पुरुषास्य कुसमस्तकलशा न्यपयातु॥ यातुधाना गुह्य
का अकुष्मांडाः खेचरास्तथा॥ चिंतयंत्यसुरश्रेष्ठं ध्वजहीनं सुरालयं॥ ध्वजेन रहि राम:
तो ब्रह्मन्नंते उपस्युर्यथामवेत्॥ ध्वजारोमादिकं सर्वं जपायेन्मूलं बुद्धैः॥ रक्षसो न वि १२२
नायद्दस्ये चैन नश्यति कीजनः॥ ध्वजं विना देवगृहे तथा नश्यंति सर्वथा॥ विष्णुपादिष
दाः क्रूराः कूष्मांडाद्याश्च ये ग्रहाः॥ पूजादिकं तु गेहस्थं ति देवं दृष्ट्वा खरक्षितं॥ दृष्ट्वा ध्व
जं तु देवस्थं उपेज्यन भ्रमैर्नेमो॥ नश्यंति सर्वं तत्क्षार्करश्मिदृष्टीणां यथा तमः॥ ध्व
जानां लक्षणं सम्यगुच्यते तु यथा तथा॥ मंडपस्य बहिर्दंडे दशहस्त[illegible]यतेः सह।

दृढाच्चापवस्तुकाष्ठस्तु ध्वजानां स्थापयेत्क्रमात्॥ तेषां हस्तद्वयं व्यासो मध्यश्च करसंमितः॥
व्यासार्द्धं शिखरं पुच्छं हस्तं चितयमानकाम स्यामं शिखरं प्रोक्तं पुच्छं तु स्यात्रिकोण-
कं॥ तयोर्मध्ये चतुष्कोणं ध्वजमेवं प्रकल्पयेत्॥ मतंगवस्त्रमहिषसिंहमत्स्यैणवाजिनः॥
वृषभं च यथान्यायं ध्वजमध्ये क्रमाल्लिखेत्॥ अथवा दिग्गजान्पृष्ठे वैरावतपुरःस
रान्ध्वजेषु विलिखेद्वृक्षयातुमिश्रस्य लक्षणान्॥ एवं ध्वजानां कर्तं लक्षणं च मुनावंह॥
प्रतिकाष्ठे पताकास्तु प्रोक्ताः शास्त्रार्थकोविदैः॥ सप्तहस्ताः पताकास्तु विशांगुलवि
स्तृताः॥ दशहस्तपताकानां दंडाः पंचाशविस्तृताः॥ पताका भ्रायुधाराः पुष्पगंधसमन्वि
ताः पीतारुणासितो धूम्रः शुक्लोथ मासिता कुमो॥ गौरोरुणः क्रमादेवमाख्याता संप्र
कीर्तिताः॥ ॥अतः परं प्रवक्ष्यामि दिक्पालानामहं मते॥ ॥उपचारान्यथाशक्ति
मंत्रवाहनपूर्वकं॥ राहिस वामराध्यक्ष गंधवादिपरिष्कृत॥ रक्षोध्वरं नोभगवस्त्र-
वर्यांशिनस्तेनमः॥ एवमावाह्य गंधाद्यैः परिपूज्यते नो गुरुः॥ पताका पीतवर्णाभा

आग्नेशिशानमंत्रतः। ज्वालारमिति मंत्रेण ध्वजं तत्रैव विन्यसेत्॥८॥ एहि पावक लोकेश शक्ति
हस्तायुधगणैः सह। अग्नेश्वर रक्तस्त तनमाग्नेय्यां दिशि तेनमः। अग्निकृतं समुच्चार्य मंत्रं
१२२ तत्र प्रविन्यसेत्॥ लन्नो अग्नकृचान् योध्वजं तत्रैव रोपयेत्॥२॥ एहि वैवस्वत धर्म
प्राज्ञाशुभनिवारक॥ शिवाय पाहि यज्ञं नो नयस्ते भवते गोन्दिमो॥ कृष्णवर्णपताकां
च भाययेमोरिति मंत्रतः। दक्षिणस्यां ध्वजं दद्यात्सुगन्धमनुनाऽत्र तु॥ एहि रक्षोगणैः सा
र्धं निर्ऋते शमनाध्वरं॥ पाहि प्रेतपिशाचेभ्यो कौकनोद्य नमोस्तु ते॥ पताकां श्वेतव रामः
र्णाभां मसुन्वते इति मंत्रतः। दद्याद्ध्वजं च तत्रैव एष ते निर्ऋते इति च॥ एहि वारिचराधी १२२
श गंधमादि परिष्कृत। प्रतीच्यामध्वरं नो च पाहि तुभ्यं नमो नमः॥ पताकां शुक्लपिच्छा
भामिमंमेवरुणेति च॥ ध्वजं संपूज्य वेदद्यात्तत्वा यामीति मंत्रतः॥५॥ ०॥ एह्येहि त्वं
जत्प्राणाधिपसंवेषमनाध्वरं वायव्यां पाहि सुप्रीतो नमस्तुभ्यं पुनः पुनः। पताकां
धूम्रसंकाशां प्रादद्यात्प्राणदा रूचा॥ वायो यते ध्वजं चारु उन्यसेत्तत्र विधानवत्॥६॥

एहि सोमस्तुराध्यक्ष नक्षत्रैः पितृभिः सह। गृहाण ध्वजां भगवन्याहि यज्ञं नमोस्तुते॥
आप्यायस्वेति मंत्रेण पताकां धवलां न्यसेत्॥ सोमं राजानमंत्रेण ध्वजं दद्यात्तथो
त्तरे॥७॥ एहि विश्वेश्वर विभो गणैः सार्धं ममाध्वरे॥ यज्ञसिद्ध्यै गृहाणेमां सपर्यां
भवते नमः। पताकां शुभ्रवर्णाभां तमीशानेति मंत्रतः॥ तत्रैव च ध्वजं दद्यादभिस्त्वे
तिकृचा द्विजः॥ एह्यनंत महासत्व नागकन्यापरिष्कृत॥ रक्षाध्वरं समेशानयक्षो
रगगणैः सह॥ पताकां गौरवर्णाभां नमोस्तु सर्पेभ्यो मंत्रतः। पाशिनिर्ऋतयोर्मध्ये चित्र
वर्णं च वो ध्वजं॥ एहि ब्रह्मन्सुरश्रेष्ठ लोकनाथ शिखामणे॥ विशाध्वरं नो भगवन्पा
हि तुभ्यं नमोस्तु ते॥ पताकां नरुणां लत्रद्यात् ब्रह्मजज्ञानं मंत्रतः। ईशानपूर्वयोर्मध्ये पं
चवर्णं ध्वजं स्तथा॥ रंद्रस्यवक्ष्यमंचेतद्याज्जातवेदसं सन्निभं॥ किंकिणीजालसं
युक्तं मंडपोपरि मध्यतः। त्रिहस्तविस्तृतं कुर्याद्दशहस्तायतं पुनः॥ एवं ध्वजविधिः
प्रोक्तः समासेन मया नघ॥ इति ध्वजपताकोत्थकरणं। अग्नयोनिमेखला प्रकरणं॥

प्रतिष्ठासारसंग्रहे।। पंच त्रि एक मेखलो द्युयंज्ञात्वा शेषं खनेदिति।। विश्वकर्माप्या
ह।। व्यासः खातः परः प्रोक्तो निम्नं तिथ्यंगुलैर्नतु। उन्नता ध्यानवांगुलैरिति।। एवं बाहु
१२३ द्विमेखलापक्षे।। व्यासः खाता परः प्रोक्तः खातं स्यान्नदशैव तु। उन्नता द्याः स्वसांगु
लैरिति।। एकमेखलापक्षे।। खातमष्टादशांगुलैरिति।। उन्नता चामेखलाष उंगुले
रिति।। अथ पंचमेखलापक्षे।। तन्त्रान्तरमुक्तं लक्षणं तासंग्रहे।। मेखलाः पंच वा कार्याः रामः
षट् पंचाश्वित्रिपक्षकैरिति।। ।।सिद्धान्तशेखरेपि।। ।।षट् बाणा वह्नि नेत्र मि १२३
ताः स्युः रिति पंच मेखला।। अथ त्रिमेखलापक्षः। वेदाग्निनयनांगुलैरिति।। अथ
द्विमेखलापक्षः पिंगलामते। कुंडवष्टांशेन।। कुंडाष्टमांशेन। एकमेखलापक्षेऽहे
माद्रौ कुंडानां यादृशं रूपं मेखलानां च तादृशं। मेखलाः पंच वा तिस्रो वै का वा प्यमे
वेदिह।। उत्तमं त्रिहनिर्दिष्टं कुंडे वै पंचमेखलं।। त्रिमेखलं भवेन्मध्यं हीनं स्यादे नि१
कमेखलं।। शारदातिलकेपि।। ।। खातादेकांगुलं त्यक्त्वा मेखलानां स्थितिस्तु वै नु।।

द्व्यंगुलः कुंडकंठः स्यान्मेखला खातमध्यतः।। मेखलैकाथवा तिस्रः कुर्यात्कुंडे प्रय
त्नतः।। कुंडानामाकृतिर्यादृक् तादृक्तन्मेखलाकृतिः।। अथ रामवाजपेयो।। षट् पंच
च वेदगुणपक्षलवेस्तु पंचस्तु मेखला इतरथा प्रपंचेक्षुर्हरीनुगादिमांकल्पते स्त
दिषु लवोन तुंगाः परार्ध्य पंच च विस्तृति संमितोच्चाः। प्रतिष्ठासारसंग्रहेपि।। पंच
त्रि एकमेखलो द्युयंज्ञात्वा शेषमध्यात्खनेदिति। यच्छारदातिलके यावत्कुंडस्य वि
स्तारः खननं तावदीरितमिति। वाक्यं न तु मेखलायास्तेहेति।। द्धि अथ योनिलक्ष
णं।। यदा पंच तदाद्यं वं षट् पंचाश्वित्रि पक्षकैः।। अंगुलैः पंच कार्यास्तु उन्नता
विस्तृता अन्ता।। कंठार्धं शांगुला तु गा पूर्वादिषु षडंगुला।। चतुर्दशांशं वै वृद्धिः पर्वतु
ल्याः पारापराः। मेखलामध्यतो योनिः कुंडत्र्यंशेन विस्तृता।। कुंडगर्भे निम्नता।। ...वाः
संस्थाप्या मेखलोपरि। दशांगुला या तु वा योनि दीर्घा चेच्चि कुंडपश्चिमे।। सप्तांगुला
च विस्तीर्णा कर्तव्याश्वत्थपत्रवत्।। एकांगुलप्रमाणेन पृष्ठस्था योनिमेखला।।

अंतचिलोन्नताकुंडप्रविष्टैकांगुलाधरा।कूर्मपृष्ठोन्नतामध्येपार्श्वयोश्चांगुलोछ्रया॥
गजोष्ठसदृशीनद्धायताछिद्रसंयुता।योनिमध्यगतंलिंगंतुगंधपुष्पकरांगुलं।मध्यंउद्धि
तयंनेस्याःपार्श्वयो।कुंभिकुंभवत्॥एकांगुलंतुयोन्यग्रंकुर्याद्दीर्घमधोमुखं॥एकैकां
१२४ गुलतोयोनिकुंडेष्वन्येषुवर्धयेत्॥यवद्वयप्रमाणेनयोन्यग्रमपिवर्धयेत्॥तस्मा
द्वारास्यनासामंयोनिमध्येमुखंस्मृतं॥एकहस्तमितेकुंडेवेदाग्निनयनांगुलाःमोन्याः
पश्चिमतोनालंआयामेनतुरंगुलैः॥त्रिछिद्रेकांगुलविस्तारःक्रमोच्चनाग्रमिष्यते॥ राम:
अछिद्रसंख्यागुलोपेनामुद्रायायामतःसमो॥वेदिविधायतत्स्यांगुन्यस्यतालं १२४
विधानवत्॥शेषंपदप्ररयेदत्तःपरिधिस्थापनायच॥विधायरंध्रंमध्यस्थंमेखलो
परिशोभनं॥नाभिपद्मा॥विशेषकुंभ्वासव्यासेःत्वाद्विमतोकल्पनीयः॥नाभिष्ठा
चैविध्यंनेत्रामममध्येकुर्वीतकर्णिकां॥बहिरंशद्वयेनाष्टौदानान्युपरिकल्पयेत्॥
इतियो। मेखलाप्रकरणं॥अथयात्रलक्षणं॥श्रीपर्णीशिंशिपाशोकखादिर।

म्रपल।राजा॥वैकंकतशमीशालश्रीखंडास्त्वरक्तजाः।षड्विंशदंगुलादीर्घासुग्याश्चापष्ट
उंगुलं॥विशंशंगुलकोदीर्घोदंडस्तस्यास्तकत्तुलः।विस्तारेद्व्यंगुलाप्रोक्तापरिणाहे
पडंगुला॥तन्मूलेकरशाकाररामवेदांगुलेर्मितं।यत्काबेदांगुलमलंद्व्यंगुलस्तुचआ
सनं॥दंडाग्रेष्टांगुलविद्धद्व्यंगुलंवेदिमेखला।वेदिकायस्थितावेदिपीडाचचतुरं
गुला॥छिद्रंगुलंस्मृतंखातंवर्तुलंचतुरंगुलं॥पंकेरुगपत्राकारंकर्णिकास्यहितंव
हिःअंगुष्टोवेदितकंठोवेदित्रिभागविस्तरः।कंठास्तांगुलंनालंद्व्यंगुलंष्ठुलंच
तत्॥कनिष्ठिकापरीणाहिमाज्यनिर्गमनंहितं।इतिस्रुलक्षणं॥अथस्त्रुवलक्षणं॥य
ज्ञास्रुग्यास्रुवस्तज्ज्ञोहस्तिकोंगुष्ठगंडिका।अवटंगोपदाकारंकर्परिंतपुष्करामू
लायगंडिकाश्रांतोदंगेनालोहंतिःश्रुमेः।अवटंगजेकुंभाभंश्लक्ष्णंदंडेनवायुतं।इति
स्रुवलक्षणं॥वसिष्ठसंहितायां॥चक्कुंडलक्षणमीरितं॥गृहस्थेशानभोगेचमंउ
पंकारयेद्बुधः।षट्द्वादशाष्टमिर्हस्तैःषोडशैर्वासमंततः॥चतुर्द्वारसमायुक्तंतोरणं

वकिमपिपरतीति॥ इतिविधानपारिजातेदूर्वाहुतिविधानं॥ हरेः प्रसादमासाद्य हृदे
यज्ञोनिरूपितः॥ ...स्तदिदं दुःस्यं मोचकस्तेन तुष्यतु॥ मनोरथाभिवर्षिण्याविंदु
दृशामनुकंपया॥ विधानपारिजाते च द्वितीयस्तबको भवत्॥ अहो अस्य विबंधस्य म
२६ हिमा किं भुवर्णते॥ यतः श्रीमदनंतोस्य हरिकारयिता मया॥ स्तुतिर्ग्रंथस्य ... ॥ इति श्रीमन्न
देशोद्देशे मह...पि॥ केवलस्य महिमा वेद्यो॥ मिजै ज्ञेयतिस्वर्वता॥ ॥ इति श्रीमन्न
रमवंशिक श्रीमन्नागदेवभट्टसूनुना श्रीमदनंतभट्टेन विरचिते विधानपारिजा रामः
ते नैबंधे द्वितीयः स्तबकः समाप्तः॥ शुभमस्तु ॥ शांतिरस्तु॥ ०॥ १... ० १२६